Neelakantha Shivacharya
Brahma mimansa bhashye-Pt2-4
ब्रह्ममीमांसा भाष्ये - द्वितीयपादः - चतुर्थाध्याय
Sanskrit
Paper - Handwritten
1908 (110years old)
559 Folio
8.5"x7"
Complete

1412 P.arty

6280 B

8154.

("श्रीकण्ठ" भाष्यम्)

श्री नीलकंठभाष्यम्

Note:- printed in 1908. under the title of "श्रीमदप्पय्यदीक्षितकृतशिवार्कमणिदीपिकासहितम् ब्रह्मसूत्रभाष्यम्" by Nirnaya Sagara press Bombay.

No. Sanskrit. 1/D.

12.3.54.

श्रीः

ॐ नमोऽर्हं पदार्थाय लोकानां सिद्धिहेतवे।
१ सच्चिदानन्दरूपाय शिवाय परमात्मने॥
त्रि निजशक्तिभिर्निर्मित निखिलजगज्जाल-
चित्र-निकुरम्बः।
स जयति शिवपरमात्मा सकलागमसार-
-सर्वस्वम्॥
भवतु भवतां सिद्ध्यै परमात्मा सर्वमङ्गलो-
-पेतः।
चिद्धि चिन्मयः प्रपञ्चः शेषोऽशेषोपि
रस्यैषः॥
नमः श्वेताभिधानाय नानागमविधायिने।
कैवल्यकल्पतरवे कल्याण गुरवे नमः॥
श्रीमतां व्याससूत्राणां श्रीकण्ठाय प्रकाशते।
मधुरो भाष्यसन्दोहो महार्थो नातिविस्त-
रः॥
व्याससूत्रमिदं नेत्रं विदुषां ब्रह्मदर्शने।

श्रीः

ॐ नमोऽर्हं पदार्थाय लोकानां सिद्धिहेतवे।
१ सच्चिदानन्दरूपाय शिवाय परमात्मने॥

निजशक्तिविनिर्मित निखिलजगज्जाल -
चित्रनिकुरम्बः।
स जयति शिवपरमात्मा सकलागमसार -
- सर्वस्वम्॥

भवतु भवतां सिद्ध्यै परमात्मा सर्वमङ्गलो -
- पेतः।
चिदिदं चिन्मयः प्रपञ्चः शेषोऽशेषोऽपि
यस्यैषः॥

नमः श्वेताभिधानाय नानागमविधायिने।
कैवल्यकल्पतरवे कल्याणगुरवे नमः॥

श्रीमता व्याससूत्राणी श्रीकण्ठाय प्रकाशते।
मधुरो भाष्यसन्दोहो महार्थो नातिविस्त -
रः॥

व्याससूत्रमिदं नेत्रं विदुषां ब्रह्मदर्शने।

पूर्वाचार्यैः स्वैर्लुपितं श्रीकण्ठेन प्रसाद्यते।
सर्ववेदान्तसारेषु ______ त्मनाम्।।
आर्याणां शिवनिष्ठानां भाष्यमेतन्महानिधिः।

।। इहोपनिषदि मीमांसा समारभ्यते।।

तदेतदारम्भोऽत्र किं पुरुषार्थः -
पुरुषार्थो हि निरुपाधिकप्रेमविषया
स्पदयोस्सुखदुःख सुखदुःखयो(ः)
प्राप्तिरत्यन्तनिवृत्तिर्वा - कश्चेहा
धिकारी यस्यार्थं त्वादयो धर्माः के
मस्य विषयः षट्प्रासिद्धं अनतिप्रासिद्धं द
च सन्देहडोलासमारूढं वर्तते क
स्यानन्त — मस्यारम्भः। यस्य नि
यतप्रयोजकतया पूर्वभागात्त्वमवगताऽशः।
2.A. इति श्रोतृजनमनः शङ्काशङ्कु समुन्मू
लनाय सर्वज्ञशिवरामाणां भगवता व्यासे

न· समवतारितामेदं प्रथम सूत्रम् –
॥१॥ "अथातो ब्रह्मजिज्ञासा" ॥१॥

इदमेव माधिकरणे विषय संशय पूर्व-
-पक्ष सिद्धान्त निर्णय सङ्गति नामाधारत्वं
मिदा धिकरणत्वं। अत्राथ शब्दोऽयमान
न्तर्यार्थः। नह्यथ योगानुशासनमित्या
दाविवाधिकारार्थः। अधिकार शब्दोऽ
यमारंभार्थः। नखलु ब्रह्मज्ञानेच्छा, कर्तव्यवे
न प्रारंभयोग्या भवति। साकिल विषयर
मणीयकमात्र संभाव्या। ओंकारश्चाथ
शब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भि
त्वा विनिर्यातौ ———— मांगळी(लि)
का उभौ॥ इति स्मृतेरयमथ शब्दो नमङ्गला
र्थो वर्णनीयः। जिज्ञासां प्रति मंगलस्यान्वयासं
भवात्। शास्त्रारंभेच शिष्टाचारपरिपालनार्थं
मङ्गलाचरणं मङ्गलध्वनिमात्रेण सिध्यति।

नचायं पक्षान्तर परिग्रहार्थः (र्थः)। पूर्वमे
कस्यानुक्ततया तत्प्रसंगाभावात् - नच भोजन
गमनादिवदनियतं यत्किंचित्पूर्ववृत्तमपेक्ष्या
3 यमथशब्द प्रतियोगः। नियतसामग्री
भूतस्य कस्यचिद्वृत्त विवक्षितत्वात् ॥ य
स्य च संपत्तिरिहाधिकारि विशेषणतया
ब्रह्मविचारस्य साधनं तत्पूर्वभावीति विज्ञायते ॥
अष्टवर्षकादि युक्त ब्राह्मणत्वाद्युपर्युक्तो-
2 (13) पनय संस्कार पूर्वकस्य स्वाध्यायोऽध्ये
तव्य इति स्वाविधि प्रयुक्ततया नित्यप्राप्त
स्य नियमोपासिताचार्यमुख लब्धाक्षरग्रह
णरूपस्यार्थज्ञान फलस्य वेदाध्ययन
स्य ब्रह्मविचारात् ॥ पूर्वमाविर्बं युक्तं
धर्मब्रह्मणोऽपि वैदैकसिद्धत्वात् अ
नधीतवेदस्य तद्विचारानुपपत्तेः। ततः
केवलाध्ययनानन्तरं ब्रह्मविचार इति चेत्,

भवतु नाम तादृशमध्ययनं तदनंतरं च
धर्मविचारः । तस्य तदसिद्धौ सिद्ध्य
भावात् । तथा चाचार्यैः प्रतिपादितं -
"अथातो धर्मजिज्ञासे"ति । प्रथमत उपाध्या
याध्ययनान्तरं धर्मविचार प्राप्तेरिति
नव धर्मब्रह्मविचारस्व
पयोश्शास्त्रयोरत्यन्तभेदवादिनः ।
किन्त्वेकत्वाभिप्रायवादिनः । धर्मब्र
ह्मणोराराधनाराध्यभूतयोः प्रतिपाद
कं अथातो धर्मजिज्ञासेत्यारभ्याना
वृत्ति (त्ति) शब्दादित्येतावत्पर्यन्तमे
कमेव शास्त्रं । [अ] ततोऽथातश्शेषलक्षण
मित्यादिवदवान्तरपरिच्छेदार्थोऽयं
"अथातो ब्रह्मजिज्ञासे"त्यारंभः । अथवा
धर्मस्य ब्रह्मबोधहेतुत्वात्तद्विचारोप
युक्तानां श्रुतिलिङ्गादीनां वेदचोदनाऽ

र्थवादस्मृत्यादिप्रामाण्यप्रतिपादनादीनां
च ब्रह्मबिचारोपयुक्तत्वाच्च धर्मबिचारानन्त
रं ब्रह्मबिचारः सम्भवति॥ साधना
3.A निश्चये साध्यानिश्चयात्। ब्रह्मबोधं
प्रति धर्मस्य साधनत्वे "तमेतं ब्राह्मणा
विविदिषन्ति यज्ञेन दानेनेत्यादि श्रुति
रेव भगवती(ती) प्रमाणं। कर्मणो
ब्रह्मबोधसाधनत्वे तदेव बिचार्यम
नुष्ठेयञ्च किमनेन वेदान्तवाक्य पा-
-प मलापकर्षसंस्कारहेतुताः प्रकाश
यति॥ अथ व्रीहिप्रोक्षणवत्, सर्वकर्मणां संस्का
राकारत्वे "सर्व एते पुण्यलोका भव
न्तीति श्रुत्युक्ताशामफल स्वातन्त्र्यं-
न स्यादिति चेन्न यदेव ज्ञान
फलं च। यथा व्रीहिप्रोक्षणं दर्श
पूर्णमासोत्पत्त्या (त्व–त्य) पूर्वहेतुत

या स्वर्गे समुच्चीयते। यथा कर्माणि
ज्ञान प्रयोजकतया मोक्षे समुच्चीय
न्ते। अतो गुणकर्मत्वादङ्गत्व मेषां।
ननु नित्य विधि प्राप्तस्य ज्योतिष्टोमा
दे रितिकर्तव्यतात्व विरोधात् न सं-
-स्काराकारांता सिद्धिरिति चेन्न।
सामान्य साधुरयं विचारः।
करणतया स्वतन्त्य सिद्ध्यंतर वि
हितस्य सौत्रामणि बृहस्पति सवादे
र ग्निचयन वाजपेयादेरंङ्गत्व विधा
नं दुभय विधिबलादुभय सिद्धेः।
अतो यावदुत्पद्यते ज्ञानं तावदनुष्ठेयानि
कर्माणि॥ ननु तु विविदिषन्तीति श्रव
णात् कर्मणा ज्ञानेच्छा समुदाय पर्य
न्तमनुष्ठान मितिचेन्न सारमेतत्॥ इच्छा
या (याऽ) पुरुषार्थत्वात्। तत्तत्कर्मणा

ब्रह्मबोध साधनानां विचारस्यानन्त
३.१३. रं ब्रह्मबोधकशास्त्रारम्भः समुच्चितः
ननु कर्म ब्रह्म विचारयोः क्रमनिय
मः कथमुपपद्यते॥ तत्ताक्ष्यादिति
चेन्न - क्रतौ (तौ) कर्यं मिहाचार
दर्शपूर्णमासवदङ्गाङ्गित्वेन वा पञ्च
प्रयाजवदेकाङ्गित्वेन गावो दोहना
दिवदधिकारान्तरप्रयुक्त्युपजीव्य
त्वेन ~~[illegible]~~ वा भवति। तथात्वे
निवारयोः श्रुत्यादि प्रमाणं (~~[illegible]~~)
मेवन संपद्यते। ततः कर्म ब्रह्म विचारयोः
क्रमनियमो न युक्त इति। यदि श्रुत्यादि
प्रमाणं न संभवति तथापि खलु न तथात्वं
स्यात्. " विद्यां च विद्यां च यस्तद्वेदो
भयं सह तेनैति ब्रह्मवित् पुण्यकृ
त (च) सत्येन लभ्यस्तपसा ह्येष आत्मा

संसकज्ञानेत्यादि कर्म(स)के च्यवादेनी
श्रुतिरुपपद्यते। ततः कर्मज्ञानयोः मो
क्षैकफलत्वात् तद्विचारयोरपि कर्म नि
यमो युक्तः। यन्मंत्रेऽक्षरग्रहणमा
त्रपर्यवसायित्व मध्ययन विधेः तथापि
विचारयोन्न (र्न) प्रवृत्त्यसंभवः।
साङ्गाध्ययनेनापाद्यमान पदार्थमातप्रती
तेः तदनु ब्रह्म ज्ञानोपासन ज्योति
ष्टोमादि विधायकानां (वाक्यानां) सूक्ष्मोपास
न भूत दहरादि विद्या विधायकानां च
वाक्यानां परस्पर विरोधाभासं मप
श्यं स्तद्विचारो पुरुषार्थकार्थं पुरुष(षः)
स्वयमेव प्रवर्तते। ततो नानिकन्धनो-
४.A. विचारः॥ *ननु श्रोतव्य इति वाक्येन
वेद (वेदांत) श्रवणं साक्षाद्विधीयते
इति चेन्न साधनसंपत्त्यभावात्।

तथाहि वेदान्त श्रवणं नापूर्वविधि गोचर(रः) प्राप्तत्वात्। प्राप्तिश्च वेदांत श्रवणं स्व विषयोपात्त साधनं - शास्त्र श्रवणत्वात् वैद्यशास्त्रवदित्यादिभिः॥ नचास्य नियम विधि गोचरत्व(त्वं) अवघातादिवत् कस्य चिद्(दृ) दृष्ट फलस्याप्राप्तेः। नच परिसंख्या नियम विषयत्वं अध्यताऽपि वेदांत श्रोतव्या एव नाध्येतव्या इति पर्यवस्येरन्। तथासत्यनध्यीतवेदांतानां विचारायोगात् अपुरुषार्थ संभवः। यदि वेदांत श्रवणस्य परिसंख्यापरत्वं मे — कां उ श्रवण निषेधपर निमित्ति विचारः तदा विचाराभावात् कर्मानुष्ठान समर्थनाभावः। तदभावे चित्तशुद्ध्यभात(भावात्)

ज्ञानानुत्पत्ति (त्तिः) स्यात् । तस्मात्पूर्वोक्त
मेव समीचीनं । ततस्सकल चिदचित्प
(त्प्र) पञ्चाकार परमशक्तिविशिष्टाद्वैती
यवैभवस्य सकलनिगमसार रहस्य नि
धानस्य भव शिव शब्द पशुपति परमे
श्वर महादेव रुद्र शंभु प्रभृति पाय वाच
कशब्द सार प्रकाशित परममहिम विला
सस्य सचेष भूत निखिलचेतन समुपा
४.B. सनानुगुण समुदित निजप्रसाद समर्पित
सकल पुरुषार्थसार्थस्य परब्रह्मणः प्रतिपा
दकमुपनिषच्छास्त्रं विचारणीयं ॥ तन्नि
योगरूप चोदनालक्षणस्य तदाराधन
स्य विशेष सार्थरूपस्य तत्तदर्थवाद
प्रकटित प्रशस्य विलासस्य श्रुत्या
दि संपादित सकलाङ्ग पुष्टितस्य स
(स्व) प्रमाणानुगुण स्मृतीतिहास पुरा पुराणास्मृतीतिहास

णा,भियुक्त सन्दर्भकृतोप क्र (क्र) ह्म
णस्य विधि ~~निषेध~~ प्रतिषेध विकल्प
समुच्चयोत्सर्गापवाद बाधा समुच्चयादि
मतो निखिलपुरुषार्थरत्नाकरस्य परम
प्रबोधसाधनस्य भगवतो धर्मस्य
विचारानन्तरं इत्यथ शब्दार्थो निर्णीतः।
अत शब्दोऽयं वृत्तस्य,हेतुभावे,वर्तते।य
तोऽधीतवेदेन धर्मो विचारितोऽत स्तदनु
ष्ठानसंपन्न चित्तशुद्धिना तत्कालसम्पन्न
विवेकादि गुण सहकृत परम भक्ति संभाविते
नानेन ब्रह्मापि निरतिशयं (य) निश्शेय
सकरं विचारणीय मिति ब्रह्मणो जिज्ञासा
ब्रह्म जिज्ञासेति कर्मणि षष्ठीप्रयोगः।
"परीक्ष्य लोकान् कर्मचिं (चि) तान्
ब्र (ब्रा) ह्मणो निर्वेद मायात् नास्त्यकृतः
कृतेन."। तद्विज्ञानार्थं सद्गुरुमेवाभिग

च्छेत् समित्पाणि (णिः) श्रोत्रियं ब्रह्मनिष्ठं"
इत्यादिवाक्यं विषयं (यः)। ब्रह्म विचा
G. A. रणीयं भवति नवेति सन्देहः। पूर्वपक्ष
स्तु ब्रह्मणा विचारयोग्यं भवति. तत्र
सन्देहाभावात्॥ कथं सन्देहाभा
वः। "अयमात्मा ब्रह्म" इति श्रुति रयमिति
प्रत्ययेन प्रत्यक्षसिद्धमेवात्मानं ब्रह्मेत्युप
दिशति। ततः कुतोऽत्र सन्देहकलङ्कप्रस
ङ्गः। आत्मविचारस्य फलं हि तद्विषयं ज्ञानं-
ज्ञानं हि ज्ञेयपरिच्छेदः। वेदान्तविचारजन्यं
ज्ञानं ब्रह्म परिच्छिन्नमि ब्रह्मत
थ्यात्वेन प्रकाशते। अयमिति परि
च्छिन्नो हि घटोऽयमवगम्यते ततो
ब्रह्मविषयं ज्ञानमपि न संभवति। तत्रापि
प्रयोजनञ्च न किंचित्पश्यामः। र (न)
मुक्तिः प्रयोजनं। अनादिसिद्धसंसारस्य

दुरव (प) ह्मवत्वात् इत्येवं प्राप्ते ब्रूमः।
सर्वथा समारंभणीयं शास्त्रं। ब्रह्मण स्सन्दि
ग्धतया विषयत्व संभवात्। तन्निर्णयस्य स
र्व प्रयोजनत्वाच्च। यदयमात्माब्रह्मेत्यादि श्रु
ति रमुमेवाहङ्कारबद्धं संसारिणं ब्रह्मेत्य
भिधत्ते ततएवसन्देहः। निरस्त समस्तोप
प्लवकलङ्क निरतिशय त्वं हि ब्रह्मत्वं।
अनाद्य ज्ञान वासना वशं विजृंभित वि
चित्र कर्म फल भोगानुगुण बहुशरीरप्र
वेश. निर्माण व्यापारपरवश निखि
ल मतापसहिष्णु त्वं हि वत्वं। कथमेत
यो (योः) परस्पर विलक्षणयो रेकभाव
१३. माह (हुः) श्रुतय इति संशयं न स्यात्।
उत्तरत्राप्येवमपि संदिश्यते "अन्नं
ब्रह्म — मनो ब्रह्म विज्ञानं ब्रह्म आदित्यो
ब्रह्म नारायणः (ण) परं ब्रह्म" इत्यादयो

यो रमन्यमर्थं ब्रह्मेत्याहुः। तत्र तत्र
किंवा ब्रह्मेति, अतो बहुधा सन्दिग्धं ब्रह्म विचारा
र्हं भवति। तत (तः) श्रवण मननादि नि
श्चितर्थ भक्तिज्ञान विशेषाद्धि मुख्यस्य
परमकारुणिकस्य महादेशिकस्य
स ________ कस्य शिवस्य परब्रह्मणः
प्रसादात्ति शयेनास्याद्धे कारिणा (नः)
प्रध्वस्त पाशपटला प्रत्यक्षीभूत निरति
शयज्ञानानन्द भाजनात्त स्वरूपा त्त.
त्समानगुणसारा कैवल्य लक्ष्मीः प्रयोज
नञ्च भवति। ततस्स विषयं सप्रयोजनं
च वेदान्त श्रवणं। यदुक्तं ज्ञेयपरिच्छेद रूपत्वा
द्धि ज्ञानस्य परिच्छिन्नं ब्रह्म विषयं न भव
तीति तद्विचार विलसितं। लक्षण परि
च्छेदो हि लक्ष्य विषयं ज्ञानं - उद्दिष्टस्य
ब्रह्मणो लक्षणे वेदीतवाक्यै निरूपिते

परीक्षितेय लक्षणशून्यानां सजातीय बिजातीयानां तदितर सकलपदार्थानां व्यावृत्तरूपं यत् तद्ब्रह्मेति बि ज्ञायते। तत स्समीचीनोऽयं ब्रह्म बिषय शास्त्र बिचारा(र)म्भ (म्भः)। यद सिन्दीयं प्रयोजन (स्य) तन्न प्रेक्षावतां बिचारकक्ष्यामारोहतीति वेदांतशास्त्र बिचारस्य प्रमाण

६.४. युक्त्याभास प्रतिभासवशात्सन्देहास्पदं ब्रह्म बिषयो भवति ॥ "ब्रह्मबिदाप्नोति परं" "ज्ञात्वा शिवं शान्तिमत्यन्तमेति" इशं ज्ञान ——— (भवति) "तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशं" "आत्मानमरणिं कृत्वा प्रणवञ्चा (ञ्चो) त्तरारणिं। ध्यान निर्मथ (थ) नादेव पाशं दहति पण्डितः॥" "ज्ञात्वा देवं मुच्यते सर्वपाशैः" इत्यादि श्रु

। त्यभिप्रायेण तस्य ज्ञानोपासनेनास्याधिकारि

णः पाशविच्छेदलक्षणामुक्तेः प्रयोजनस्य भवतीति प्रथमाधिकरणेऽत्र प्रतिपादितं। ॥~~इति जिज्ञासाधिकरणम्~~॥

इहोद्दिष्टस्य ब्रह्मणो यान्ने स्यायकं तल्लक्षणं किमित्याकाङ्क्षायां तल्लक्षणाभिधायि द्वितीयाधिकरणं सूत्रमवतारयति भगवान् सूत्रकारः ॥

॥ जन्माद्यस्य यतः ॥

ज्ञाते लक्ष्ये लक्षणस्य वैयथ्यात् (वैयर्थ्यात्) अज्ञाते तदाकांक्षानुपपत्तेः कथमत (त्र) ब्रह्मणो लक्षणकथनप्रसङ्गः इति नशङ्कनीयं। अध्ययनादापातज्ञाते ब्रह्म हि तद्योगात्। जन्माद्यस्य यत इति सूत्रपदव्यवच्छेदः। जन्मादिकं - जन्मास्ति पठ्य से (तिसे) भावानुकाहरूपं कृत्यमस्य चेतनाचेतन सम्मेळन समरसी

भूतस्य प्रपञ्च विलासस्य "यतो यस्मात्
संभवति तत् ब्रह्मेति शोषः "यतो वा इमा
६. 13. नि भूतानि जायन्ते येन जातानि जीवन्ति ·
"यत्प्रयन्त्यभिसं विजिज्ञासस्व तद्ब्रह्मेति"
"सत्यं ज्ञानमनन्तं ब्रह्म" "सं(स) देव सौ
म्येदमग्र आसीत्" "एकमेवाद्वितीयं ब्रह्म"
ऋतं सत्यं परं (रं) ब्रं (ब्र)ह्म पुरुषं कृष्ण
पिङ्गलं ऊर्ध्वरेतं विरूपाक्षं" इत्यादि -
उपत्त ग(ज)गतो जन्मादिकं ब्रह्मणि ल
क्षणतया संभवति नवेति सन्देहः - ज
गतो जन्मादिकं ब्रह्मणो लक्षणं न संभवति ·
संबन्धाभावात् । कं (किं) च 'आनन्दो
ब्रह्मेति व्यज(जा)नादित्यतानन्दस्य ज
गज्जन्मादिलक्षणं पर्यवस्यति इति -
उपन्यत्त सं(स) देव सौ(सो)म्येदमग्र
आसीदिति सतो जगत्कारणत्वमवगम्यते

सत्यं ज्ञानमनन्तं ब्रह्मेति ज्ञानमेवापरिच्छिन्नं
ब्रह्मेत्येकत्र विज्ञायते। अन्यत्र 'यदा तम
स्तं न (स्तन्न) दिवा न रात्रिं न सन्न चास
च्छिव एव केवल इति शिवशब्दवाच्य
पदार्थ कारणत्वेन सकल पूर्व भागीत्वा
त् ब्रह्मेति विज्ञायते। (श्रु) पुत्तानन्दादीनां
ब्रह्मत्वे विकल्पोवा समुच्चयोवा। विकल्प
(ल्पे) श्रुत भाना (हाना) दि दोषसङ्गः।
×व्यवस्थित विकल्पे श्रुतभाना (हाना) दि
दोषप्रसङ्गः। व्यवस्थित विकल्पे ति (ऽपि)
ब्रह्मानेक — श्रुतिप्रसङ्गः। समुच्च
य उपाक्षिपि तेषां धर्मरूपित्वा
त् निखिल जगन्निर्माणोपाय ज्ञान
विशेषाविशिष्ट ब्रह्मत्वासंभवः। अपिच-
6. A. "मायां तु प्रकृतिं विद्यादिति" श्रुतिः-
मायाया अचेतनाया जगत्कारणत्वमभि·

ध्यते। तदेव युक्तं। ब्रह्मणो ज्ञानरूपस्य ज
गत्कारणत्वे तस्य विकारापत्त्या(त्त्या)
"निष्कलं(लं) निष्क्रियं शान्तं" इत्यादि श्रु
तिभङ्गः प्रसंगः। अतो बहुधाऽपि ब्रह्मणो
जगत्कारणत्वादि लक्षण मभिधातु मशक्
यमित्येव मादौ पूर्वपक्ष विक्षेप(पे)
प्राप्ते क्रमः॥ यद्यपि जन्मादे ज(र्ज)
गान्निष्पन्नत्वेन ब्रह्मण्यसंबन्धः तथा
पि ताटस्थ्येन लक्षणत्व योगः। य
त्र सर्वज्ञत्वादि विशिष्ट मप्रविधान
ष्ठिकरणं। शिवतत्वं तदेव जगत्कारणं
ब्रह्मेत्युच्यते। आनन्दादीनामत्रैव
धर्मिणां पर्यवसानं भवति॥ सर्वज्ञत्वं
नित्यतृप्तत्वं अनादिबोधत्वं स्वतन्त्र
सिद्धत्वं अलुप्त शक्तिमत्वं अनन्त श
क्तित्वं चेति तानि सर्वज्ञातादीनितु

नित्यापरोक्षः स्वयंप्रकाश निरपेक्षस्य वाह्य
करण निष्कलङ्क ज्ञानानुभव निखिल विष
य वस्तुत्वमिह सर्वज्ञत्वं। "यः सर्वज्ञः सर्व-
यस्य ज्ञानमयं तपः" इत्यादि श्रुतिभिरिदं ब्र
ह्मणस्सिद्धं॥ अनेन सकल चेतन बहुविध क
र्मफल भोगानुकूल तच्छरीर निर्माणोपाय
सामग्री विशेषज्ञं ब्रह्म निमित्तं भवति॥ नि
रस्त समस्तोपप्लव कलङ्क निरतिशयानन्द
परिपूर्णत्वमिह नित्यतृप्तत्वं। अतएव आ
नन्दो ब्रह्मेति श्रूयते। यस्त्वन्योन्तर आ
6 13. त्मा आनन्दमय इति प्रस्तुतस्यैवान
न्दस्य मीमांसा भवतीत्यारभ्य सा निर
तिशय शिरस्कत्वे सप्रकोब्रह्मण आनन्द
इति निरूपितः। परब्रह्म "सत्यात्म प्राणा
रामं मन आनन्दं" शान्तिसमृद्ध
ममृतं" इति आकाश इत्या

काशः- प्राकाशिदंक रूच्यते । न
भूताकाशः । तत्र विशेषाभावात् ।
निखिलजगदण्डपण्डकुड्ढदनिकु
रुम्बजलाधिस्थानीया परप्रकृति
रूपा परमशक्तिश्चिदंबरमुच्यते । त
त्त [illegible] त्स्वरूपं कहेत्याकाशशरी
रं परप्रकृतित्वं चिदाकाशस्य सर्वा
णि भ(ह) वा इमानि भूतानि आकाशे
(शा) देव समुत्पद्यन्ते आकाशंप्रत्य
स्तं यन्ति । आकाशो (शो) ह
वै नामरूपयो र्निर्विहिता इत्यादि
श्रुतिसिद्धं (द्धं) सत्यात्म सत्तारूपं
प्राणारामं प्राणः सकलाधारस्सा
भूता चिदंबरशक्तिरुच्यते । स्वरूपभूता
यां तस्यां आरामो यस्य तमत् (तत्)
प्राणारामं- मन आनन्दं मनस्यानन्दो

यस्य र वाह्यकरणे तन्मन आनन्दं।
अताप्यानन्द इति चिदम्बर प्रकृतिरुच्य
ते। तथाच श्रूयते "यदेष आकाश आ
नन्दो नस्यात् कोह्येवान्यात् कः प्राण्या
दिति। शान्ते समृद्धं शिवता सम्पन्नं।
अमृतं अनादिमुक्तं सच्चिदानन्द~~स्वरूप~~प
राकाश रूपं ब्रह्मस्वरूपानुरूपानन्दं
मनसैनु (वानु) भवति वाह्यकरण नि
रपेक्ष इति सिद्धं मन आनन्दमित्यने
८ A. न। इदमेव ज्ञापकं ब्रह्मभावमुपपन्नानी
मुक्तानुना निरतिशय स्वरूपानन्दानु
भवसा धनं वाह्यकरण निरपेक्षम
न्तःकरण मस्तीति। अतो वाह्यकरण नि
रपेक्षण शुद्धबोध शक्त (क्ति) रूपेण म
नसा स्वरूपानन्दमानन्दं तमनुभवव द्
मे नित्यतृप्तं। नतस्य कदाचन वाह्य-

सोपाधिकसुखत्वापेक्षा भवतीत्यर्थः। -
स्वतस्सिद्धं निरतिशयज्ञानवत्वं अनादि
बोधत्वं. यत्स्वरूपानन्दानुभवसाधनम
न्तःकरणं ज्ञानं तदनादिसिद्धमेव. अतोऽ
नाति(दि)बोधं ब्रह्म संसारनिवर्तकस्य
ज्ञानस्यानादिसिद्धत्वात् नित्यनिवृत्तसं
सारदोषं ^परमशांतिसमृद्धममृतं इति श्रूय
ते। अन्यस्योपयता कार्पण्यरहितत्वेन, स्व
वशीकृतस्वेतर^सकलवस्तुत्वं स्वतन्त्रत्वं ज्ञा
तज्ञौ द्वौ विशानिशौ भोक्ताभोक्तं प्रेरि
तारञ्च मत्वा विद्यातिद्ये ईशते यस्तु
सोऽन्य" इत्यादिभिर्ब्रह्मणो जडाजडप्र
पञ्चप्रेरकत्वेन स्वतन्त्रत्वं सिद्धं। सर्ववि
षयस्वातन्त्र्येण ब्रह्मणस्सर्वकर्तृत्वसिद्धिः।
स्वाभाविकशक्तिमत्त्वमलुप्तशक्ति -
तथाहि श्रावणं "पराऽस्य शक्तिर्वि(र्वि)

८ 13. विधैव श्रूयते स्वाभाविकी ज्ञानबलक्रि
याचेत्यादि-चिदाचित्प्रपञ्चरूप शक्ति
विशिष्टत्वं स्वाभाविकमेव ब्रह्मणः कदाचि
दपि नाति विशेषत्व मित्यनेन सिद्धं। अप
परिच्छिन्न शक्तिविशिष्टत्वमनन्ताभिरेव
शक्तिभि र्जगतो जनकं शासकंच ब्रह्मभव
ति। तथा हि श्रूयते। एकएवरुद्रो नद्वितीया
याय तस्थे य इमां लोकानीशान ईशनी
भिः निजाभिः परमशक्तिभिरित्यादि।
अनन्तशक्तिमत्वा ब्रह्मणोऽपरिच्छिन्न परिच्छि
न्न प्रपञ्च समवायिकारणत्वं सिद्ध्यति।
अष्टाभिध्यानादिकरणं इति भावः
शर्वेशानपशुपति रु (रु) द्रो ग्र भि(भी)
म महादेवाभिधानाष्टकस्याधिकरण
(णं) वाच्यं परंब्रह्म। अस्य सकलशब्द
वाच्यतेऽपि परमार्थबोधकत्वेन मुख्यत

या. भवादि शब्दाभिधेयत्वेन नातिप्रस
ङ्गः। सर्वत्र सदा भवतीति भवशब्द
वाच्यं ब्रह्म। भूयातोस्सकार्यत्वात्
सर्वत्रानुवर्तमानं सद्रूपं ब्रह्मेति विज्ञाय
ते। तथाहि श्रुतिः "सदेव सौ(सो)म्ये
दमग्र आसीत्" "एकमेवाद्वितीयं" "स
त्यं ज्ञानमनन्तं ब्रह्म" सत्यात्म प्राणारामं
मन आनन्दं समहाद्वित्यादि। सन्घ
टः सन्पट इति सर्ववस्तुष्वनुप्रत्या
सद्रूपस्य ब्रह्मणः सर्वोपादानं सिद्ध्य
ति। मु(मृ)दा रूपे घटादिक मत्र रुपादान
C. A. मिष्यते। ततस्सद्रूपं ब्रह्म भवशब्द
वाच्यं भवति। स(शा) र्व शब्देन
रुतमसायामिति या त्वर्थ वशात् सक
लसंहर्तृ ब्रह्म प्रतिपाद्यते। तस्मात्
"सर्वस्य सं हर्ते(र्त्रे) महाग्रासाय वैनमः"

"यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः"
इत्यादि मि स्सर्व संहर्तृ ब्रह्म श्रूयते।
निरुपाधिक परमैश्वर्य विशेषत्वादीशा
नशब्दा (ब्द) वाच्यं ब्रह्म। "इमांलोका
नीशत ई शो (श) नीभि रिति श्रवणात्।
ईश्वरस्ये सि (हि) तव्यापेक्ष या (तया)
पशुपति शब्द वाच्यं ब्रह्म। तथाहि श्रू
यते। 'एषामीशो पशुपतिः पशूनांचतु
ष्पदामुतच द्विपदा मित्यादि। पाशसं
बन्धेन पशुत्व व्यवहारात् पशुग्रहणा
त् पशुपाशद्वयंच गृहीतं भवति। अ
नेन चिदचिन्नीयामकं ब्रह्मेति विज्ञायते॥
स्हररु द्रावकत्वात् रुद्रशब्दवाच्यं
ब्रह्म। "तरति शोकमात्म व (वि) दिति
श्रवणात्॥ परतेजोभिर नाभि भवनी
यत्वात् उग्रशब्दवाच्यत्वं ब्रह्मणः। 'नत

न सूर्यो भवति (भाति) न चन्द्रमा (न्द्रतार-
कम्) इति श्रावणात्। नियामकतया
निखिलत्वेन भयहेतुकतया भीमशब्दाभिधेयं प्र
सेः। "भीषास्माद्वातः पवते" इत्यादिश्रु
तेः। महत्वेन दीप्यमानतया महादे
व इत्युच्यते शिवः। तथाच श्रोरास
"अथ कस्मादुच्यते महादेवः य——
नभावात् परित्यज्य आत्मज्ञानयो
गैश्वर्ये महीयते तस्मादुच्यते महादेव
इति" निरस्त कलङ्कतया निखिल
१३ मङ्गलसारतया शिवतत्व मेयदेव
गम्यते तदुक्तं स्वभावतया सकल
जगज्जन्मादि कारणं संभवति। त
त तादृश महिम्नि जगदुभय कारणत्व
संभवात्। तदेतादृश महत्वात् ब्रह्मे
त्युच्यते। तदेव शिव शब्दवाच्यं अान

न्दाभिधमाह्नयतया सिद्धं । अत आ
नन्दादीनां म विकल्पाचेन्ता । निर
र्णिका ॥ 'मायीतु प्रकृतिं विद्या दिति
मायायाः प्रकृतित्व ई (मी) श्वरात्मिका
याएव '' मायेर (नं) तु महेश्वरमिति
शेषात् । सूक्ष्मचिदचिद्विशिष्टं ब्रह्मका
रणं स्थूल वि— — द्विशिष्टं तत्कार्यं
भवति । मते — — — जन्मादि लक्ष
णं ब्रह्मेति सिद्धान्तः प्राप्तः ॥

~~इति~~

~~॥जन्माद्यधिकरणम्॥~~

=

लक्षण प्रमाणाभ्यां विना हि (हि) वस्तु
सिद्धिः । जगत्कारणं ब्रह्म किं प्रमाण
(न्रकं) मित्यत आह—

॥सू०॥ शास्त्रयोनित्वात् ॥

शास्त्रं — — प्रमाणं। भूतत्व
जगज्जन्मादिलक्षणं ब्रह्म भवतीति शे
षः। अत जगत्कारणं ब्रह्म शास्त्रैक
गम्यं उत प्रमाणान्तरेणापि गम्यते इति
सन्देहः। जगदिदं सावयवं कार्यमे
व। तच्च चैतनेत्य गतिरिथतित्वेन सचे
तचेतकर्तृकं। कर्ताच कश्चित्कल्पनीयः
सर्वज्ञत्वादिमान् सौ शास्त्रैकगम्यः
शास्त्रस्य प्रमाणान्तराप्राप्तविषय
त्वात्। अतः शास्त्रैकगम्यत्वं जग
त्कारणस्य न संभवतीति प्रत्यक्ष
— — — स्तु जगत्कारणं ब्रह्म वेदा
न्त शास्त्रैकं भवति। "न वेदविन्म
नुते तं बृहन्तं" इत्यादिषु वेदशास्त्र
10 A. मन्तरेण ब्रह्मणो बोधासंभवश्रव
णात्। यदुक्तं सावयत्वात् कार्य — — —

प्रपञ्चस्य कर्ता समुचितः कल्पयप्रक इति। तदसत्। विचित्ररचनस्य रथगोपुरप्रासादादेर्बहु(र्व)हुकर्तृ(क)त्वदर्शनात्। नानुमानेन एककर्तृ(क)त्वसिद्धिः। व्याप्तिबलेन तस्य कर्मत्वस्य — — प्पन्नत्वात्। हेतोश्च पक्ष समतान्तदनुमानेन जगतो विलक्षणैककर्तृ(क)त्वसिद्धेऽपि निमित्तोपादानशक्तियुक्तैककर्तृ(क)त्वसिद्धिर्नास्ति। ततो वेदान्तशास्त्रोक — — — कर्त्रेति सिद्धं॥ अपि च पूर्वाधिकरणप्रतिपादितजगत्कारणत्वोपयोगि सर्वत्वं ब्रह्मणोऽस्मिन्नधिकरणे शास्त्राणां वेदानां योनित्वाकारणत्वात्। सिद्ध्यतीति — — — — इति केचिदाहुः॥ तदिह सूत्रस्य सूचनात्मकस्यार्थ त्व(द्व)या

भिधाने वाक्यद्वाक्यभेदादि दोषा
भावात् पुनरधिकरणान्तरप्रस्तावः॥
"अस्य महतो भूतस्य श्व(सने स)सि
त - - - - यजुर्वेदः सामवेदः"
इत्यादि श्रूयते विषयः-। ब्रह्मणो वे
दकर्तृत्वं युक्तं नवेति सन्देहः। न युक्त
मिति पूर्वः पक्षः॥ वाचा विरूप नि विरूप
त्ययेत्यादि वेदनित्यार्थ प्रतिपादिका
- - - प्रतिपादिकायाः(याः) श्रुते
र्विरोधात्। अन्यथा वेदानां ब्रह्मका
र्यत्वे पौरुषेयत्वादप्रामाण्य प्रसङ्गः। त
स्माद्ब्रह्मणो वेदकर्तृता कल्प्यमिति प्राप्ते
ब्रूमः॥ युक्तमेव ब्रह्मणो वेदकर्तृ
१० B. - - - महतो भूतस्य निःश्वसितमे
तदृग्वेदो यजुर्वेदः सामवेदः इति श्रु
तेः निश्वसितवद्वेदराशौ न(र)प्रय

त्वेन ब्रह्मणः प्रादुर्भावावगमात्।। अप्र
प्य्पादयानामेतासां (जि(वि) द्यानां भि
न्नवर्त्मनां। आदिक — — — र्त्तः पर
मेश्वरः। अत एव वेदानां पौरुषेयत्वं
ईश्वरकार्यत्वं च। येषां रागद्वेषादयः
तेषां वचनं प्रमाणं। निरस्तसमस्तदोष
कळङ्कस्य निरुपप्लव निरस्त निरतिशय
ज्ञान प्रत्यक्षानुभूय (मान) त्रैकाले
क वस्तु विलासस्य स्वतः प्रमाण्य(ण्)
स्य परत्वेमे परमेश्वरस्य परमा
त्मप्र[illegible] स्यावाप्त समस्तकामस्य शि
वस्य ब्रह्मणो वचनं प्रमाणमेव। "ईशा
नस्सर्वविद्यानां" सनोदेव शुभ (या)
स्मृत्या संयुनक्ति...... परमेश्वरस्य
सर्वविद्या वर्तत्वं शुभस्मृति हेतुत्वं च श्रू
यते। सर्ववस्तु स्तव भाजसकानां

वेदानां परमकर्तृतया परमेश्वरस्य स
र्वज्ञता निर्णीयते। - - - नहु, वकाश,व
त्वात्यपि सर्वगतस्य परमेश्वरस्य स
र्ववस्तुसंयोगेन सर्वज्ञत्वं सिध्यते (ते)
तथापि सकलवस्त्ववभासकानां वेदानां
प्रणेतृ (तृ) ता विशेषं दर्शयति। यथा
दीपप्रभा संयुक्तेष्वपि रूपादिषु
रूपमेव प्रकाशयति न रसा दि तथा
न परमेश्वरः किन्तु स (स्व) शक्तिसंयुक्तं
सकलं च प्रकाशयतीति। ननु परमेश्व
रस्य सर्वज्ञत्वं नाम वेदोक्तसकलपदा
र्थाभिज्ञत्वं। ततो महर्षीणामपि वेदार्थ
वेदिनां सर्वज्ञत्वं सिद्धं। किमतावैधर्म्यं
११.A. न तत्कर्तुरीश्वरस्याधिकं ज्ञानमस्ति।
व्याकरणादेराधिकार्थविदां हि पाणिनि
प्रभृतीनां प्रणेतृ (तृ) त्व (त्वं) दृश्यते

वेदस्य सर्वार्थप्रकाशकत्वेऽपि न सर्वं मुख्यतः प्रकाशयति। किंतु किमपि लक्षणया किमपि सामान्येन किमपि विशेषणेन परमेश्वरः सर्वसाक्षी सर्वं प्रत्यक्षयति,.. वेदेश्वरयोरप्येतावद्वैषम्यमिष्यते। ननु परमेश्वरस्यैव वेदकर्तृत्वमिति न नियमः।..''इदं सर्वमसृजत ऋचो यजूंषि सामानीत्यादिश्रवणात् हिरण्यगर्भादेरपि कर्तृत्वावगमादिति चेन्न। हिरण्यगर्भोत्पत्तेः प्रागपि वेदानां सत्त्वश्रवणात्। श्रूयते हि- ''यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा-इति यस्सर्वं वेदा(देवा)नामादिमस्यापि हिरण्यगर्भस्यापि कर्ता तस्मै सर्वान् वेदानुपदिशति स एव सर्वाप्तिको वेदकर्ता परमदेशिकः। तथा हि श्रुत्याभिव्य

ज्यते - यो देवानां प्रथमं पुरस्ताद्विश्वा(श्वा)
धिको रुद्रो महर्षिः, हिरण्यगर्भं पश्यत
जायमानं स नो देवः शुभया स्मृत्या संयु
नक्तीति" महर्षिर्वे(र्वे)दकर्त्ता सर्वज्ञा
दिना विश्वस्माद्वि(च्चि)दचित्प्रपञ्चा
त् आधिको रुद्रः परब्रह्मभूतस्सर्वे
षां देवानां इन्द्रादीनां प्रथ(थ)ममा
दि हि(दिमं हि)रण्यगर्भं ब्रह्माणं स्व
सङ्कल्पेन प्रकृतिरूपादात्मनो जा
यमानं सृष्टिकाले सर्वज्ञानोपाय स
कलवेदोपदेशरूपयानुग्रहदृष्ट्या प
श्यन्(न्) स देव परमदेशिकोऽस्मान
११-१३ पि सकलसंसार पाश हेतार्थ निवृत्ति
हेतुभूतया परमात्मनो लक्ष्मी सम्भावे
श परानन्द प्राप्तिकारिण्यां तथैव परम
मङ्गलरूपया वेदान्तसार सामरण्य(स्य)

सिद्ध्या स्मृत्या वो[illegible]य कलया [illegible]स्व
विषयया संयोजयत्वीति तात्पर्यं॥ ततस्स
कल वेदकर्तृत्व मीश्वरस्य सिद्धम्॥ वा
चा (चो) नित्यत्वं श्रुति रीश्वरेण पूर्वस
त्तानुवृत्त्या लि (वि) हितत्वात् वेदानाम
विरुद्धा। ततो वेदाना मीश्वर प्रणीतत्वं नि
त्यत्वञ्चा विरुद्धमेव॥

~~इति~~

॥ शास्त्रयोनित्वाधिकरणम्॥

॥ अथ समन्वयाधिकरणम्॥

प्रथमाधिकरणे जिज्ञास्यतया प्रतिज्ञा
तस्य परब्रह्मणः शिवस्य परिज्ञाने लक्षणा
पेक्षाया (यां) द्वितीयाधिकरणेन लक्षण
(णं) जगज्जन्मादिरूप - - - - - - किं प्रमा
णमित्याकांक्षायां तृतीयाधिकरणेन वेदी

तच्छास्त्रस्य तद्विषये यत्प्रामाण्यं तन्मूल
त्वं (त्वं) चाति रूपितं॥ येन यद्रूप्यम्भि
-चारेण सिध्यति तद्धि तस्य प्रमाणमुच्य
ते। वेदान्तवाक्यानां केन रूपेण ब्रह्म
साधकत्व मित्याकांक्षायां -चतुर्थाधिक
रणसूत्र मवतार्यते॥

(सू०)॥ तत्त (त्तु) समन्वयात् -॥

तच्छब्देन प्रकृतं ब्रह्म परामृश्य
ते, तु शब्देन सर्वाणि वेदान्तवाक्यानि
समाह्रियन्ते। समन्वय शब्देन तात्पर्ये
ण संबन्ध उच्यते। तद्ब्रह्म वेदान्तवा
क्यानि तात्पर्यलिङ्ग संबन्धात् -
साधयन्तीति सूत्रार्थः। अस्य सर्वा
णि वेदांत वाक्यानि विषयः वेदान्तवा
क्यानां ब्रह्मबोधकत्वं युक्तमुवेति सं
१२(अ) शयः। सर्वत्र संबन्ध ग्रहण सापेक्षे

हि शब्दार्थयो रवबोधार्र तस्य कार्या
र्थ एव न सिद्धं सङ्ख विषयः। शब्दार्थ
योस्संबन्धज्ञानमन्तरेण पुरुषस्य शब्दा
र्थप्रत्ययो न भवति। संबन्धज्ञानञ्च
वृद्धव्यवहारसापेक्षं - व्यवहारश्च कार्यैक
गोचरः। तथाहि- गामानय गां बध्राने
ति वृद्धवाक्य श्रवण समनन्तरं प्रवर्तमा
नं प्रयोज्य मवगमन स्या व्युत्पित्सुरे
वमव धारयति- सर्वदाऽयं कार्यवगा
ति समनन्तरमेव प्रवर्तते। अन्यथा-क
थमस्यं चेत द्वाक्य श्रावणसमनन्तरं प्रवृ
त्तिर्भवति। ततादिद वाक्यमस्य का---
मुत्पादयतीति पुनर्गवानयन स्मकद
र्शनात् कार्यविशेषं निश्चिनोति। तदेवं
कार्यार्थत्वात् व्युत्पत्ते र्न सिद्धे वस्तुनि श
ब्दस्य प्रामाण्यं- किंच कार्य विशेषत्वात् -

जगतः कर्तृ — पस्य ब्रह्मणोनुमानादवि
सिद्धेः कथमस्मिन् प्राप्त विषयाणि वे
दान्त वाक्यानां प्रामाण्यं अथवा विधि
पराण्येव वेदांत वाक्यत्वानि न ब्रह्मपराणि
उभयपरत्वे प — द स्यात् अतो वेदांतवा
क्यानां नब्रह्मसाधकत्वं युक्तं इति पूर्वः
पक्षः युक्तमिति सिद्धांतः। वेदान्तवाक्या
नां तात्पर्य लिङ्ग समन्वयत्वेन ब्रह्मबोधन
समर्थत्वात् यदुक्त — यावदेव व्युत्पत्ते(त्ते)
र्न सिद्धे ब्रह्मणि शब्दस्य प्रामाण्यमिति
तदसत् — पुत्रस्ते जात इत्यादिषु सिद्धा
र्थेषु वाक्येषु निक्षिपेनोति संबन्धग्रहणं
१२B संबंध ग्रहणयोगा द्व्यवहारेपि व्युत्पर
स्वस्य प्रवृत्तिहेतुभूतायाः कार्यवि
रतेः पदार्थानां नपूर्वत्वावगमात् प्रयोज्य
वृद्धस्य प्रयोजकवाक्यं पदार्थ — —

— — — याति निश्चिनोति ततस्सिद्धार्थे
ऽपि शब्दस्याभिधान निश्चयः। अथवा
सिद्धमिह वृद्धव्यवहारेण व्युत्पत्ते प्रकारांत
रेणापि सिद्धत्वाच्छब्दार्थसंबन्धग्र
हणस्य· तथाहि बालामातातादिभिः श
शिपशुप्रभृति नर्थां निर्दिश्य पुनमेवमव
गच्छेत्याभिप्राया दंगुल्यादिना निर्दिश्य
तत् शब्दांस्तेषु प्रयुञ्जाने बहुशः शि
क्षिताः काव्यनाटकाभिज्ञाः पुरुषसमीप
मेत्य पदविच्छेदं कृत्वा अस्य शब्दस्यायम
र्थ इति सर्वशब्दानामर्थमवगच्छन्ति। अ
तः सिद्धार्थेऽपि व्युत्पत्ति संभवात् तत्तशब्द
स्य प्रामाण्यमस्ति ततो वेदांतवाक्यानां ब्रह्म
णि प्रामाण्यं। यदुक्तं जगतः कार्यविशेषत्वा
त् कर्तृविशेषस्य ब्रह्मणो नुमानादपि सिद्धि
रिति तं न संभवति विचित्ररचनस्य र

च प्रासादादेरनेककर्तृत्वदर्शनात् अनुमाना
देस्य जातः एककर्तृत्वसाधनायोगात्, व्याप्तिबलात् क
र्मफलप्रदत्वादीनां कर्तरि प्राप्तेः पूर्वोक्ततया-
-नुमानगम्यं ब्रह्म भवति। किञ्च श्रुतानुगुणा
दनुमानमपि ब्रह्मणि प्रमाणं भवतु नाम। यद्
वाक्यानां तात्पर्यं. तत्र हि तेषां प्रामाण्यं
न प्रत्यक्षादीनामेव सर्वत्र। न हि वेदान्तवा
क्यानां ब्रह्मणि तात्पर्यनिर्णये कानि
१२४. साधकानि लिङ्गानीति चेत् तथा पठन्ति
उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये" इ-
ति। तदिहोपक्रमादिभिर्लिङ्गैः वेदान्तवा
क्यानां हि ब्रह्मणि तात्पर्यं निश्चीयते। यदु
पक्रमादिभिस्तात्पर्यनिर्णयः तदेव वेदान्त
वाक्यानां श्रवणमित्युच्यते. तथाहि उ
च्यते। "अज्ञानप्रभवं दुःखं ज्ञानं तस्य निव

तिकं। सर्ववेदान्तवाक्यानां श्रावणं तत्प्रवर्तकं॥ श्रावणं नाम वाक्यानां श्रावणं तत्प्रवर्तकं, श्रवणं नाम वाक्यानां वैदिकानां परात्परे। उपक्रमादिभिर्लिङ्गैः शिवे तात्पर्यनिर्णयः॥" इति उपक्रमोपसंहारादिकलिङ्गैः वेदांतवाक्यानां ब्रह्मणि शिवे तात्पर्यनिर्णय इति - यत्तत्तात्पर्यं नाम तत्स्वरूपोपासनाविषयत्वं उपक्रमोपसंहारौ सदेव सौम्येदमग्र आसीदित्युपक्रमे तत्वमसीत्युपसंहारः " धातुः प्रसादान्महिमानमीशमित्युपक्रमे यः परः स महेश्वरः। एवमन्यत्रापि दृष्टव्यं तत्वमसि सर्वो वै रुद्रः अंबिकापतये उमापतये" यो वै रुद्रः स भगवान् भूर्भुवः सुव इत्यभ्यासः - अपूर्वता वेदेतरप्रमाणाप्राप्तत्वं फलं ज्ञानं उपर्थवादः जगत्सृष्टेरस्योति प्रध्वंसादयः

उपपत्तेः विरोधाभावः सर्वज्ञतादि संपत्ति
र्वा। एतैर्लिङ्गैः ब्रह्मणि तात्पर्यमवगन्तव्यं
वेदान्तवाक्यानां। ननु ब्रह्मपरा वेदान्ताः किं
९३.13. आत्मा वा अरे द्रष्टव्य इत्यादिषु दर्शना
दिविधिपरा विज्ञायन्ते. उभयपरत्वे वाक्य
भेदप्रसङ्ग इति यदुक्तं तन्न रूपप्रत्याय
कत्वेन चक्षुषा.. यथा विधिपरैरपि वेदान्तै
र्ब्रह्मसिद्धिरिति नोभयपरत्वे. विरो
धपरत्वे विरोधःसिद्धः. शब्दे हि ब्रह्म
ज्ञानं तद्ब्रह्मवाचि शब्दादेव प्राप्तं भवति
तद्विधीनां किं प्रयोजनमिति चेत् प्राप्तस्या
पि मन्त्रादिष्विव विधेरविरोधः प्रयोजन
स्यानुष्ठानादेरसंभवात्. यथा द्रव्यदेव
देवतादिप्रकाशकेषु मन्त्रेष्वधीयमानेषु
द्रव्यादिज्ञानं जातेऽपि पुनरनुष्ठानकाले
मन्त्रैरनुस्मर्तव्यमिति प्रयोग विधिरूप

लभ्यते तथापीति- नचोत्पत्तिनियो
गाधिकारि विधिना मसंभवात् प्रयोगवि
धयसंभव इति शंकनीयं उत्पत्तिविधेरध्या
हारेणापि सिद्धौ प्रकरणवशात् शमादिकं
विनियोजयन्नात्मानं पश्येदिति प्रयोगविधि
रुपपद्यते तुल्य शास्तिसत्तन्यायेन ज्ञानादेर
मुच्यते सर्वपाप्नो रित्या दर्थवादावगत
मोक्षकामोऽधिकारि कल्पनीयो भवति ततो
मोक्षकामः शमादियुक्तो ब्रह्मज्ञानं संपादये
दिति प्रयोगलाभः। ननु ब्रह्मज्ञानस्य विधेय
त्वमनुपपन्नं आत्मा पट रे इत्यादौनि दृश्य
त्ये व्यापिनि निर्विकारे विशुद्धे चात्मनि न
कर्मकारको युज्यते येनानिधिसंभवः। उ
त्पत्ति विका... संस्काराणां अत्तासंभवात्। न
१४:A) चस्वतन्त्तफलाय सत्तुन्यायेन कर्मकारक
तां परित्यज्य करणत्व विपरिमाणेन आत्म

नापश्येदिति विधातुं शक्यं वैषम्यात् । तथा हि क्रियाकृतातिशयस्य .. संभवलक्षणस्य सक्तुषु संभवात् तेषु शब्दतः करणत्वेऽपि अर्थतः कर्मत्वमेव पर्यवसितं तथात्वात्मनि न संभवः अतश्चापि वेदांतानां ब्रह्मज्ञानविधिपरत्वमिति चेन्न । आत्मनेः कर्मत्वप्रयुक्तोत्पत्त्याद्यभावेऽपि कर्तृत्वस्य मोक्षफलाय विध्युपपत्तेः प्राप्ते कथं विधिरिति चेत् प्राप्तेश्च पाक्षिकी वा नित्या वा - उभयथापि नियमादिविधेरसंभवात् ॥ ननु तथापि वेदान्तानां विधिपरत्वेन ब्रह्मपरत्वमनुपरत्वमनुपपन्नमेव । यदुक्तं रूपप्रत्यायकेन चक्षुषा द्रव्यसिद्धिवद्विधिपरैरपि वेदान्तवाक्यैर्ब्रह्मसिद्धिरिति । तदयुक्तं चक्षुर्हि संप्रयोगानिरपेक्षमेव प्रतिवस्तु प्रमाणं न तथा शब्दः -

किंतु यत्तु तात्पर्यं तत्त प्रमाणं तस्माद्वेदान्तानां ब्रह्मप्रमापकत्वं ब्रह्मज्ञान विधायकत्वं च भवतीति चेन्न- सामिध्योयजतीत्यादीनां वाक्यानां पंचप्रयाज विधायकत्वं चेत्युभय परत्वदर्शनादेतद्वाक्यानामपि ब्रह्मरूप प्रमापकत्वं ब्रह्म ज्ञानं मोक्षोपकारकं प्रति विधायकत्वं युक्तमेव॥ ननु ब्रह्मणे वाक्यादेव ज्ञातेऽपि तज्ज्ञान विधेः किं प्रयोज
१४.३ न इति चेन्न। वाक्येन परोक्ष.. ध्यात्वामाम नुगच्छति भूतयोनिं समस्त साक्षिं तमसे परस्तात्. ज्ञान निर्मथनादेव पाशं दहति पण्डितः इत्यादिषु तावदेवं मुच्यते सर्वपाशैर्ज्ञात्वा शोरिति शिवं ज्ञात्वाऽमृता भवन्तीत्यादिषु च ब्रह्म साक्षात्कारानिमित्तं। तथाहि "श्रोतव्य श्रुति वाक्येभ्यो मन्तव्यश्चोपपत्तिभिः। ज्ञात्वाच सततं ध्येय एते दर्शन हेतव इति.

अत श्रवण मनन संपन्न ज्ञाने विना मूर्त नि
दिध्यासनं ब्रह्मणस्साक्षात्कारनिमित्तमि
ति तत उपासनरूपज्ञानं मोक्षफलं वि
धीयते। आत्मन्येवात्मानं पश्येत् त
या ज्ञातेपि ब्रह्मणि तत्साक्षात्काराय त
ज्ज्ञाने विधेरुपपत्तेः कथं भेदश्रुते
चेत् यच्छब्दजन्यं ज्ञानं तत्साक्षात्कारहे
तुः किंतूपासनारूपज्ञानमेव शंभु
राकाशमध्ये इत्यादिषु तज्जलानीति
शान्त उपासीतेति प्राचीनयोग्योपा
स्वेत्यादिषु प्रासेद्धमेव अतो ब्रह्मविदा
प्नोति परमित्यादिषु ब्रह्मस्वरूपो
पासना तत्फलादिकमुपादिश्यते। अ
न्यथा सत्यत्वादिविशेषणब्रह्मणा सह क
थं सकलकामाप्तिः फलं तादृशब्रह्मसाक्षा
19.A- त्करणं च सिध्यति। सत्यं ज्ञानमनन्तं

ब्रह्मं आकाशशरीरं ब्रह्म सत्यात्म प्राणारा
मं मन आनन्दं शान्तिसमृद्धममृतं स
त्यं परं परं ब्रह्म पुरुषं कृष्णपिङ्गलं ऊर्ध्व
रेतं विरूपाक्षमिति · सत्यं ज्ञानानन्दस्व
रूपं स्वात्मारामं उपशान्त सकलोपद्र
वकलङ्कं सकलमङ्गलात्मकं परमशक्त्या
विनाभूतया शक्तिरूपया कृष्णपिङ्गलं
विरूपाक्षं त्रिलोचनं परं ब्रह्म हि प्रसिद्धं-
श्रुतिभ्यः उपक्रमादिभिः तात्पर्यलिङ्गैः नि· र्ण
श्चीयते "यो वेद निहितं गुहायां" इति ·
प्राचीनयोग्यो पास्व विश्वरूपाय वै नम
इति ज्ञानाविनाभूतं तदुपासनं विधी
यते। "सोऽश्नुते सर्वान् कामान्" इत्यादि
ना सकलकामावाप्तेः ब्रह्मणा सह। प्रसक्ता
नामवगम्यते · अतो निष्काम त्रिलिङ्गयज्ञे.
मापेतो · निषिद्धकाम्यकर्मरहितो यज्वाश्नुते

स्मृति चोदित कर्मानुष्ठान संपन्न चित्तशुद्धिः
शमाद्यनुगृहीता. परम शिव भक्ति भावित
एव मुमुक्षु श्रुति सारेभ्यः शिवाभिधे
यमपरं ब्रह्म विद्यात उपासीतेति ज्ञानो
पासना विध्येरुपपन्नः। शिवो वृदगाह
र्नो विरूपाक्षस्य ब्रह्मणः परम विशुद्धि
मङ्गलभाजनत्वात् मुमुक्षूणां उपासने
के विधेयत्व द्योतनार्थः तथाचार्वशि
खायां शिवो ध्येयः शिवंकरः सर्वम
१६.13 न्यत् परित्यजेदिति श्रूयते - शिव शब्द
वाच्यस्य वस्तुनएव ध्येयत्वमिति। अन्य
थाकर्णं संसार निवृत्तिः निरस्त समस्त
दोषवाङ्क निरतिशय मङ्गलाधारत्वेहि
शिवत्वं हि शिवत्वं यन्मोक्षस्वरूपफ
लमुच्यते।" यदा चर्म सदाकाशं वेष्टयि
ष्यन्ति मानवाः । शिवमपिज्ञाय पुरुषस्या

न्तो भविष्यतीति - शिवएको ध्येयः शं करः.. सर्वमन्यत्परित्यजेदिति शिव व्यतिरिक्तस्य मुमुक्षूणां ध्येयत्वेन परिसंख्यानां शिव एव परं ब्रह्म मोक्षकामैर्ध्या तव्यो ज्ञातव्यश्चेति. अतस्तत्सर्वलिङ्ग समन्वयेन ब्रह्म परा वेदांता स्तदुपासनाविधिपरा इत्यविरोधः॥

उक्तब्रह्मलक्षणस्य प्राधान्ये अतिव्याप्तिमाशङ्क्याह -

॥ ईक्षतेर्नाशब्दं ॥

छान्दोग्ये श्रूयते अंस्यं विषयः. सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म तदैक्षत बहुस्यां प्रजायेये त्यादि इह पूर्वभागेतया सकलस्यास्य प्रपञ्चस्य कारणतया श्रूयमाणं सदिति वस्तु ब्रह्म वा प्रधानं वेति संदेहः. प्रधानस्यैव ज

तत्कारणत्वं युक्तं "अजामेकां लोहितशुक्ल
कृष्णां बह्वीं प्रजां जनयन्तीं सरूपां" इ
ति श्रुत्यन्तरश्रावणात् बहुप्रजाजन
कत्वं लोहितानुवर्णानुमित रजस्सत्वतमो
रूपायाः स्त्रय्याः प्रकृतेरवगम्यते तदानु
गुण्येन तत्रापि सच्छब्दवाच्यं जगत्कारणं
१६A· प्रधानमेव रूढत्वयोगात्तस्य क्रियाज्ञान
शक्तिसंबन्धोपि युज्यते· येन जगत्कारण
त्वसिद्धिः · अचेतनस्य प्रधानस्य जगा
त्कारपरिणामो युक्तः नचेतनस्य परमे
श्वरस्य कूटस्थस्य, कारणकृतिरूपत्वा
त्परिणामस्य ततोन्यायतः श्रुत्याच
प्रधानमेव जगत्कारणं सत्पदवाच्यमि
ति प्राप्ते ब्रूमः - अशब्दमानुमानिकं
प्रधानं जगत्कारणं सत्पदवाच्यं वस्तु
— — — कुतः चेतनी ईक्षतिश्रावणात्

तदैक्षत बहु स्यां प्रजायेयेति, नह्यचेत-
ने प्रधाने चेतनधर्मेक्षितिस्संभवति
यदुक्तं बह्वीं प्रजां जनयन्तीति श्रवणात्
सांख्य प्रकृतेरेव जगत्कारणत्वमिति तद
सङ्गतं चमसवदविशेषादिति सूत्रे परमे
श्वरकारणं कार्यावस्थप्रकृतेः बहुप्रजा
जनकत्वमित्युपपादयिष्यामः रजस्स
त्वरूपतया क्रियाज्ञानशक्तिसंबन्धः प्र
धानस्येति यदुक्तं तदयुक्तं त्रिगुणात्मिका
याः प्रकृतेः तमःपार्श्वत्वेन रजस्सत्व
योगाभावात् तमसि न्यक्कृते रजस्स
त्वयोरुद्रेको ज्ञानक्रियासंबन्धः प्रधा
नस्येति न वाच्यं सत्वरजस्तमसां सा
म्यावस्था प्रकृतिरिति अंगीकारात् कू
टस्थस्य परमेश्वरस्य जगदाकारेण परि
णामोऽपि कारणे हेतुरिति यदप्रमाणे तदज्ञान

१६.13 विलसितं. नामरूप विभागानर्हं सूक्ष्म
चिदचिच्छक्ति विशेषस्य परमेश्वर
स्य कारणत्वं नामरूप विभागार्ह स्थू
ल चिदचिच्छक्ति विशेषस्य तस्य.
कार्यत्वमिति वदतामस्माकं तत्प्रसङ्गभ
याभावात्. ननु सदेव सोम्येदमग्र आसी
त् एकमेवाद्वितीयमित्यत्र कथं नि
र्विशेषकत्वं ब्रह्मण आसीदिति क्रिया
विशेषः - अग्र इति काल विशेषः एक
मेवेत्यवधारणं आपेक्षाद्वैतर निषेध द्वै
परं अद्वितीयमिति जगदुपादानत्वमु
च्यते. अत एवानन्दशक्ति विशेषः क
थं सर्वज्ञत्वं सर्वशक्तित्व विशेषणमन्तरेण
जगदुदयकारणत्वं ब्रह्मणो भवति. अ
थवा प्रकृति प्रत्ययात्मकस्य सत्यस्य नै
कवस्तु परत्वं युक्तं. प्रकृत्या प्रत्ययेन च

सत्पदस्य वस्तुद्वय प्रतिपादनपरत्वात्-
तथाहि..युक्तं सूत्रे.. "शक्तिश्शिवश्च स
च्छब्द प्रकृति प्रत्ययश्रादितौ। तौ ब्रह्म
सा.रस्येन समस्तजगदात्मकौ॥" इति
स्थूल सूक्ष्म चित्प्रपंचरूप परशक्ति विशि
ष्टः परमेश्वर एव कार्यकारणरूपः स
त्पद विशेष्य इति निर्णयः॥

— — — शशङ्क्य परिहरति —

॥ गौणश्चेन्नात्मशब्दात् –॥

ईक्षते श्चेतनधर्मस्य अचेतने प्र
धाने योगाभावात् चेतनमेव परंब्रह्म
१८A. सत्पदवाच्य — — — रणमिति प्रति
पादितं- तदसंगतमेव- "तत्तेज ऐक्षत
ता आप ऐक्षन्त" इत्यादिष्वचेतने, प्यीक्ष पी
ति र्यथा गौणं श्रूयते तथा प्रधानेऽपि
गौण इति चेत् न चेतनवाचिना आत्म

शब्दात् सदेव सोम्येदमग्र आसीत्
इत्यारभ्य उपसंहारेण। तमात्मतत्त्वमसीति
श्रावणात् - तेजःप्रभृतिष्वपि नगौणमी
क्षते श्रावणं तत्तदात्मतया परमेश्व
रस्य चेतनस्यानुप्रवृत्तेः नन्वीक्षति
श्रावणं गौणमभ्युपेत्याप्येवं चेतनं प्रधानं
सद्रूपं जगतः कारणमिति वक्तुमशक्यं -
तस्य चेतनत्ववादिना आत्मशब्दादि:
निरूपितं भवति - नात्मशब्दस्याचेतन
ने प्रधानमर्थः भवतीहि चेतनस्य जीव
स्यात्मशब्दवाच्यत्वं मुख्यं तत्तत्तो जीव एव
चेतनो जगत्कारणं सद्रूपमित्यत आह -

।।तन्निष्ठस्य मोक्षोपदेशात्।।

सत्पदवाच्यत्वनिष्ठस्य मोक्ष उपदिश्यते
तस्य तावदेव चिरं यावन्न मोक्ष्येऽथ संप
त्स्यत इति तस्मान्नप्रधानं नजीवश्चात्स

तत्पन्न विषयः. प्रधानकारणवादिनामपि
तन्निष्ठस्य मोक्षो नास्ति ग्रमतः त्याज्यत्वात्
नच जीवनिष्ठस्य निषेधात् ईशाक्षमेव एको
ध्येयः शिवङ्करस्सर्वमन्यत्परित्यजेत् इति
पुनरपि स्पष्टं हेतुमाह प्रधान निराकरणे.

१६.B ॥ हेयत्वावचनाच्च ॥

यदि प्रधानमेवात्र विवक्षितं तदातस्य
हेयत्वमेवोच्येत तत्त्वमसीति मोक्षहेतुत
या ध्येयत्वमेवोच्यते ततो न प्रधानं इति.
युक्तिः किञ्च प्रधानपक्षे विरोधमाह—

॥ ॥

इतश्च न प्रधानं सत्पदवाच्यं एकवि
ज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधात्.
सत्पदवाच्यत्वं तज्ज्ञानेन तत्कार्यतया सक
लचेतनाचेतनवस्तुविज्ञानं भवति: "येनाश्रु
तं श्रुतं भवति इत्यादिना प्रतिज्ञायते. प्रधा

प्रधान कारणवादे विरुद्धमेतत् चेतनस्य प्र
धानकारणायोगात् प्रधाने कारणे ज्ञान
जाड्य विकारास्पदं तत्कार्य भिदं च सर्वं ज्ञा
येत यथा मृदि ज्ञातायां तद्घटादिकं अतः
किमत्र विरोध इत्याशङ्क्याह

॥ स्वाप्ययात् ॥

इतश्च प्रधानं.. स्वप्नांतं मे सौम्य वि
जानीहि यत्रैतत्पुरुषः स्वपिति नाम तदा
सोम्य सता संपन्नो भवति स्वमपितो
भवति तस्मादेनं स्वपितीत्याचक्षत इति
जीवस्य सतासंपन्नस्य स्वाप्ययवचनात् -
स्वाप्ययः प्रलयः अचेतने प्रधाने चेतनस्य
लयो.. नयुक्त ततो न प्रधानं सदित्युच्यते
सच्छब्देन परमेश्वर एव सर्वत्र प्रतिपाद्यते
न प्रधानमित्यत आह -

॥ गतिसामान्यात् ॥

यथास्यामुपनिषदि सत्पदस्य प - - -
१८A वाच्यत्वेन गतिः यथा श्रुत्यन्तरेपि ....
आनन्दमयोऽभ्यासात् सकलभूतकार
णत्वेनान्नमयादि पंचकोशकं उत्क्रान्त
र गुरु आत्माऽऽनन्दमय इति आनन्द
वल्ल्यामाम्नायते अतोऽनन्दमय आ
त्मा जीवो वा परमेश्वरो वेति सन्देहः
जीव इति पूर्वः पक्षः। तद्धर्माणामत्रो
पलंभात् तथाहि पृथिव्याः ओषधयः
ओषधीभ्योऽन्नं अन्नात्पुरुष इत्यादिना
पञ्चकोशाकारं शरीरं निरूप्यते आत्म
निमय इति शरीरस्वरूपमात्रमुच्यते -
प्राण इति तदन्तर्वर्ती प्राणः मनोम
य इति तदन्तर्वर्तीति बुद्धिः आन
न्दमय इति सर्वेषां अन्नमयादीनां
आशयो जीव एव अन्नादीनां शिरःप्रभृति

शिरः प्रभृति कल्पना समुपासनार्थाः -
अन्नादीनां ब्रह्मत्वेनोपासनात् तत्तदन्ना-
दि समृद्धिः फलमुक्तं कथमस्य संसा
रसागर एव मग्नस्य जीवस्य आनन्द
मयत्वाभिधानमिति चेत् अत्रानन्दश
ब्देन परंब्रह्मोच्यते आनन्दो ब्रह्मेति श्रव
णात् मयट् शब्दस्य विकारार्थत्वात् त
त्कार्यभूतो जीव आनन्दमय इत्युच्यते इ
ति नित्यसम्पन्न शिवत्वस्य ब्रह्मण आन
न्दमयत्वाङ्गीकारे अन्नमय प्राणमय मनो
मय विज्ञानमयानन्दमया मे शुद्ध्यन्तां
इति शुद्धि प्रा.न. व्यर्था स्यात् - अतोऽयमा
१८ 13 नन्दमय आत्मा जीव एव न परमेश्वर
इति प्राप्ते ब्रूमः आनन्दमयोऽयमात्मा पर
मेश्वर इति सिद्धान्तः कृतः अस्यानन्द
स्य निरतिशयत्वेनाभ्यासात् कथमभ्य

स्यते सैषानन्दमयस्य मीमांसा भवतीत्या
रभ्य मानुषविशेषादि प्रजापतिपर्यन्तं-
तत्तदानन्दस्योपर्युपरि गत गुणमतिशम.
भिधाय स एको ब्रह्मण आनन्द इति ब्रह्मान
न्दस्यास्य निरतिशय तिरस्कत्वेनाभ्यासा
त् तिरस्कत्व भाजनत्व भाजनत्व मस्य
संसारिणो न संभवति यदुक्तमानन्दमय
स्येश्वरत्वे शुद्धस्य तस्य कथं विशुद्धप्रा
प्तिनेति यथा प्रकृष्ट प्रकाशस्य चन्द्रस्य
तिरोधायक घनाव गम एव प्रसादः.
तद्वथा तस्य नित्यशुद्धस्य तिरोधानाव
नयनमेव शुद्धिः तस्मादानन्दमयः परमे
श्वर एव . नन्वानन्द एव ब्रह्मेत्युच्य
ते तद्विकार आनन्दमयो मयडिति विका
रार्थत्वात् आनन्दमयस्य ईश्वरत्वाभ्युप
गमे ब्रह्मणो न्य ईश्य इति प्राप्नोति तथा

पि तस्य —— रूपत्वादानेत्यत्र शङ्का-
यामाह

॥ विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥

अन्नमयादीनां यथा आनन्दादि
विकाररूपत्वं तथाप्यानन्दमय इत्यानन्द
विकारः मृद्विकारो हि मृन्मयो घटादिः
१९.४. अतो निर्विकारस्य परमेश्वरस्यापि विका
ररूपसंभ – – जीवपर्वेतिचेन्न –
मयट् शब्दस्यास्य प्राचुर्यार्थत्वात् अन्नमय
प्राणमय मनोमय पर्यंतमेव विकारार्थः विज्ञा
नमयो विज्ञानरूपो जीवः आनन्दमयोप्या
नन्दस्वरूपः परमेश्वरः सर्वथा विकार
प्रकरणपठितत्वात् विकारार्थएव समुचि
तो मयट् शब्दस्येत्याशङ्क्याह

॥ तद्धेतुव्यपदेशाच्च ॥

एषह्येवानन्दयाती ति जीवान् प्रत्यानन्द

हेतुतयानन्दमयस्य श्रूयते । स्वयं प्रचुरानन्दमया हि परानानन्दयति । यतः परमेश्वर एवानन्दमयः आनन्दप्रचुरः परमेश्वरः आनन्दमय इत्युक्तोपि ब्रह्मणोन्य एवायमिति गम्यते । ब्रह्म पुच्छं प्रतिष्ठेति ब्रह्माधारत्वेनास्यावगमात्- परमेश्वरादन्याङ्गीकारे ब्रह्मणोऽस्वातन्त्र्यात् जगत्कारणत्वाद्यसंभवः अतो जीवपक्ष एव समीचीन इत्यत आह ।

॥ मान्त्रवर्णिकमेव च गीयते ॥

यत्सत्यं ज्ञानमनन्तं ब्रह्मेति मन्त्रवर्णोदितं ब्रह्म ततोन्योन्तर आत्मानन्दमय इति आनन्दप्रचुरतया आनन्दमय इति गीयते । ब्रह्म पुच्छं प्रतिष्ठेति ब्रह्मशब्दः प्रणववाचकः तस्य परमेश्वरवाचकत्वात् आधारत्वं । अत्र केचिदाहुः- परमाकाशरूपः प्रकृत्या

त्मानन्दमय इति श्रूयते । तत्रिकोशविवेके विति
१९ 13. मित्तं परं ब्रह्म यत्सत्यं ज्ञानमनन्तं ब्रह्मेत्यु
च्यते तस्माद्वा एतस्मादात्मन आकाशस्सं
भूत इत्याकाशादि प्रपञ्च प्रकृतित्वेन श्रुत
आनन्दमयः परमाकाशरूपत्वमस्य यदे
ष आकाश आनन्दो न स्यादित्यवगम्य
ते ब्रह्म पुच्छं प्रतिष्ठेति ब्रह्माकाशानन्द
स्याधारत्वेनावगम्यते अतएव सपुकोश
हृण आनन्द इति ब्रह्माश्रितत्वेनायमवगम्य
ते पुनरेव च आनन्दो ब्रह्मेति व्यजाना
त् आनन्दाद्ध्येव खल्विमानि भूतानि जा
यन्त इत्यादिना सकलभूतप्रकृतित्वेनाव
गम्यते - तत्रानन्दो ब्रह्मेत्यस्यानन्दो
स्य ब्रह्मव्यपदेशस्तु ब्रह्मणो धर्मत्वेन तद
भेदात् " सैषा भार्गवी वारुणी विद्या पर
मे व्योमन् प्रतिष्ठितेति ब्रह्मधर्मस्वरूपे प

रमानन्दरूपे प्रपञ्चप्रकृतौ परशक्तिपर्याये
चिदात्मनि परमे व्योमनि वारुणी विद्यास
माप्तेत्युच्यते ततो ब्रह्मणो धर्मस्वभावः-
प्रकृत्यात्म परमाकाशरूपः परशक्तेर
त्तानन्दमय इत्युच्यते तद्धर्मत्वेन प्राप्ति
ष्ठेत्युच्यते परं ब्रह्म विज्ञानमयस्तदुपास
कोजीवः, प्रतिष्ठाभूत. धर्मिणो ब्रह्मणो
धर्मभूतस्यानन्दमय शक्त्यात्मनो भेदा
दर्शनात् आनन्दमय आत्मा ब्रह्मेत्याभि
प्रायेणानन्दमयोभ्यासादिति सूत्रकारेण
सूत्रमवतारितमिति अन्ये पुनरस्माल्लो
20 A. कात्प्रेत्य एतमन्नमयमात्मानमुपसङ्क्रा
मेत्यादिनाऽन्नमयादीनां प्रत्येकं चेतनवाच
कात्मशब्दातिसंबन्धात् संसारलोकादुत्क्रां
तस्य मुक्तस्य क्रमप्राप्यत्वावगमादिति स
र्वेषामन्नमयादय आत्मानः पञ्चचेतनाः

अन्नाद्यनुमेल पञ्चभूतात्मिकेष्वातारः
कारणपुरुषाः ब्रह्मविष्णुरुद्रेश्वरसदाशि
वसंज्ञाः. आनन्दमयात्माधारस्य सदाशि
वस्यानन्दमयस्यापि कारणं परमशिवा
ख्यं ब्रह्म तत्प्रातिपदेत्युच्यते - तदभेदादानन्द
मयस्य ब्रह्मव्यपदेश इति सर्वेष्वाऽनन्दम
यः परमेश्वर इति सिद्धं ॥

ब्रह्मणः परमशिवस्य समन्वयसिद्धं ज
गत्कारणत्वादिकं लक्षणं प्रधानदेवयो न
व्यभिचरतीति स्थापितं - अतः परं जीव
समष्टिरूपस्य हिरण्यगर्भस्य जगत्कारण
त्वादिकं श्रूयते इत्यत आह -

॥ नेतरोऽनुपपत्तेः ॥

यतः प्रसूता जगतः प्रसूती तोयेन जी
वान् व्यससर्ज भूम्यां यदोषधीभिः -
पुरुषान् पशूंश्च विवेश भूतानि चरा

चराणीति महोपनिषदि श्रूयते विषयः-
अत्र सकलजगत्सृष्ट्यादिहेतुत्वेन श्रू
यमाणः पुरुषः परमेश्वर उत अन्यो वे
ति सन्देहः- हिरण्यगर्भ इति पूःपक्षः
कथं तल्लिङ्गात् "एकाणवेतु त्रैलोक्ये
ब्रह्मा नारायणात्मकः। भेदोगिशय्यगतः
शेते त्रैलोक्यज्ञानबृंहितः॥ इति पुराणव
20 चनात् ब्रह्मणः समुद्रशायित्वमवगम्य
13 ते तादिह श्रूयते लिङ्गं यमन्तस्समुद्रे
कवयो वदन्तीति प्रजापतिश्चरति गर्भे
अन्तरिति सप्रबोपक्रमे सर्वानुप्रविष्ट
तयावगम्यते उपसंहारेच सूर्याचन्द्रम
सौधाता यथा पूर्वमकल्पयत् दिवंच पृ
थिवीं चेत्यादिना तस्यैव कारणत्वमवग
म्यते- तस्मादुपक्रमोपसंहारसिद्धस्य
हिरण्यगर्भस्यान्तर सिद्धः सर्वधर्मोपप

त्तिः किंच तत्प्रतिपादन परे श्रुत्यन्तरोपसंहा
रश्च कृतः- अद्भ्यः संभूतो हिरण्यगर्भ
इत्यष्टाविति- अद्भ्यः संभूत इति तत्तप्र
जापतिरेव हि प्रतिपाद्यः प्रजापतिश्चर
ति गर्भे अन्तः अजायमानो बहुधा विजा
यत इति दर्शनात् - हिरण्यगर्भस्समवर्त
ताग्र इत्यत्रापि प्रजापतिर्वै हिरण्यगर्भ
इति श्रावणात् - ततो हिरण्यगर्भएव -
जगत्प्रसूतेः हेतुत्वादिनात्र प्रतिपाद्य
त इति प्राप्ते क्रमः- परमेश्वरादितरो-
-ऽभिन्नो हिरण्यगर्भोऽत्र न प्रतिपाद्यः.
जगत्प्रसूतिहेतुत्वादीनां परमेश्वरधर्म
त्वात् तस्मिन्ननुपपत्तेः .. यतः प्रसूति
रित्याभ्य जगत्प्रसूतिहेतोस्तस्य अतःप
रं नान्यदणीयसं हि परात्परं महतो महान्तं
यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः

परस्तादित्यादिना सर्वोत्कृष्टत्वे तमसः प्र
कृति मण्डलात् परत्वादवगम्यते - तदण्डा
२१-अ- न्तर्वर्तिनो हिरण्यगर्भ-स्य न संभवति -
किंच य एतद्विदुरमृतास्ते भवन्तीत्यस्य,
ज्ञानादमृतत्वं मुक्तेराभिधीयते तच्च हि
रण्यगर्भे सं भवति परमेश्वरस्य मुक्तिहेतु
त्वमसाधारणलिङ्गं, यदा चर्मवदाकाशं वे
ष्टयिष्यन्ति मानवाः तदा शिवमविज्ञाय दुः
खस्यान्तो भविष्यतीति श्रवणात् यदुक्तं
उपक्रमोपसंहाराभ्यां सिद्धमिति तदप्रयोजनं -
अनुपपत्त्या प्रजापतिधातृशब्दौ हिरण्यग
र्भं विहाय प्रजानां पशूनां पतिं जगदाधार
कं परमेश्वरमेव प्रतिपादयतः अद्भ्यः
संभूत हिरण्यगर्भ इत्युभयत्रापि पर
मेश्वर एव प्रतिपाद्यः य ईशे अस्य द्विप
दश्चतुष्पदः आदित्यवर्णं तमसः परस्ता

द्विति विश्वेश्वरत्व विश्वातीतत्व लिङ्गात्तं
तो जगत्कारणत्वादिना प्रजापति शब्दवा
च्यः परमेश्वरः । न हिरण्यगर्भः –
परमेश्वरेण हिरण्यगर्भस्याभेदात्
.. त्कारणत्वमस्तीत्याशङ्क्याह –
॥ भेदव्यपदेशाच्च ॥ ....
.... कामाच्च नानुमानापेक्षा ।
प्र = जग = जापतिरकामयत प्रजा
स्सृजेयेति सर्वतः श्रूयतेषु काम
स्सङ्कल्पो हिरण्यगर्भस्य जगत्सृष्टौ
श्रूयते । तथापि तस्य जगत्कारणत्वे
अनुमानापेक्षा युक्त्यपेक्षा नास्ति –
२१.१३ उतस्य कामस्यावान्तर सृष्टि विषयत्वात् ।
परमेश्वरस्य हिरण्यगर्भात्मनोऽवा
न्तर सृष्टिश्चेति वक्ष्यते संज्ञामूर्ति
क्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ....

अनेन रूपेणात्मनानुप्रविश्य नामरूपे करवाणीति प्रथमजीव हिरण्यगर्भ रूपेण आत्मना प्रपञ्चानुप्रविष्टस्य परमेश्वरस्य नामरूपकर्तृत्व श्रवणात् अनयोरभेद एवाभ्युपेत इत्यत आह-

॥ अस्मिन्नस्य च तद्योगं शास्ति ॥

अस्मिन् उपादेय तत्वस्य हिरण्यगर्भस्य तद्योगं तस्य परमेश्वरस्य शेषत्वं ^संबंधं शास्ति मन्त्रविभागः- ब्रह्माधिपतिः ब्रह्मणोऽधिपतिरिति ततः परमेश्वर एव जगत्कारणं तच्छेषभूतो न हिरण्यगर्भ इति सिद्धं ॥ तदितः पूर्वमधीतैरधिकरणन्यायैः सर्वज्ञं नित्यतृप्तं अनादिबोधं अलुप्तशक्तिकं ^सकलजगदुभयकारणं समस्तोपादेयतत्वं ना ^अनंतशक्तिकं

समन्वयैकप्रतिपाद्यो स्वप्रकाशः निखि
लप्रपञ्च विलक्षणोऽद्वितीय स्वभावो सच्चि
दानन्द स्वरूपः संसारपाश विच्छेदकार
णं त्रिदृचिदर्णान्तरं शिवतत्वं परं ब्रह्मे
ति।सिद्धं। तस्य साधकानो संसारभी
रूणां मनस्समाधान योग्यं किमपि रूपं
प्रकाशः सिद्धं अधिकरणमारभ्यते -
॥ अन्तस्तद्धर्मोपदेशात् ॥
22. A. यएषोऽन्तरादित्ये हिरण्मयः पुरु
षोदृश्यते हिरण्यश्मश्रु हिरण्यकेश आ
प्रणखात् सर्व एव सुवर्णः तस्य यथा
कप्यासं पुण्डरीकमेवमक्षिणी इति छा
न्दोग्येस्य विषयते। अयमादित्यान्त
र्वर्ती हिरण्मयः पुरुषः परमे
श्वरो देवता विशेषोवेति संशयः। पूर्व
पक्षि सर्वेश्वरस्य गतस्य परमेश्वरस्या

दित्यान्तर्वर्तित्वं हिरण्मयरूपत्वं च भ
वति न स्वेच्छया रूपाङ्गीकारे त्रिलोच
नत्वं त्रिशूलित्वं तादृहनविद्यते पुण्डरीक
मेव मधुरं गीति लोचनद्वयमेव श्रूयते -
अथवा- स्वेच्छा गृहीतोपि देहः संसारिणा
मिव परमेश्वरस्य दुःखमुपपादयत्येव.
स्वेच्छा संबन्धेपि पावकस्य दाहकत्वं
स्वभाव एव ततः परमेश्वरस्य शरीरसं
बन्धो नयुक्त एव तस्मादयं काश्चि देवता
विशेष एव न परमेश्वर इति पूर्वपक्षन्या
यः - सिद्धान्त :- परमेश्वर एव कुतस्त
द्धर्माणामुपदेशात् - स एष सर्वेषां लोकाना
मीशः सर्वेषां कामानां तस्योदिति ना.
म स एष सर्वेभ्यः पाप्मभ्यः उदित इत्या
दिना सर्वकामकामेश्वरत्व. कुतस्तद्धर्मा
णां उपदेशात् स एषः सर्वेषां परा हित्याद

यो धर्मा हि परमेश्वरः, एक एव रुद्रो न
द्वितीयाय तस्थे य इमां लोकानीशत ईशि
२२.13. नीभिः अजं ध्रुवं सर्वतत्वैः विशुद्धं ज्ञा २२.13.
त्वादेवं मुच्यते सर्वपाशैः - एको बहूनां
विदधाति कामानि इत्यादि श्रवणात्
सर्वाधारस्य सर्वगतस्यादित्या तर्वर्ति
त्वादि न संभवतीति यदुक्तं तत्राविरो
धः । सर्वाधारः सर्वगतः परमेश्वरः सा
धकानुग्राय हिरण्मयीकिमपि रूपं स
मास्याय सवितृमण्डलमध्ये वसति
शरीरसंबन्धादस्मदादिवदीश्वर
स्य संसारदोषापत्तिः श्रुतिरेव भग
वतीह्यस्य शरीरसंबन्धे सकलपाप्
मराहित्यं च प्रतिपादयति. वयं हि श्रुति
प्रामाण्यशरणाः न युक्तं कहमन्महे -
पावकोपि संबंधी, न शाकितः दाहक

यथा कप्यासं पुण्डरीकमेवमाक्षिणी इति
त्रिलोचनस्य परमेश्वरस्य लोचनद्वयग्रा
हणं पुण्डरीकसादृश्यकल्पनार्थं नतृती
यलोचनाभावद्योतनपरं - तथाहि ..पुत्री
ब्राह्मणं प्राति द्वौ पुत्रावस्या.इ.नेकन्याबि-
त्युक्ते द्विसंख्याग्राहणं न शेषपुत्रनिषे
धपरं किन्तु पुत्रद्वयस्याभिन्नसादृश्यद्यो
तनपरं तद्वत्रापि कुमुदकं रश्मिभिः
पिबतीति कापेरादित्यः तेनासं आस
तं विकसितं पुण्डरीकं यथा स्फुरति-
तथा परमेश्वरस्य लोचनद्वयं लोचनस्तु
मुकुलितस्वभावं तु. विकसितपुण्डरीकं
नभवति मुकुलितपुण्डरीकसमामित्यामे
२३ A. पायः असौ यो.ऽवसर्पति नीलग्रीवो.ऽपि
लोहितः इति उतैनं गोपा अदृश्रन्नदृश्र
न्नुदहार्यः उतैनं विश्वाभूतानि सदृष्टो.

मृडयात्तेनः इति नीलग्रीवस्य परमेश्वरस्य
सकलभूतपत्यस्यावगमात् स्वरुपाहि
तमण्डलः त्रिणेत इति तस्य त्रिलोचनत्वा
वगतेश्च ... एव पत्यश्च परमेश्वरः पा
भामण्डल मध्यवर्ती अन्यथ्याकण्यमस्य
नीलग्रीवो विलोहित इति नीलग्रीव
त्वं त्रिलोचनत्वञ्चोच्यते असावादि-
त्यो ब्रह्मेति ब्रह्मव्यपदेशाच्च ॥ तस्माद
न्तरादित्य इति द्योतरूप मण्डलान्त
र्वर्ती सूर्यएव हिरण्मयः पुरुषः इ
त्यत आह-

॥ भेदव्यपदेशाच्चान्यः ॥

मण्डलाभिमानिनोऽस्माच्चेतन रूपा-
दादित्यात् अन्यएव हिरण्मयपुरुषः प
रमेश्वरः भेदव्यपदेशात् य आदित्ये तिष्ठन्ना
दित्यमन्तरोयमादित्यो न वेद यस्यादित्यः

यस्यादित्यश्शरीरं य आदित्यमन्तरो यमय
त्येष त आत्मान्तर्याम्यमृत इति· पुनरमृतश
ब्देन शिव उच्यते· एतानेवा अमृतस्य नामधेया
नीति शतरुद्रीय प्रशंसापरं श्रौतो लोपाने
पश्रवणात् आदित्यादेव परमेश्वरस्य
२३.13 तदभिदिताद्धि धर्मो प्रदिश्यते· तस्मादेत
नादन्य ईश्वरो हिरण्मयः नीलग्रीवः वि
लोहित इति नीलग्रीवः परमेश्वर एवान्त
र्वर्ती प्रतिपाद्यते तदात्मतया तच्छब्द
वाच्यं· ननु नीलग्रीवः परमेश्वरः आ
दित्यान्तर्वर्ती नारायण एव तथाहि स
र्वत्र लौकिकाः पठन्ति "ध्येयस्सदा सवितृ
मंडल मध्यवर्ती नारायणस्सरसिजासन
संनिविष्टः" इति तस्यैव पुण्डरीकसदृशाक्षो
इति प्रसिद्धेः· किमन्यथा प्रतिपादन प्रया
सेनेति चेन्न· परमेश्वरसाधारणलिङ्गानां

हिरण्मयः पुरुषो दृश्यमानानां तस्मिन्नारायणेनुपपत्तेः । सूक्तविषयत्व सन्दिग्धस्यास्य वाक्यस्य अप्रसिद्धे वीक्ष्यान्तरेण निर्णयो युक्तः । महोपनिषदि श्रूयते - आदित्यो वा एष इत्यादि । तत्तादित्य मण्डले मूर्ध्नि मध्ये अग्नि दीप्यत इति मंडल प्रभांमुक्ता । अर्चिषि पुरुषस्य, वाक्यस्य पुरुष इत्याकांक्षायां सर्वो वै रुद्र इत्यारभ्य हिरण्यबाहवे हिरण्यपतये अंबिकापतय उमापतय इत्युपसंहृतः बहुग्रहणस्योपलक्षणत्वात् हिरण्यरूप इति । अतो हिरण्य सदृशरूप उमापतेरादित्य मंडलमध्यवर्ती सिध्यति - नीलग्रीवं त्वं उमापतित्वमित्यादि विशेष लिङ्गं परमेश्वरा -
२४-A दन्यत्र यस्य तस्यायोगात् पुण्डरीकाक्षत्वं सामान्यलिङ्गं नारायणादन्यता ।

पितस्य (उ.(द) शानात् कमललोचनाना
रीकमलाक्षः पुरुषइति अतोविशेषलिङ्गेन
सामान्यलिङ्गस्य बाधः - ध्येयस्सदैत्यादि
लौकिकंवचनं भ्रक्रमेव ततो हिरण्यरूप
सहशरूपक्कस्तिलोचनो नीलग्रीव उमाप
तिः सकललोककामेश्वरः सर्वपाप्मा
नोपातो भगवान् परमेश्वर आदित्यान्त
र्वर्ती सावित्री प्रतिपाद्यस्सर्वेषामु
मुक्षूणां ध्येय इतिसिद्धं समीचीनं-

सर्वज्ञत्वादि धर्मस्य परब्रह्मणश्शिव
स्य परममङ्गलास्पदं उपास्यंरूपम
भिधाय तल्लक्षणस्य नामरूढिवशाद
न्यत्राव्याप्तेः शङ्कायामाधिकरणमा
रभ्यते ॥

॥ आकाशस्तल्लिङ्गात्, अतएव
प्राणः ॥

छान्दोग्ये श्रूयतेऽस्य विषयः . सर्वा
णि ह वा इमानि भूतानि आकाशादेव स
मुत्पद्यन्ते आकाशं प्रत्यस्तं यान्ति. सर्वा
णि ह वा इमानि भूतानि प्राणमेवाभिसं
विशन्ति प्राणमभ्युज्जिहते इति अत्र
सकल भूतोत्पत्ति प्रलय प्रतिपादन परौ.
प्राणाकाश शब्दौ परमेश्वर प्रतिपादन
परौ किं स्या. भूताकाश प्राणवायु प्र
तिपादनपराविति संदेहः . प्राणा
२४.B द्ध्येव खल्विमानि भूतानि जायन्ते . प्राणे
न जातानि जीवन्ति प्राणं प्रयन्तीत्यादिश्रु
तेः आकाशाद्वायुरित्यादि श्रुतेश्च प्रा
णाकाशयोरपि सकल भूत कारणत्वावग
मात् तावेवात्र प्रतिपाद्याविति प्राप्ते .
ब्रूमः . प्राणाकाश शब्द वाच्यं पर
मेश्वर एव सर्वकारणत्व लिङ्गात्

नयोः सर्वकारणत्वादिकं संभवति न

द्दा नन्दरूपस्य ब्रह्मणः कारणत्वात् वा

दैतात्पर्यं श्रुतेः न प्राणस्य किन्त्वनु

पाद मात्रः आकाशस्य भूतान्तर्वर्तितया

सर्व शब्देन ग्राहणजात् सर्वभूतोत्पत्ति

श्च- आत्मनः आकाशस्संभूत इति श्रु

त्या परमेश्वरादेव तस्मात् सर्वभूतकार

णत्वं न भूताकाश प्राणयोरिति सिद्धांतः॥

नन्ु भूताकाशइति उपपाद ग्रहणेनाके

मिति चेत् परमाकाशस्य परप्रकृतिरूपस्य

सर्वभूतकारणत्व संभवात् सप्रयोजनं तर्हि

परमेश्वर इति कथं निर्णयः तदभेदादे

ति सिद्धं॥

॥ ज्योतिश्चरणाभिधानात्॥

पूर्वं निखिलभुवननायकस्य निर

स्तसमस्तदोषवासनाकळंकस्य निरति

शाय मे शब्द रत्नाकरस्य उमापतेः परब्रह्मणः
आदित्य मण्डल मास्पदमिति निरूपेत. त
दिह तस्य स्थानान्तरमुच्यते - छान्दो
२८. ग्ये श्रूयतेऽस्य विषयः अथ यदतःप
रो दिवो ज्योतिः प्रदीप्यते विश्वतः पृष्ठेषु
नुत्तमे षुलोकेषु इदं वाव तद्दिद. यस्मि
न्पुरुषे तज्योति रित्यादि सकल
लोक व्याप्तत्वादि ... विश्रूयमाणं परंज्यो
ति: परमेश्वरोवा तदन्योवेति सन्देहः
संशयः द्यौ शब्दस्याकाशवाचित्वात्
परो दिव. इत्याकाशवर्ती सूर्यएवात्र प्रति
पाद्यते ज्योतिरिति. किंवान्तः पुरुषे ज्योति
रिति पुरुषान्तर्वर्तितया जाठराग्निरि
ति पूर्वः पक्षः। सिद्धान्तस्तु परोदिवो
ज्योतिरिति सर्वोत्तरं परंज्योतिः परमेश्व
रएव पूर्वत्त पादोऽस्य सर्वाभूतानीति

1

ज्योतिषोऽस्यैका ज्ञातया विश्वभूतानामभि
धानात् नैतत्संभवति जाठराग्निसूर्ययोः
तयोः परिच्छिन्नत्वात् "पूर्वा गायत्री ति
वा इदं सर्वं भूतमिति सर्वात्मतया गाय
त्री प्रतिपाद्यते प्रकरणात्तदैकार्थ ज्ञातमेव
प्रपञ्चस्य पादोऽस्य सर्वा भूतानि —
छन्दस्युक्ताभिधानात् तस्यैवात्राभि
धानं न परमेश्वरस्ये ति चेत् नैतत्संभ
वति गायत्र्याख्यस्य छन्दोमात्रस्य
सर्वभूतात्मकत्वं - किन्तु सावित्री सावि
त्र्या सादृश्यानुसन्धानोपदेशः परमेश्व
रस्य क्रियते सर्वात्मकतया परमेश्वरस्य लि
ङ्गेन गायत्री प्रकरण बाध्यः अतः परमे
२९. 13 श्वर एव ज्योतिरिति पुनरुपपत्तिमाह-
॥ भूतादि... व्यपदेशोपपत्तेश्चैवं ॥
भूतपृथिवी शरीर हृदयै स्तु व्यपदे-

दिव्यपदेशो नगायत्र्याख्ये छन्दसि संपद्य
ते परमेश्वर एवोपपद्यते. पुनराशङ्क्य
परिहरति हरति

।।उपदेशभेदान्नेति चेन्नो..यस्मिन्न
प्यविरोधात्।।

ननु पादोऽस्य सर्वाभूतानीति त्रिपद
स्यामृतं दिवीति. ततगायत्री.
प्रतिपादनं उच्येत. परमेश्वरः प्रतिपा
द्यते इति नसाध्यं उपदेशेन भेदेन वि
रोधात्. त्रिपादस्यामृतं दिवीति. परो दि
वो ज्योतिरिति विभक्तिभेदेनोपदेशभेदः
अतो विरोध इति चेन्न. उभयत्रापि विरो
धाभावात्. यथा वृक्षाग्रे श्येनः वृक्षा
ग्रात् श्येनः इति व्यपदेशः. अतोभयत्रा
पि दिवः परत्वमेव विवक्षितं. अनेनलि
ङ्गेन परमेश्वरएव पुरुषसूक्तोदितः

पुरुष इति सिद्धं· पादोऽस्य विश्वा भूतानी
ति तत्रापि श्रावणात् ततो निरतिशयसमाप्त
सकलपर्पञ्चः दिवि दीप्यमानं परंज्योतिः
परमेश्वर इति निर्णयः॥
भगवत्सवितृमण्डले साक्षादुपास्यतया
निर्दिष्टस्य परमेश्वरस्य तस्मिन्नविकार
पो विश्वात्मकत्वमुक्तं तदात्मकतया तद
२६ A. न्येषां उपास्यत्वं नान्यथेति प्रतिपादयि
तुं इदमधिकरणमारभ्यते॥

॥प्राणस्तथानुगमात्॥

अस्य कौषीतकोपनिषदि विषयः श्रूय
ते· प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृत
मुपास्वेतीदं वचनं त्रिविधः· अत्रो
पासनाविषयत्वेन प्राणशब्दसामानाधिक
रण्येन निर्दिष्टं इन्द्रो वा परमेश्वरो वेति सं
न्देहः संशयः· इह प्राणोऽस्मि प्रज्ञात्मा तं मामि

ति प्राणशब्दस्यात्मशब्दादिन्द्रे सामानाधिकर
ण्यमवगम्यते । मामिति तद्विषय एवोपा ^ योप
सना विधिः श्रूयते । तस्य प्राणे वृष्टिद्वारा
सकलरक्षकत्वात् उपपद्यते सकलोपा-
स्यत्वं च परमैश्वर्यवत्वात् उपपन्नं- तथा
हि श्रुतिः- इन्द्रो राजा जगतो य ईशे इत्या
दि तस्मिन्निन्द्र एवोपास्यतया निर्दिश्यते ।
इति पूर्वः पक्षः- सिद्धान्तः परमेश्वर इति ।
कुतः आनन्दाजरामृतत्वादीनां तथा
साधारण धर्माणामस्मिन् प्राणशब्द निर्दिष्टा
नुगमात् एष प्राण एव प्रज्ञात्मानन्दोमृ
त इति- यदुक्तं इन्द्रो राजेति श्रुतिः ततो
न्द्र शब्द ईश्वर विषयः प्रकरणादेवगम्य
ते । आशङ्क्य परिहरति-
२६-१३ "वक्तुरात्मोपदेशादिति चेदध्यात्मसंब
न्धभूमा ह्यस्मिन् ॥

.... उपक्रमे मामेव विजानीहीति त्रिशीर्षा
णं त्वाष्ट्रमहनं ^ पक्रम्य न जीवभाव मित्यादि
स्येन्द्रस्योपदेशादुपसंहारः तदनुगुण
इति चेत् न तदुचितं उपक्रमादारभ्यासमा
प्तेरिन्द्रशब्दवाच्ये परमेश्वरस्य धर्मस्या
ध्यात्मस्य सम्बन्धबाहुल्यात् परमेश्व
रानुगुणः समुचित एवं वर्ण्यते मनुष्याय
हितं मन्यस इति हितोपासनं प्रारब्धं
तच्च परमेश्वरधर्मः अतः परमेश्वरधर्म
बाहुल्यात् अयमिन्द्रशब्दवाच्य इन्द्रो
न भवति कथमयं जीववदनुपास्योऽ
पि स्वं विषयमुपदिशतीत्याशङ्कायामाह-
॥ शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥
अनेन जीवेनात्मनानुप्रविश्य नामरूपे
व्याकरवाणीत्यादि शास्त्रदृष्ट्या सर्व
शब्दवाच्यं परमेश्वर सोऽपार्थं तेनोपदि

एवा बिन्द्रः अत इन्द्रशब्देनोपदेशः प
रमेश्वरस्य दृष्टांतमाह वामदेवव
त् तद्धैतत्पश्यन् ऋषि र्वामदेवः प्रतिपे
दे अहं मनुरभवं सूर्यश्चेति वामदेवो
हि स्वस्य परमेश्वरात्मत्व दृष्ट्या अहंमनु
रभवं सूर्यस्येत्युपदिदेश तद्वदिन्द्रोपदे
शः। अथवा वेदान्त विज्ञानोपलब्धया
ब्रह्मात्म सामरस्य भावनया ब्रह्मभावमुपा
२८ A. तस्य विगलित मनुष्यादि देह विषयकल्पि
ताहंभाव संकोचस्य विश्वाकार परहंभाव
स्वरूपस्य वामदेवस्य स्वात्मन सर्वगतत्वाव
गमात् मनुसूर्यादि भाव प्राप्त्युक्तिः। एवमि
न्द्रस्यापीति निरूप्यते। प्राणोस्मि प्रज्ञात्मे
ति प्राणशब्दात् परं ब्रह्मोच्यते। तस्यानन्द
रूपत्वेन सकलप्राणहेतुत्वात् प्राणएव प्रज्ञा
त्मानन्दोजरोमृत इति श्रावणात्॥ अहंक

स्वे
ह्यास्मै मामुपास्स्वेति ब्रह्मदृष्ट्योपदेशः-त
थाहि कृष्णादयो व्यणांनादि प्रत्युपदि
ष्वन्तः॥ पुनराशङ्क्याह-
॥ वक्तुस्य प्राणलिङ्गान्नेति चेन्नोपास-
-नात्रैविध्यादाश्रितत्वादिह तद्योगात्॥
ब्रह्मज्ञानोपासनया ब्रह्मभावमुपगत
स्य विगलितजीवभावस्य तद्रूपदृष्ट्या
स्वस्मिन्नुपास्यत्वः सर्वात्मभावोपदेशो-
युक्तः। अत त्रिशीर्षाणं त्वाष्ट्रमवनं
यावदस्मिन् शरीरे प्राणोवसति तावदायु
रित्यादिना जीवलिङ्गं मुख्यप्राणलिङ्गं च-
दृश्यते तदेतद्रूपदेशोनर्थक इति चेन्नैवं
वाच्यं जीवप्राणशब्दवाच्यत्वं परमेश्वर
स्य समुचितं उपासनात्रैविध्यादेतोः।
उक्तपरमेश्वरस्य स्वरूपेण भोक्तृशरीरेण
भोग्यरूपेण चोपासनं त्रिविधं - आत्मतया

26 भोक्तृभोग्यात्मिततत्वेन तदुपपत्तेः ॥ परमेश्व
B. रस्य स्वरूपोपासन भवित्वेन मुक्तिहेतुः
अन्यदपि द्वयं कालेन । तस्मादिह परमेश्व
रात्मतया इन्द्रस्योपास्यत्वसिद्धिरिति
निर्णयः ॥

इति श्रीकंठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये प्रथमस्याध्यायस्य प्रथमः पादः ॥

34. ब्रह्मबोधकानां वेदान्तवाक्यानां आनन्त्यात् प्रतिवाक्यं विचारानुपपपत्तेः सं
दिग्धानां केषांचित् (विचारेण) तन्न्यायैः स्वाद्दशाना
मपि निर्णयो भवतीति कानिचिदेव वाक्या
नि सूत्रितानि ब्रह्मबोधकानि तात्पर्यलिङ्ग
समन्वयेन तेषुकतिचित् स्पष्टलिङ्गानि प्रथ
मपादे विचारितानि कतिचिदन्यानि स्पष्ट

नि द्वितीयपादे विचार्यन्ते —

॥ सर्व..प्रसिद्धोपदेशात् ॥

छान्दोग्येऽस्य श्रूयतेऽस्य विषयः मनो
मयः प्राणशरीरः भारूपः सत्यसङ्कल्पः
आकाशात्मा सर्वकर्मा सर्वकाम इति उप
त्तमनोमयत्वादिधर्मकः श्रूयमाणः पुरुषः
परमेश्वरो जीवो वेति संशयः जीव इति
पूर्वपक्षः कुतः तस्य प्रत्यासन्नत्वात्
दिधर्मो जीवे मनोमयत्व प्राणशरीर
कत्वादिकं च सुखादिलक्षणं न परमेश्व
रलिङ्गः सत्यसङ्कल्प इति सत्यसङ्क
ल्पमपि संसारिधर्मत्वेन योजनीयं अ
तः सर्वथा मनोमयत्वादिधर्मो जीवस्य
२८ A. व. न परमेश्वरस्य प्राप्नोति अयं प
रमेश्वर एव मनोमयत्वादिधर्मः कु
तः परब्रह्मणः परमेश्वरस्यैव उपक्रमे

सर्वं खल्विदं ब्रह्म तज्जलानीति शान्त उपासीतेति सर्वकारणत्वेनोपास्यत्वेनोपदेशात्- इति तात्पर्यं च तज्जलादि सर्वं ~~ब्रह्म~~ ब्रह्मबीजं जन्मस्थिति लयं सर्वं- एतत्सर्वं जडाचेद्विश्वं- यतस्तत्सर्वं विश्वं ब्रह्म खल्विति शान्त उपासीत ब्रह्मेति यथा सागरे संपन्न जन्तु स्थिति विलयं... बुद्बुदं केवल रूपमेव दृश्यते- तथा शक्तिमति ब्रह्मणि संपन्न जन्मादिकं तन्मयमेव तद्व्यतिरिक्तं किंचन नोपलभ्यते- तथा सर्वं श्रीरामे निरूपितं ईश्वरेण- अहमेकः षण्मासं हृत्तामीहन्न भविष्यामि चान्यः कश्चित्तो व्यतिरिक्त इति- तत्तस्य तेन ब्रह्माहमित्यादिना विश्वरूपत्वमात्मनः प्रबोधितं त--- --

रूप – – सोऽन्तरादन्तरं प्राविशत् इत्य
नुप्रवेशश्रवणहेतुः अतो ब्रह्मणो पृथक् सिद्धिः
ब्रह्म । रूपेति प्रवृत्तिर्वा कस्य जगतस्तद्व्य
तिरिक्तता नास्ति । तथा हि युक्तं वदन्ति
शक्तयोऽस्य जगत् – – – – – शक्तिमांस्तु
महेश्वरः । शक्तिस्तु शक्तिमद्रूपा व्यतिरेकं
न वा(गा)ञ्छति ।। तादात्म्यमनयोर्नित्यं
वह्निदाहकयोरिव । शक्तिशक्तिमतोर्यस्माद्
२८ 13. भेदस्सर्वदा स्थितः ।। अतस्तद्धर्मधर्मि
त्वात् – – – – शक्तिः परमात्मनः । न
वह्नेर्दाहिका शक्तिर्व्यतिरिक्ता विभाव्यते ।।
इत्यादि, वायव्यसंहितायां च – शक्त्यादि च
पृथिव्यन्तं शिवशक्तिसमुद्भवम् । तेनैकेन तु
त – – – – मृ. मृदा इत्यादिकं यथा ।।
परास्य विबोधा शक्तिः प्रबोधानन्दरूपि
णी । एकानेकस्वरूपेण भाति भानोरिव प्रभाः ।।

परास्य शक्तिर्विविधैव श्रूयते स्वभाव
वर्त्ति ज्ञानब — — यत्र पूर्वमेव — द्वि
न द्वितीयाय तस्मै इमौ लोकान् शत इ
शानीभिः परम शक्तिभिरित्यादि मिरि त्यादयश्च
पर ब्रह्मणः स्वाभाविकः सन् नेदं सत्ता
देश कालादि परिच्छेद शून्या स्वाभा
विकी परम शक्तिः तयोवदैति - किं बहु
ना- श्रुतिस्मृतीतिहासपुराणाभि युक्त्या
युक्ति प्रामाण्यात् सकल विदेह प्रपंच म
हा भूतिरूपा महासच्चिदानन्द सत्ता दे
श कालादि परिच्छेद शून्या स्वाभाविकी
परम शक्तिः परब्रह्मणः शिवस्य स्वरूपे
प गुणश्च भवति तद्व्यतिरेके ब्रह्मणः
सर्वज्ञत्वं सर्वशक्तित्व सर्वकारणत्व सर्व
नियन्तृत्व सर्वोपास्यत्व सर्वानुग्राहकत्व स
र्वपुरुषार्थ हेतुत्वादिकं सर्वगतत्वं चन स्यात्

ति- किंच महेश्वर शिव महादेव रुद्रादि
परमाख्या नामाभिधेयत्वं च न संभवति-
२९ A तथा. सर्वविद् पित्र प्रपंचशरीरविशिष्टं
ब्रह्म सर्वशब्दवाच्यं- यथा नील शब्दो.
न केवलं स्वस्यैव वाचकः स्वविशिष्टस्यो
त्पलस्यापि तथा प्रपञ्च शब्दोपि. ब्रह्मणः.
तस्मात् सर्वशब्दवाच्यत्वं ब्रह्मणः सर्वो
वै रुद्र इत्यादयः प्रतिपादयन्ति.- ततस्स
र्वं खल्विदं ब्रह्मेति सर्वाभिद चिच्छरी
रम्. ब्रह्माभिधीयते.- ततो ब्रह्मरूपत्वा
त् प्रपञ्चस्य द्वैपाद्य विषयत्वात् शान्त
एव ब्रह्मोपासीतेति १ तद्धर्म्य पराणिशे.
--- सीराभिव्यक्त्यंते. विनाहं देव
देवस्य जगदेतच्चराचरं। एवं मत्वं न जा
नन्ति पशवः पाशगौरवात्॥ विचेतितच्चे-
तनो ग्राहुस्तन्मात्रे व्याप्तमचेतनो। .... अतिवे

ध्यात्मकं सर्वं विश्वगुरोर्विभो॥ एवमे
व न सन्देहो विश्वमस्य बन्धोयतः। सत्येसा
धौच सच्छब्दः सद्भिरेव प्रयुज्यते॥ विप
रीतेप्य सच्छब्दः कथ्यते वेदवादिभिः॥
सच्चासत्च जगद्विश्वं शरीरं परमेष्ठिनः॥
वृक्षस्याल्पासेकेन शाखा..पुष्यन्तिवै
यथा..। शिवस्यपूजया तद्वत् पुष्यत्य
स्यवपु जगत्॥ आत्मा तस्या ष्टमी मूर्तेः
शिवस्यपरमात्मनः। ति चिकेतरमूर्तीनां
विश्वं तस्माच्छिवात्मकः॥ देहिनो यस्यक
स्यापि निग्रहः क्रियते यदि। अनिष्टमष्टमू
२९ 13 र्तेस्तन्नात कार्यं विचारणा॥ सर्वोपकार
करणं सर्वानुग्रहणं तथा। सर्वाभयप्रदा
नञ्च। शिवस्याराधनं विदुः। इत्यादिका
ऽसर्वाकाकृत्वात् ब्रह्मणः सर्व ब्रह्मेति
शान्त उपासीतेति। समञ्जसमेव। ततोऽहि

समुपास्यत्वेनोपक्रमगतं ब्रह्मैवात मनो-
मयत्वादिधर्मकं - नामनोमयत्वादिकं सं-
सारिणो लक्षणं उपास्याकारपरिग्रहादस्य
परिच्छेदसंभवात्। यदुक्तं क्रतुमयस्य
जीवस्य प्रसङ्गानन्तरं प्रस्तुतत्वात् मनो-
मयो जीव इति तदयुक्तं। उत्पत्तिविधौ
प्र ब्रह्मोपरुद्धायां उपासनायां भवा--र
प्राप्तस्य जीवस्य प्रवेष्टुमशक्यत्वात्
यथा विश्वेदेवावरुद्धायां.... वाजेनी-
स्प्रवेशः। अतो ब्रह्मैव मनोमयत्वादि
धर्मत्वेनोपास्य..ते; उपक्रमगतं ब्रह्मैव
मनोमयत्वादिविशिष्टमेत्युक्तेऽवांतरसि-
द्धस्य जीवस्य प्रसङ्गो नर्थकः स्यादित्या-
शङ्कायामाह-

॥ विवक्षितगुणोपपत्तेश्च ॥

सत्यसङ्कल्प सर्वकामत्वादिनाः विवक्षि

नानां गुणानां ब्रह्मण्येवोपपत्ते स्तदेवोपास्यं - अंतरांतरासिद्धस्य जीवस्योपासकत्वस्य (कर्तृत्वस्य?) नास्ति किन्तूपासकत्वमितिनिरूपितं-- पुनरपि सकलजीव समष्टिरूपोपाधिभूतस्य ना-
३० A· रायणस्यापि विश्वाधिक ब्रह्म विषयमुपासकत्वं नोपास्यत्व मित्याभिप्रायात्मधिकरणमारभ्यते

। अनुपपत्तेस्तु न शारीरः ।।

अस्य महोपनिषदि श्रूयते स्यविषयः- पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं नारायणं महाज्ञेय मित्यादि - अत्र विश्वपतित्वादि लक्षणं युक्ततया नारायण शब्दवाच्यो मूर्त्यात्मा परमेश्वरो वेति- सन्देहः- सहस्रशीर्षं देवं इत्यारभ्य सहस्रशीर्षत्वादि विशेषत्वेन नारायणमूर्त्या

त्मन एव उद्देश्यत्वाभ्यासात् समुद्रेन्ते वि
श्व~~मे~~ वाभुवं इति समुद्रशायी. तल्लिंगा
च तात्पर्यविषयकाच्युत हरिशब्दादि
प्रयोगाच्च नारायण एवेति मूर्त्यात्मा वि
श्वपतित्वादिना लिङ्गेन प्रतिपाद्य इति पूर्वः
पक्षः. सिद्धान्तस्तु नारायणात्मा परमेश्व
र इति. कुतः विश्वपतित्वादिना. परमेश्वरध
र्माणां तदन्यान्तरे नारायणेऽनुपपत्तेः पशू
नां पतये ब्रह्मणो पतये मरुतां पतय इत्यादि
ना परमेश्वर एव निखिलभुवनाधिपत्य
म~~स्याव्हे~~..स्यते: एक एव रुद्रो न द्वितीया
य तस्थे य इमांल्लोकान् ईशत ईशनीभि
रिति रुद्रस्यातिरिक्तस्य जगदीश्वरत्वं नि
षिध्यते - विश्वाधिको रुद्र इति विश्वाधि
३०.१३ कत्वं च तस्यैव श्रूयते - अतो विश्वपतित्वादि
लक्षणो नारायणात्मा श्रूयते इति समीचीनं-

ननु नारायणात्मेति · ननु नारायणान्तर्यामी
परमेश्वर इति यदुक्तं तदयुक्तं · नारायणपरं
ब्रह्मेति नारायणस्य परब्रह्मभावमुक्त्वा, पद्म
कोशं मित्यादि पुरुषस्य हृदयपुण्डरीक
स्थानमुक्त्वा तस्य मध्ये वह्निशिखेत्यादिना -
जीवस्वरूपमुक्त्वा तस्याश्शिखाया मध्ये
परमात्मेति परमात्मत्वेन जीवान्तर्यामित्वेनो
पास्यः ·· अतस्तदात्मकत्वेन तदाधेकत्वेन त
दुपास्यत्वेन च परमेश्वरस्य वक्तुमयुक्तमि (सार)
त्यत आह ·

॥ कर्मकर्तृव्यपदेशाच्च ॥

कर्मत्वं कर्तृत्वं च व्यपदिश्यते - तत्र भूत
योः नारायणपरमेश्वर ...... पद्मकोशप्र
तीकाशमिति प्रकृतस्य नारायणस्यैव हृ
दयमुच्यते परमात्मा व्यवस्थित इति · परमे
श्वर एव — — आत्मा तदन्तर्वर्तितया ध्येये

यत्वेनोच्यते ततो ध्यातृत्वेन नारायणस्य ध्ये
यत्वेन परमेश्वरस्य च कर्तृत्वं कर्मत्वं व्यपदि
श्यते · अतो नारायणादन्य एवोपास्यः पर
मात्मा स शिव इत्यादिना · ब्रह्मविष्णुरुद्रे
न्द्रादि प्रप... विभूति विशिष्टत्वं परमेश्वरस्यो
पदिश्यते अत्र विष्णोरग्रहणेपि कैवल्यो
पनिषदि श्रूयते · हृत्पुण्डरीकं विरजमित्या
31 A. दिना · हृदयं पुण्डरीकं प्रस्तुत्य · उमासहा
यं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशा
न्त... · ध्यात्वा मुनि गच्छति भूतयोनिं समस्त
साक्षिं तमसः परस्तात् स ब्रह्म स शिवः सेन्द्रः
सोऽक्षरः परमः स्वराट् स एव विष्णुः स प्रा
णः स कालोऽग्निरित्यादि - तन्न्यायोक्ता -
- ध्याने कर्तव्यः · - यो वै रुद्रः स भगवान् भू
र्भुवः स्वः (सुवः) यश्च ब्रह्मा तस्मै वै नमो नमः -
यश्च विष्णुः यश्च रुद्र इत्याद्यथर्वण श्रुतिर

पि द्रष्टव्या · अत्र विभूतित्वेन ब्रह्मशिवयोरभे
दो विष्णोरग्रहणं नारायण इति परमेश्वरस्यो
पासकत्वात्तस्य प्रस्तुतत्वादित्यविरोधः ·
सहस्रशीर्षा पुरुष इत्यारभ्य प्रस्तुतस्य पुरु
षस्य पादो विश्वा भूतानीति निर्दैकांशज
गद्विशिष्टत्वं उच्यते; सहस्रशीर्षं देवं इति
सप्रकारात्मा नारायण इति स्पष्टयति · सन्चार्यं ना
रायणपरं ब्रह्मेति ब्रह्मत्वेनोच्यते ब्रह्मैव स
र्वोपास्यं कथमस्य तद्भूतस्यान्यं प्रत्युपा
सकत्वमित्यत आह —

॥ शब्दविशेषात् ॥

नारायणपरं ब्रह्मेति शब्दविशेषएव ना
रायणात्परमिति ब्रह्म प्रतिपाद्यते अतो
नारायणादन्यदेव परब्रह्मोपास्यं · परब्र
ह्मेण सहस्रशीर्षत्वादि विशिष्ट पुरुषत्वे
३१·B न जगदुपादानत्वात् · परब्रह्मात्मकस्यत

स्य जगद्व्यापारत्वमिति बद्ध्या मः प्रकृते ऽत्याधिकरणे... नारायणस्योपासकत्वे प्रमाणान्तरमाह—

॥ स्मृतेश्च ॥

एवमुक्त्वा महाबाहुर्महायोगेश्वरो हरिः। दर्शयामास पार्थाय योगामीश्वरगोचरं इति स्मृतेश्च महायोगिस्वामिनो नारायणस्य परमेश्वरविषयो योगः समाधिरभिव्यज्यते अताच उभयं यः यन्नावदाराध्यः कृष्णो. नाथिलपकर्मणा। तस्माद्धितमः कृष्णाद-न्यो ममन विद्यते इत्यश्व त्वामोनप्राप्ते. परमेश्वरवचनञ्च. तस्मादन्यं नारायणादुपास्यं वाह— पुनरनुपपत्तिमाशङ्क्याह—

॥ अर्भकौकस्त्वात्तद्व्यपदेशाच्च ने-तिचेन्न निचाय्यत्वादेवं व्योमवच्च ॥

नीवारशूकवत्तन्वी पीता,भासात्तनूप-
मा. तस्याः शिखाया मध्ये परमात्मा व्यव
स्थितः इति· स्वल्पत्वं हि शिखान्तर्वर्तित्व
या· स्वल्पाशायत्वा..ल्प व्यपदेशादयं
व्यापि. न परमेश्वर इति चेत् न· उपास्यत्वा
त् तथाव्यपदेशः न स्वरूपात्मत्वं व्यो
मो महत्वात्स्वरूपग्राहः तस्य सिद्धत्वात्
यथा घटादिषूपहितस्य व्योम्नः तदुपाधि
कल्पत्वं स्वरूपतो महत्त्वं च - ततो न विरो
धः- पुनराशङ्क्य परिहरति —

32. A. ॥ संभोगप्राप्तिरिति चेन्न वैशे
ष्यात् ॥

· · · · · · · · · सुखदुःखभोगहेतुभ्यो जी
वशरीरेभ्यो ब्रह्मरूपस्यास्तिहि वैशेष्यं·
इच्छागृहीतत्वादस्य तेषां कर्ममूलत्वात्
श्रूयते अतएव, परमेश्वरः अपहतपाप्मा - विजरो:

रो मृत्युर्विशोको विजिघत्सो विपापः सत्य
त्यकामः सत्यसंकल्प इति · संसारिणः
धर्मरहितत्वेन न चैवं संसारी जीवः -
अतएव प्राकृतानि पाप-जरामरण-शोकादि
रहितानि स्वेच्छासंपादितानि लीलामङ्गल
रूपाणि परमेश्वरस्य श्रुतिशतैरुद्धैः पुरु
रूप उग्र इत्यादिषु श्रुतिशतेषु नित्यानि वि
ज्ञायन्ते ततः परब्रह्मणः परमेश्वरस्य जीवा
द्वैलक्षण्यान्न तद्गतशरीरादिगत दोषप्राप
त्तिः - अत एवलूपक्रमादिभिर्लिङ्गैः विरूपा
क्षः ब्रह्म सर्वोत्कृष्टत्वादुपास्यमिति युक्त
मेव - तथाहि उपक्रमे अणोरणीयान् ते
महिमानमीशमित्यंतेन सकलजन्तुहृद
यगुहावर्तित्वेन स्वप्रसादातिशयवीतशोक
पुरुषदर्शनविषयत्वेन महिमातिशयवानी
शः प्रस्तुतः - पुनः सप्त प्राणाः प्रभवन्ति

तस्मात् इत्यादिना सएव परमशक्तिमान्
प्राणादिजगदुपायत्वेन निरूपितः ततश्च-
32.B. यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो
महर्षिः हिरण्यगर्भं पश्यत जायमानमि-
ति· - - - - - - - -त्वेन सर्वज्ञत्वेन सकल
कार्यप्रथमहिरण्यगर्भजनकत्वेन निमित्त
भूतः परामृष्टः· सएव ततः परेण नाकमि
ति· परमाकाशगुहावत्त्वं कृफलकर्मा
नुष्ठात्रीणां वेदान्ततात्पर्यवेदिनां धीनां,
जितेन्द्रियाणां परामृतात्परिमुच्यन्तीति-
परामृतरूपतया प्राप्यत्वेन सिद्धः· कस्त
स्याः प्राप्त्युपाय इति प्राप्ते· दहरं विपापमि
ति· दहरोपासनमारब्धं तत्र तस्मिन्यद
न्तस्तदुपासितव्यं इति दहरपुण्डरीके यद्व
स्तु तदुपास्यं सामान्येनोक्तं तान्त्रिमित्यार्णं
शायां यः परः स महेश्वर इति महेश्वराख्यं

तदुपसंहृतं उपास्यं रूपं तत्त्वं रूपमित्यकी र्त्यायां. अतं सत्यमित्यादिना विरूपाक्ष त्वादि लक्षणरूप मित्युपसंहारः - त त्ताबान्तर सिद्धो नारायणः पूर्वाधिकरण न्यायादुपासकत्वेन सिद्धः - तत्त सर्वेषा मुपासने आधिकरणस्य भावेपि नारा यण ब्राह्मणम प्याधिकयार्थं तदिहोपास्य त्वेन विरूपाक्षेण ब्रह्मणा तदुपासकस्यना रायणस्या भेद भाव..या तद्धर्मैरस्य प्रति पादितं मुपादानस्य तत्कात्मन इति समी- -चीनं-

॥अत्ता चराचर ग्रहणात्॥

३२. अ. यस्य ब्रह्म च क्षत्रं चो भे भवत ओदनः - मृत्युर्यस्यो पसे चनं क इत्था. वेद इत्तं यत्र स इति श्रूयते अस्य विषयः - इह मृत्यूपसे चनमिश्रित ब्रह्म क्षत्रोपलक्षित निखि-

~~निखिल~~ निःक्लेशानन्दस्वरूपपरम कलङ्कीकृतया
श्रूयमाणः परमेश्वरोऽन्यो वेति संशयः-
परमकारुणिकस्य सर्वानुग्राहकस्य सक
लभक्षकत्वमनुचितं हिंसारूपं हि पर
प्राणमोचनं हिंसाप्रवृत्तेः कोपएव-
श्रूयमाणः. परमेश्वरोऽन्यो वेति संशयः.
परमकारुणिकस्य सर्वानुग्राहकस्य
मङ्गलगुणस्य मोहएवमूलकं तस्य सं
सारनिदानस्य तमएवप्रकृतिः. अतस्ता
मसः सर्वसंहर्ता. तामसत्वं नाम वृत
ज्ञानादिमत्त्वान्निःप्रकाशकत्वं संहर्तृ
श्महेत्युक्ते. तस्य नित्यशुद्धस्य निरवधि
कमङ्गलाकारस्य निःशेषसारकर्षकस्य
ज्ञान तमोमोहक्रोधादिकामङ्गलसंप्र
दायप्रसङ्गः- स्वरूपलक्षणतया नि
र्दिष्टं सर्वज्ञत्वनित्यतृप्तत्वादिकमन

र्यकमेव स्यात् - तस्माद्ब्रह्मणोन्यएतादृ
शगुणस्संहर्ता भवतीति पूर्वः पक्षः -
सिद्धांतस्तु - ब्रह्मैव संहर्तृत्वेन श्रूयते ..
कुतः चराचरग्रहणात् - यदुक्तं -
निखिलचराचरप्रपंच भोक्तृत्वमयु
क्तमिति तंत्र.. तदेव ब्रह्मत्वे लक्षणं - प
32. रिच्छिन्नशक्तेर्जीवस्य सकलचराचर
13
संहरणसामर्थ्याभावात् तस्मात्सर्वसं
हर्तो महाग्रासाय वैनम इति परमेश्वर
स्यार्णवशिरसि - श्रूयते - संहर्तृभावो
नक्वाचेज्जीवस्य य इमौ विश्वाभुवना
निजुह्वदिति ब्रह्मणो निजप्रकाशवह्नौ
निखिलभुवनहव्यस्य भोक्तृत्वं अवग
म्यते नचैवमस्ति जीवस्य सामर्थ्यं
हव्यकोटिनिविष्टस्य स्वेतरमखिलंचरा
चरं. चिदाचित्प्रपञ्चं स्वात्मनि संहृत्य यद्

वर्तते परमेश्वरस्तदा सर्वमिदं निरस्त
चन्द्रसूर्यादिक प्रकाशतया विध्वस्तरात्रि
दिनादि काल विभागमनवगतम्. नामरू
प विशेषतया स्थूल सूक्ष्म देव मनुष्या
दि व्यवहारशून्यं तमोमात्रं वर्तते. स एक
एवपरमेश्वरो निरंकुशप्रकाशः सर्वसाक्षी
तदानीमपि परिशिष्यते- तथाहि श्रुतिः-
तदा तमस्तन्न दिवा नरात्रिः न सन्नसः
च्छिवएव केवलं. इति. अत्र नसन्न
चासदिति. सदसतोः प्रशुपाशयोः न
स्वरूप.... विभागाहिं स्थूलत्वं ननु नित्य
प्रकाशे शिवे परब्रह्मणे सत्यपि कथं तमो
मयंजगदिति चेन्न. स्वयं प्रकाशस्य सर्व
साक्षिणः शिवस्य का हानिः--नामरूपशू
न्यतया ग्राह्यग्राहकयोग्येषु निजयेषु विहत
34.A. करण। शरीर शक्तिनां नीवानां प्रपंच

वाहणं नास्ति· मलतिरोहित स्वज्ञानकर
णतया· शिव...प्रकाशरूपस्य· पूर्वमिव·
दर्शना....भयो.- निरस्त समस्त विशेषशू
न्य परमसुषुप्ते मयी· महावस्था तमइत्यु
क्तैः. तथाहि स्मृतिः- आसीदिदं तमो-
भूत मप्रज्ञातमलक्षणं। इति· नामरूप वि
भागान्.... सूक्ष्म चिदचित्प्रपञ्च विशि
ष्टतया· शिव इत्युच्यते· स पुनः सर्गका
ले स्वसङ्कल्प मात्रेण समवायिकारण नि
रपेक्षमेव स्वस्मात् प्रथमशक्ति परिस्फुर
णपूर्वं पूर्व.देव तत्तं नाम विशिष्टमेव स
कलं । चेदचिदर्थजातं सृजति प्रकाश
यति· तथाहि युक्त सूक्तेः· चिदात्म.हि
देवात. स्फुरितं भिन्नावशात् बहिः· योगी
व निरुपादानं मर्थजातं प्रकाशयेत्.ति -
मनु· मायीतु प्रकृति विद्या. मायिनं तु महे

श्वरं- तस्मादिद्व रा.प. जायतेत्यादि श्रुत्या
मायापुरुषयोरुपादानत्वं श्रूयते - कथं-
निरुपादानत्वमितिचेन्न सत्यं यथा श्री.
घट निष्पत्तौ कुलालस्य शरीरस्वरूप
पृथक्त्वेन मृत्पिंडोपादानं दृश्यते तथा
न परमेश्वरात्पृथक् सिद्धं मायाद्युपादानं
मायादिरूपात् परमेश्वरात् जगदुत्पत्त्य
विरोधः ततः स्वरूपापृथगवस्थान-
सूक्ष्ममायापुरुषः परमेश्वर एव स्वयमु
३४ 13 पादानमुपै.प.दे.यमपीत्युच्यते॥ -तथा
ऽथर्वशिखायां.म.श्रीयते ध्यानं त
त.- ब्रह्मविष्णुरुद्रेन्द्राः संप्रसूयन्ते -
सर्वेन्द्रियाणि सहभूतैः कारणं ध्या.
ध्यकारणं तु ध्येयः सर्वैश्वर्य संपन्नः -
सर्वेश्वरः शंभुराकाशमध्ये श्रूयते - ततः
१यता सर्वभूतानां संहारस्ततः सर्वेतेपामुत्प

त्तिरिति अनन्तानां तेषां यावत्संहृति...
तावत्तत्तैवानन्तशक्तौ शिवे रूपेतिरिति
सर्वसंहर्ता शिव...रुद्रशब्दाभिधेयः -
यदुक्तं संहारस्य हि सात्त्वपत्वात् तन्मूल
क्रोधाद्यनर्थ गुण संबन्धो रुद्रणो भवेदि
ति · तदाविचारविलासः · क्रोधादिमूलस्य
तमोगुणस्य प्राकृतधर्मत्वात् उमास
हायं परमेश्वरं प्रभुमित्यारभ्य समस्तहे
तुं तमसः परस्तादिति श्रुतिरेव भगवती
प्रमाणं - परमेश्वरस्य तमसः परत्वे हि · पौ
राणिकी भणितिरपि परमेश्वरः मोहादिनि
वर्तकादीनां नित्यसंबन्धमाह — ज्ञानं
वैराग्यमैश्वर्यं तपस्सत्यं क्षमा धृतिः।
स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमे
व च ॥ अव्ययानि दशैतानि नित्यं तिष्ठन्ति शं
करे ॥ इति · आत्मशास्त्रमृतास्वादप्रमोदर

सिक्तो युवा। अनन्तानन्द सन्दोह मकरन्द-
मधुव्रतः औदार्य वीर्य गाम्भीर्य माधुर्य मक
रालयः। अखण्ड जगदण्डानां पिण्डीकर
३९ A णपण्डितः- इत्यादि च असौ वितृपैः।
शिवः परमेश्वरो हि सिसृक्षुः सोकाम
यत बहुस्यामिति। बहुप्रपञ्चं विभाव
नाया त्मनो मया लक्षणामिच्छारूपां
शक्तिं आश्रयति। सतपोतप्यतेति। त
पः स्वरूपया ज्ञानरूपया शक्त्या सक
लजीवकर्मानुगुण तत्तच्छरीरनिर्माण
सामग्रीमालोचयति। आलोचयन् संकल्पि
त सकल विकल्प विदग्धया क्रियाशक्त्या
इदं सर्वं सृजतीति इच्छाशक्तौ.. नि
खिल जगच्चित्रमुन्मीलयति। तदेवानु
प्राविशदिति सकलकार्यमनुप्रविश्य श
क्तित्रय सम्बन्धेन त्रिगुणभिन्न त्रिमूर्तिः

तद्यदि पापक्षयरूपो भवति तर्हि सर्वेश्वरस्य सर्वज्ञस्य शिवस्य महिमा केन विज्ञायते अतस्सर्वसंहर्ता परमेश्वर इति ॥

॥ प्रकरणाच्च ॥

महान्तं विभुमात्मानं मत्वा धीरो न शोचति नायमात्मा प्रवचनेन लभ्य इति परमेश्वरस्य वा हि प्रकरणं अतश्च परं ब्रह्म परमेश्वरः सर्वसंहर्ता कर्ता नान्य इति सिद्धं ॥

इहाधिकरणे सर्वसंहर्तृत्वलक्षणेन सिद्धस्य परमेश्वरस्य वा सुवर्णवित्त्यादिना प्रसिद्धं स्वभूत जीवसाहचर्यमपि व्यंजयितुं अधिकरणारंभः ॥

॥ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥

ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रवि

२९. पू. परमं परार्ध्ये – छायातपौ ब्रह्मविदो
उ. वदन्तीति श्रूयते अस्य विषयः – इह सुकृ
तस्य लोके परार्ध्ये ब्रह्मादि शरीरे हृदय
गुहां प्रविष्टौ फलभोक्तारौ छायातपा
वे.वि. लक्षितौ काचिच्छ्रूयते – तावेतौ
चित् श्रूयते ततोऽवेतौ बुद्धिजीवौ जीवप
रमेश्वरौ वेति सन्देहः । पू. बुद्धिजीवावेव
तौ कुतः ऋतं पिबन्ताविति भोक्तृत्वाव
गमात् परमेश्वरस्य भोक्तृत्वं – अनश्न
न्नन्यो अभिचाकशीति दर्शनात् – बु
द्धिजीवयोः भोक्तृत्वं प्रसिद्धमेव किंतु जी
वपरमेश्वरयोः चेतनरूपयोः छाया
तपवदत्यन्त वैलक्षण्यं नास्ति – बुद्धेरचेत
नत्वात् अस्ति जीवाद्वैषम्यं तद्वद्बुद्धिजी
वाविति प्राप्ते ब्रूमः – जीवपरमेश्वरावे
व गुहागतौ तयोरेव तद्दर्शने सम्भ

नुप्रविष्टं गुहाहितं इति गुहाप्रवेशादर्शनात् । यदुक्तं ईश्वरस्य न भोक्तृत्वमिति तदपि युज्यते प्राणारामं मन आनन्दं इति ब्रह्मणो प्यात्मानामस्य मनोमात्रविषय स्वरूपानन्द भोगदर्शनात् यथा पुराणेऽपि आत्मशब्द मृतास्वाद प्रमोद रसिको युवा । अनन्त परमानन्द मकरन्द मधुव्रतः ॥ इत्यादि जीवस्य

३६ A स्वकर्मफल भोक्तृत्वं मतमिति तयोर्भोक्तृत्वस्य साधारणत्वे तत्र विशेषः समाहितः । तेन भोक्तृविशेषात् यथा राजभृत्यादयः अन्नं भुञ्जते इत्यत्र तत्तदुचितान्नविशेषः यदुक्तं तयोर्वैषम्यं तन्न सम्भवति नित्यानित्यानां चेतनाचेतनानामित्यादि

चेतन श्रुत्या नित्यत्वचेतनत्वादिना जीवेश्वरयोस्साम्येऽपि वैषम्यस्य मनादिमलसम्बन्धभावाभावाभ्यां तत्सम्भवति मलिननि

र्मिलयो जीवेश्वर छायातपवद्वैधर्म्यमु
चितं ज्ञाज्ञौ द्वि शा निशापित्यादि श्रुत्या
त्वा न्वात्त्वा ज्ञत्वं स्वतन्त्रत्वादि^ वैधर्म्यं चावग ^धर्म
म्यते - ननु कथमेतयोः शरीरसंबन्धे स
मानेपि कस्यचिद् ज्ञत्वादिकानर्थसंबन्धः
कस्यचिदनर्थाभाव इति चेन्न। सुखदुःख
योर्नैकात्थत्वं प्रयोजकं ^स्वातन्त्र्यास्वात ^किंतु
न्त्र्यमेव - तथाहि श्रुतिः अनिशया मुह्यति
शोचमानो जुष्टं यदा पश्यत्यन्यमीशं तदस्य
महिमानमेतीति· अस्याः संप्रदायिकोर्थः
जीवोयमनादिना कर्मनिगडेन बद्धः ^तत्फल
भोगानुगुणमायामय कलुकलेवर प्रविष्टो
दुर्वारतापसंघातमनुभवन्ननतिशया पार
वश्येन तद्व्यपोहितः अकुशलवद् शोचमानो
मुह्यति महामोहजलधिमग्नो वर्तते - स्वप्रेम
२६ 13 कतया स्वजुष्टं सर्वानुग्राहकमीशमुमासहि

तं यदासौ पुनरस्य प्रसादेन पश्यति अपरोक्षेण जानाति तदास्य महिमानं निरतिशय महिमानं, मोहशोकः प्राप्नोतीति - अत एव, तन्त्रस्य शिवस्यानादि मुक्तस्य शरीरसंबन्धेऽपि जीवत्वं न तत्त्वयात दोषापत्तिः तस्मात्सर्वोपपत्त्या जीवपरमेश्वरौ गुहागतौ॥
पुनरुपपत्तिमाह—

॥ विशेषणाच्च ॥

जीवपरमेश्वरावस्मिन् प्रकरणे विशेष्यते नजायते न म्रियते वा विपश्चिदित्यादिना जीवः अणोरणीयान् महतोमहीयानित्यादिना परमेश्वरः, मे तद्विशेषण जीवबुद्धिपक्षे कथं संभवति ततो जीवपरमेश्वरावेव गुहां प्रविश्य प्रेर्य प्रेरकभावेन न..स्थिताविति निर्णयः.
हृदयगुहागतस्योपास्यतया परमेश्वर-

स्य पुनरिहोपासनस्थानान्तरत्वमुच्यते
॥ अंतर उपपत्तेः ॥
छान्दोग्ये श्रूयते अस्य विषयः य एषो
ऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच
एतदमृतमभयमेतद्ब्रह्मेत्यादि । ब्रह्मामृत
त्वादि लक्षणो ह्ययं श्रूयमाणः पुरुषो
ईश्वरो वा त्यो वेति संशये परमेश्वरादन्य
इति वदामः । परमेश्वरस्य दहरं विपाप्मं
पञ्चकोश प्रतीकाशमेत्यादिषु हृदयपु
ण्डरीकद —— सन्निधान श्रवणात् - जीव
३८ अ स्यतु रूपादि ग्रहणेन चक्षुरिन्द्रिय प्रवेशो
स्ति मनस्संबन्धात् सप्रवाप्नि पुरुषः
अथवा छाया पुरुष इति प्राप्ते इति रूप
यामः परमेश्वर एवाक्ष्यन्तः पुरुष इति
निरुपाधिकामृतत्वाभयत्वादिनाम्नस्मिन्न
नोपपत्तेः यदुक्तमक्ष्यन्तःस्योतिरीश्वरस्य

नकुतेत्यत आह - तितताह -

।। स्थानादिव्यपदेशाच्च ।।

यश्चक्षुषि तिष्ठ, यश्चक्षुर्न वेद यस्य चक्षुः शरीरं यश्चक्षुरन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यादिश्रुत्या चक्षुः स्थानस्थिति नियमनादिकमीश्वरस्य व्यपदिश्यते। अतः परमेवायमीश्वरः -

जीवपक्षे पुनरनुपपत्तिमाह -

।। सुखविशिष्टाभिधानादेव च ।।

कं ब्रह्म खं ब्रह्मेति पूर्वमस्यैव सुखविशिष्टताभ्यासाभिधानादयमीश्वरः न संसारिणी जीव इति निरतिशय सुखसंभव इति शेषः -

यदुक्तं अक्षिपुरुषस्य छायारूपत्वे तताह -

।। अत एव स ब्रह्म ।।

यतएव भवभय भीताय उपकोसलाय कं ब्रह्म जिज्ञासवे कं प्राणं खं ब्रह्मेत्युपदिष्टं यच्च सुखं तदेव खमिति सुखशब्दाभिधेय आकाशः परमेव ब्रह्म तच्छायापुरुषस्थं किमीदृशोपपत्तिरस्ति जीवस्य

3६ 13. वाऽतोऽर्थतः पुरुष ईश्वर इति जीवपरत्वे स्यनुपपत्तिरित्याह – ॱ द्वियम

॥ श्रुतोपनिषत्कगत्यभिधाना च ॥

श्रुत ब्रह्मस्वरूपाणां अधिगतव्याया – अर्चिरादिगते रांक्षे पुरुषो श्रुतवन्त अर्चिषमभिसंभवतीत्यादिना भिधानां नसौ जीवः किन्तु ईश्वरएव

॥ अन..वस्थितेरसंभवाच्च – नेतरः ॥

अस्य महोपनिषदि शङ्क्यते विषयः

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठेच समाश्रितः -
ईशस्सर्वस्य जगतः प्रभुः प्रीणाति वि
श्वभुगित्यादि - इहाङ्गुष्ठमात्रत्वादिविशि
ष्टः परमेश्वरोऽन्यो वेति संशयः - प्राणाग्नि
होत्रप्रकरणात् अङ्गुष्ठमात्र इत्यल्पत्व
पदेशादयं प्राणवायुरेव पञ्चाहुतीनां भो
क्तावगम्यते - न च भोक्तृत्वानुपपत्तिः उप
पक्ष्य प्राणेवीर्यान्नमत्तारौ वह्निमारुता-
विध्यादिषु वायोरपि भोक्तृत्वप्रसिद्धेः -
सर्वव्याप्ययं प्राणवायुरिति पूर्वः पक्षः ।
परमेश्वर एवेति सिद्धान्तः - सकलजगदी
श्वरत्व विश्वभुक्त्वादिनां धर्माणामन्यत्रा
भिधाने यतोऽनवस्था स्यात् तदसंभवाच्च -
ततोऽङ्गुष्ठमात्र ईश्वर एवैतादृशः - तस्य प्रा
णरूपत्वेनापि उपास्यत्वमुच्यते - प्राणानां वा
ष्विरासे ऋक्षे मा विशन्ति कद्वाते प्राणाधारत्वेन

तस्य श्रवणादङ्गुष्ठमात्र प्रमाणस्योपा
३८ १. स्यत्वादिस्य विरोधः- प्राणवायोर्भोक्तृत्व
स्थितावपि विश्वभोक्तृत्वस्यान्ते न सम्भवति-
अतोऽयमीश्वर एव प्राणाभिधेयोऽत्र.. इत्येतेन
प्राणरूपः प्रतिपाद्यत इति। सर्वज्ञस्य सर्वश-
क्तेः सर्वानुग्राहकस्य विभोरपि शिवस्य प
रब्रह्मणः स्वविभूतिभेदेऽन्यपुरुष हृदय पुण्डरीका
दिषूपासनाय स्थितिरुपपादिता- सर्वत्र
तामुपपादयितुं इदमधिकरणमारभ्यते—

"अन्तर्याम्यधिदैवादिषु तद्धर्म
व्यपदेशात् ॥

अन्तर्यामिब्राह्मणमस्य विषयः श्रूयते-
यः पृथिव्यां तिष्ठन् यः पृथिवीमन्तरो यं
— — — न वेद यस्य पृथिवी शरीरं स
त आत्मा अन्तर्याम्यमृत इत्येवं पृथिवी
मारभ्य प्रतिपर्याय मध्यकात्मतत्त्वपर्यन्त

मेवमखिल वस्तु विषयः श्रूयते यः पृथि
व्यां तिष्ठन् यः पृथिवीत्ते संशयः - स्वोपा
र्जित विशिष्ट फल भोगाय सकल भूतेन्द्रि
यानु प्रवेशो जीवस्य युज्यते सकल चेतनोपा
दानतया सर्वभूतानु प्रवेशो विराट् पुरुष
स्य युक्तः अथवा महदादि रूपेण परिण
तत्वात् प्रधानस्य सर्वव्यापकत्वमुचित
विश्वाधिको रुद्र इति विश्वाधिकत्वेन निखि
ल विकारोत्तीर्णस्य परमेश्वरस्य विकार
रूप प्रपञ्चानु प्रवेशो नघटते ततः परमेश्व
रमन्तरेण जीवादिषु कतमः स्यादन्तर्या
३८· 13 मी ति पूर्वपक्षे प्राप्ते ब्रूमः - पृथिव्याद्य
न्तर्यामितया श्रूयमाणः परमेश्वर एव
सर्व ति..त्वादि तद्धर्म व्यपदेशात् - अ
थर्वशिरसि च - सोऽन्तरादन्तरं प्राविशत्
इति परमेश्वरस्यैव सर्वात्मतयानुप्रवेश

दर्शनात् ऋतमन्तर्याम्यमृत इति शिवज्ञानादि मुक्तोऽमृत इत्युच्यते एतानि वा अमृतस्य नामधेयानीति श्रुति श्रवणात् तथा विश्वाधिको रुद्रः, इति विश्वाधिकत्वं परमेश्वरस्य श्रूयते - तथा विश्वरूपत्वमपि सर्वो वै रुद्रः इत्यादिषु सर्वविकारानुप्रवेशोऽपि तद्विकारस्पर्शलेशो नास्ति खलु प्रतिपर्यायममृत शब्द प्रवेशः - अथर्वशिरसि च यो वै रुद्रः स भगवान् - भूर्भुवः सुव यश्च ब्रह्म तस्मै नमो नम इति ब्रह्म विष्णु रुद्रो मा लक्ष्मी सरस्वती गणेश स्कन्देन्द्रादि लोकपाल भूरादि सप्तलोक पृथिव्यादि पञ्चभूत सूर्य सोम ग्रह नक्षत्र कालादि रूपेण प्रत्येकमेवाभ्यस्तो निरूप्यते परमेश्वरः -- तत्रापि सकल चिन्तानुप्रवेशादस्य पुरुषार्थस-

बन्धो भवतीति शङ्कायां प्रतिपर्याय मेवं
यामि मे गाढगुण सं बन्धाभिधायि भग
वच्छब्द प्रयोगः कृतः. ततः सर्वात्मा च
शिवः परमेश्वर इति युक्तमेव-
यत्तु शंकितं प्रधानादीना मन्तर्यामि
त्वं उचितमिति तत्परिहरति-
३९ A ॥ नच स्मार्तमत. धर्माभि-
- लापात् ॥
न स्मार्तं प्रधान मन्तर्यामीति श्रुतं-
तस्य विकार जडत्वादि धर्माना मेला
पात् न शारीरो विराट् पुरुषस्य-सक
ल नियामकत्वाद्यनुपपत्तेः- जीवस्य न
भवतीत्याह-
॥ उभयेऽपि हि भेदेनैव. सू. म
धीयते ॥
उभये काण्व माध्यन्दिन शाखिनस्य

यो विज्ञाने तिष्ठन् य आत्मनि तिष्ठ
न् इत्यादिना- जीवादन्तर्यामिणः भे
देनाभिधीयते अतः परमेश्वरस्यैव सकला
न्तर्यामित्वं न प्रधानस्य विराट्पुरुषजीवा
नां संभावितमिति प्रसिद्धं-
इह प्रत्यक्ष पृथिव्यादि रूपत्वेन प्रतिपादित
स्य तस्य दृश्यत्वादिकं नास्ति इति प्रतिपाद
यितुमधिकरणमिदमवतार्यते॥

॥अदृश्यत्वादिगुणको धर्मोक्तेः॥

अथ परा यया तदक्षरमधिगम्यते - यद्दे
द्दृ. कद्दृश्यमस्थूलमित्यारभ्य यद्भूतयोनिं
परिपश्यन्ति धीरा इत्यादि श्रूयते। अस्य
विषयः - उक्ताक्षरशब्दवाच्यः प्रधान
जीवः परमेश्वरो वेति सन्देहः - प्रधान
मन्त्ताक्षर शब्दवाच्यं यद्भूतयोनिमि
ति पू.स्य महदादि परिणामिनो भूतयो-

नित्वसंभवात् अथवा जीवस्याक्षरं प्र
धानं प्रधानं ममत्वाक्षरं महर इति श्रु
त्या अक्षरशब्दवाच्यत्वमुक्तेति एकमेव
२९ 13 शेन महाभूतयोनित्वं च अनयोरेवाक्ष
रशब्दवाच्यत्वमिति प्राप्ते ब्रूमः - परमेश्व
र एवाक्षरशब्दवाच्यः यः सर्वज्ञः सर्व
वि यस्य ज्ञानमयं तप इत्यादि तद्धर्मोक्तेः
नहि परमेश्वरादन्यस्मिन् सर्वज्ञत्वादि
कं संभवति यदुक्तं - भूतयोनित्वं -
जीवप्रधानयोस्तदप्युक्तमेव तयोरचेत
ना सर्वज्ञयोस्तत्सामर्थ्याभावात् पुनरन्य
जीवप्रधानयोरनुपपत्तिमाह—
॥विशेषणभेदव्यपदेशाभ्यां च नेतरौ॥
अत्रैकज्ञानेन सर्वविज्ञानं प्रतिज्ञाय
ते तद्विशेषणव्यपदेशौ न प्रधानमक्षरश
ब्दवाच्यं अक्षरात्परतः पर इति जीवादि

श्वरस्य भेदव्यपदेशाच्च नजीवस्य ॥

॥ रूपोपन्यासाच्च ॥

अग्निः मूर्धा इत्यादिना ईश्वरस्य त्रैलोक्य
रूपत्वमुपन्यस्यते ततश्च सकलात्मप
रमेश्वर एवात्राक्षरपदाभिधेयः॥ प्रा
णाधारत्वेन पूर्वमुपास्यत्वेनोक्तस्य पुन
र्जाठराग्नि रूपत्वेनोपास्यत्वमाह —

॥ वैश्वानरः साधारणशब्दविशे-
षात् ॥

यस्त्वेवं प्रादेशमात्रमात्मानं वैश्वानर
वमु मेवोपास्ते स सर्वेषु लोकेष्वित्यादि छा
न्दोग्येऽस्य विषयः श्रूयते अत्रोपास्यत
या वैश्वानरशब्दवाच्यः परमेश्वरो जाठ
राग्निर्वेति सन्देहः - पूर्वपक्षन्यायस्तु
४०A वैश्वानरशब्देनात्र जाठराग्निरुच्यते। ए
एवा अग्निर्वैश्वानर इत्यादौ वैश्वानरश

दस्याग्नौ प्रसिद्धत्वात् वैश्वानरे द्वादश
कपाले.... पुत्रे जात इत्यादिषु उपासका
नां तत्तत्फलदातृकत्वदर्शनाच्च प्रादेशमा
त्रमिति प्रादेशमात्रमिति परिच्छेदावगमा
च्च न परमेश्वर इति प्राप्ते अत्रोच्यते-
परमेश्वर एव वैश्वानर इति सिद्धान्तः
कथं वैश्वानरशब्दस्याग्नौ साधारणेप्य
स्मिन् प्रकरणे परमेश्वरसाधारण द्युमूर्धा
दिशब्दैः विशेष्यमाणत्वात् न जाठरा
ग्नौ...द्विशेषणं संभवतीति ति- अतः
परमेश्वर एव वैश्वानरशब्दवाच्यः तत्र
परमेश्वरपक्षे प्रमाणमाह —
। स्मर्यमाणमनुमानं स्यादिति ॥
अग्निर्मूर्धेत्यादिषु द्युलोकादि पृथिव्य
न्तत्वमुक्तं तादेह प्रत्यभिज्ञायमानं तस्य प
रमेश्वरत्वे लिङ्ग." —

॥शब्दादिभ्योऽन्तः प्रतिष्ठानान्ने
ति चेन्न तथा दृष्ट्युपदेशाद
सम्भवात्पुरुषमपि चैनमधि
धीयते॥

एष वा अग्निर्वैश्वानर इत्यादि शब्देभ्यः सामा-
नाधिकरण्येन प्राणाहुत्याधारादि
भ्यः पु..पेऽन्तः प्रतिष्ठितमित्यादेश्च -
नासौ परमेश्वर इति चेत् न जाठराग्नि
रूपतयोपास्यत्वेनोपदेशात् केवलस्य
जाठराग्नेस्त्रैलोक्य शरीरत्वाद्यसंभवाच्च
४०। 13- स एषोऽग्निर्वैश्वानरो यत्पुरुष इत्येनं -
वैश्वानरमपि पुरुषं अधीयते वाजिनः
निरुपाधिक पुरुष शब्दवाच्यस्तु पर
मेश्वर एव तेनेदं पूर्णं पुरुषेणेति श्रव
णात् अतः परमेश्वर इति युक्तः।
॥अत एव न देवता भूतं च॥

यतोयं वैश्वानर स्त्रैलोक्य शारीरकः पुरुष शब्दवाच्यश्च अतएव नदेवताग्निर्न तृतीयं भूतंच," इह जाठराग्ने रूपत्वेनोपास्यत्वे सिद्धं परमेश्वरस्य च तयोजन भेदं आचार्यो न्तराणी दर्शयति ॥

॥साक्षादप्यविरोधं जैमिनिः॥

जाठरस्य मग्नि शब्दत्वेनोपास्यत्वान्नेदं मग्नि शब्द सामानाधिकरण्यम्, अग्ना नयनादि योगेन परमेश्वर एव हि शब्दस्य साक्षाद् वृक्षेः सामानाधिकरण्यविरोधं जैमिनि रुचात्.

॥अभिव्यक्तेरित्याश्मरथ्यः॥

यस्त्वेतमेवं प्रादेशमात्त मित्यपरिच्छिन्नस्य प्रभृति परिच्छेद्यत्व मुपासकाभिव्यक्त्य इत्याश्मरथ्य मु ----

॥— स्मृतेरिति बादरिः॥

द्युप्रभृति पृथिव्यन्तस्य मूर्धादि पादाव
यवकल्पनं अनुस्मृतये ब्रह्मप्राप्त्यै इ
ति बादरिः॥

संपत्तेरिति जैमिनिस्तथा हि
दर्शयति॥

उर एव वेदिर्लोमानि बर्हिर्हृदयं गा
र्हपत्य इत्यादिनोपासकस्योरःप्रभृ
[illegible]२३१ तीनां वेद्यादित्वकल्पनं विद्याङ्गभूता
A. याः प्राणाहुतेरग्निहोत्रकल्पनार्थमिति
जैमिनिर्दर्शयति च॥ अत्र य एवं विद्वान्
अग्निहोत्रं जुहोतीति-

॥आमनन्ति चैनमस्मिन्॥

तैत्तिरीयकाः एनं परमेश्वरमस्मिन् उपा
सके शरीरे प्राणाहुतिवेलायां भोक्तृतया
शिवो माविशाप्रदाहाय प्राणेषु प्रीणा
मि विश्वभुगिति चामनन्ति अतस्सक

लाचार्यमते सर्वथा न्यायेनच जाठराग्नि-
रूपेण परमेश्वर एवाराध्यः प्राणाग्नि
होत्रेणेति समीचीनः॥

इति।
श्रीकण्ठाचार्य विरचिते ब्रह्ममीमांसा
भाष्ये प्रथमस्याध्यायस्य द्वितीयः
पादः॥

श्रीः

इह पादे स्पष्टास्पष्ट ब्रह्मलिङ्गानां वेदान्त
वाक्यानां विचारप्रसङ्गाद्विकारनिरूप
णं चाक्रियते

॥ द्युभ्वाद्यायतनं स्वशब्दात्॥

यस्मिन् द्यौः पृथिवी चान्तरिक्षं
ओतं प्रोतं च मनः इत्यादिकमस्य विषयः
श्रूयते मुण्डकोपनिषदि - अत्र द्युभ्वाद्याधार

तया श्रूयमाणः परमेश्वरोऽन्यो वेति सं
शयः - एवं सति परमेश्वरादन्यो वा वा
युरेव द्युभ्वाद्याधार इति गम्यते वायुना
वै गौतम सूत्रेणायं लोकः परश्च लोकः
सर्वाणि भूतानि संदृब्धानि इति श्रुतेः -
तस्य सर्वाधारत्वप्रसिद्धेरिति प्राप्ते ब्रूमः ।
४१ 13 परमेश्वर एव द्युभ्वाद्यायतनत्वेन श्रूयते -
कुतः तमेवैकं जानीथ आत्मानमित्यात्मश्र
वणात् सूत्रात्मनो वायोरपि आत्मशब्दवा
च्यत्वेन दोष इत्यत आह ।

।। मुक्तोपसृप्यव्यपदेशात् ।।

तथाहि विद्वान् पुण्यपापे विधूय निरं
जनः परमं साम्यमुपैति तथा विद्वा
न्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति
दिव्यं इति पुण्यापुण्यैर्निर्मुक्तानां मुक्ताना
मप्राप्यतया व्यपदेशाच्चायं परमेश्वर एव ।

कथमेतद्वाक्ये न संभवति परमेश्वरात्मक एव वायुमूर्तेरेकत्वात्, ततो न वायुरिति निर्णयः -

।नानुमानमतच्छब्दात् प्राणभृ च्च ॥

अनुमानगम्यं प्रधानमेव भूम्याद्यायतनं तस्य सर्वोपादानत्वादिति न वाच्यं- एतच्छब्दात् प्राणभृज्जीवस्य अनुपपत्तेरिति -

। भेदव्यपदेशात् ॥

ततेश्वरस्य जीवाद्भेदो --- दृश्यते ∴ अनीशया मुह्यते शोचमानो जुष्टं यदा पश्यत्यन्य मीशमिति ततः स्वतः परमेश्वरो द्युभ्वाद्याधारः ।

॥ प्रकरणात् ॥

अथ परा यया तदक्षर माधिगम्यत इति

परस्य खल्विदं प्रकरणं अतश्चे
श्वरः ॥

॥ स्थित्यदनाभ्यां च ॥

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं
५२ A परिषस्वजाते तयोरन्यः पिप्पलं स्वा
द्वत्त्यनश्नन्नन्यो अभिचाकशीति, इति जीव
स्य कर्मफल प्राशनमुक्त्वा नाशनेन प्रदी
प्यमानस्य परमेश्वरस्याभिधानात् अतस्से
सारिणो ऽन्तरभूतः परमेश्वर एवात्त यु
हाप्रापन्नमिति निर्णयः - मुक्तप्राप्यत
या इह प्रतिपाद्यस्य परमेश्वरस्य प्राप्ति
प्रयोजनं निरतिशयसुखं दर्शयति -

॥ भूमा संप्रसादादध्युपदेशात् ॥

छान्दोग्ये भूमात्वेव सुखमित्युक्त्वा
भूम्नस्य रूपमाह - यत्रनान्यत्पश्यति
नान्यच्छृणोति नान्यद्विजानाति स भूमेति -

तद्गतसन्देहः परमेश्वर स्तदन्यो वेति भूम
शब्दवाच्यः परमेश्वरादन्यः प्राणएव-
भूमा- पूर्वेषु नामादिषु तत्वेषु अस्मि भ
गवो भूय इति नारदप्रश्ने सनत्कुमारः
द्वि अस्तीति नामानि निर्दिश्य प्राणस्योपरि
प्रश्न प्रत्युक्तेर्मां विनैव यतो भूयमान
मवतारयति न परमेश्वर स्तत्र प्रसक्तः
अतो भूमा प्राण इति प्राप्ते ब्रूमः- अत्रपर
मेश्वरएव भूमशब्द निर्दिष्टः ॥संप्रसादा
दध्युपदेशात् ॥ संप्रसादो जीव उच्यते अ
थ यएषं संप्रसाद इति श्रुतेः - स च्चात्र
प्राण शब्देन निर्दिश्यते अस्मादूर्ध्व
मात्मानं रत्वेर. भूमोपदिश्यते- एषतु
४२ 13. वा ति. अ. अग्नि वदति यः सत्येनातिवदती
त्यादिना ततः प्राणशब्देन निर्दिष्टात्
पुरुषादन्यः परमेश्वरएव भूमा-

॥धर्मोपपत्तेश्च॥

स भगवः कस्मिन् प्रतिष्ठितः स्वेमहिम्नी
त्यादिना महिम प्रतिष्ठितत्व सर्वकारणत्व स
र्वात्मत्वादयो धर्मा उपदिश्यंते तेषां पर
मेश्वर एवोपपत्तिः न प्राणादिके
तत ः परमेश्वर एव भूमा नापर इतिश्च
सिद्धं - ननु पूर्वत्राधिकरणे निरंजनं सा
म्यमु - - - - तीति मुक्तात्मनां ब्रह्म साद्दश्य
माभिहितं ततो ब्रह्मणः सायुज्य मुपगता
- मुक्तात्मानः तत्स्वरूपभूत वन्त इति सि
द्धं यत्र नान्यत्पश्यति नान्यद्विजानाति
स भूमेति भूम शब्दवाच्ये ब्रह्मणि दृष्टे ना
न्यत्पश्यतीत्यादिना तान्निष्ठ भेदः प्रपं
च निषेधः क्रियते - कथमिह सांगत्य
मिति चेत् न.. भूम्नि प्रत्यक्षे नान्यत्प
श्यतीत्यादेरयमभिप्रायः निरतिशयसु

स्वस्वभावे यस्मिन् साक्षात्कृते सुखान्तरा
भिलाषेण रूपारूपाभिविषयदर्शनादौ
न प्रवर्तते तन्मनाः पुरुषः स भूमाख्य
इति ब्रह्मानन्दलवप्रदा एवाभिवि
षयसुखविशेषाः - तथाह श्रुतिः
- - एतस्यैवानन्दस्य सर्वे मात्रामुपजीव
न्तीति तस्माद्धि न ब्रह्मणि द्वैतनिषेध
४३ असिद्धिः - प्रपञ्चे सत्ये कथं मुक्तात्मनां
पुरुषाणां तद्दर्शनं परिह्रियत इति न वि
चार्यं मुक्तानां प्राकृतप्रपञ्चो न तद्द
र्शनविषयः किन्तु निरतिशयानन्दस्व
रूपं ब्रह्मैव प्रपञ्चाकारेण दर्शनगो-
चरो भवति तथा हि श्रुतिः — एतत्ततो
भवति आकाशशरीरं ब्रह्म सत्यात्मप्रा
णारामामिति आप्नोति मनसस्पति
मित्यादिना मुक्तात्मा प्रस्तुतः तस्य

वाक्पातेरित्यादिना स्वाधीना प्राकृतवि
शुद्ध वागादि दिन्द्रिय संबन्ध उच्यते-
तस्य पुनस्तादृशस्य तत्तद्दशावस्था
प्राप्त्यनन्तरमेतद् दृश्यमानं प्राकृतप
पञ्च जालं आकाशशरीरं चिदंबरप्र
काशशरीरं ब्रह्मैव भवतीति तात्पर्या-
रहस्यार्थः ततो मुक्तानां ब्रह्मणा सा
दृश्यं तत्समरसीभूत प्रपञ्च दर्शनत्व
मिति सर्वं समीचीनं-
(अक्षरमंबरान्तधृतेः।)
बृहदारण्यके श्रूयतेऽस्य विषयः
एतद्वै तदक्षरशब्दवाच्यः इहोत्ते पूर्वः
पक्षः कुतः अक्षरशब्दवाच्यः ते
था छान्दोग्ये- प्रणवो जीवः परमेश्व
रो वेति- प्राण, भूतयोरन्यतर एवा-
क्षरशब्दवाच्यः इहोति पूर्वः पक्षः कुतः

अक्षरशब्दस्य वर्णपर्यायत्वात् प्रणववाच
४३/१०. कत्वमुचितं पुरुषोक्षरमुच्यते इति पु
रुषस्यापि तदभिधेयस्य मुक्तं अत
स्तावेवाक्षरशब्दनिर्देश्याविति प्रा
प्ते ब्रूमः - अत्राक्षरशब्दवाच्यं परब्रह्मैव
कुतः अंबरान्तधृतेः यदूर्ध्वं गार्गि
दिव इत्यारभ्य सर्वविकाराधारतया
निर्दिष्टआकाशः कस्मिन्नोतश्च प्रो
तश्चेति पृष्टे एतदक्षरमिति निर्दिष्ट
स्य कँ..र्..त प्रपञ्चस्य धृतिरवग
म्यते॥ कथमेतदन्यत्र परमेश्वरात्
संभवतीति तत्र परमेश्वर एवाक्षर
शब्द प्रतिपाद्यः -

॥ सा च प्रशासनात् ॥

सा च धृतिरस्यैवा अक्षरस्य प्रशा
सने गार्गि सूर्याचन्द्रमसौ विधृत न.

ति पूत इत्यादिना प्रकृत मन्त्रा-
वगम्यते। तज्जगाद्व्यासनं स्य जीवस्य
संभवति एकएवरुद्रो नद्वितीयाय
तस्थे इति जगाद्व्यासने परमेश्वरस्य
द्वितीयाभावः श्रवणात्- अतः परःएवा
क्षर नामधेयः-

॥ अन्यभाव व्यावृत्तेश्च ॥

अन्यभावे न्यान्तरत्वं अदृष्ट---
त्यादिना परमेश्वरस्यान्यभाव व्याव
र्तयति प्रणव जीवादि पक्षे तदसंभवात्
अतः परमेश्वर एवाक्षरं इति निर्णयः
प्रत्यक्षादि प्रमाणातीतस्यापि परमेश्वरस्य
१४. A परम करुणावशादुपासक प्रत्यक्षमुप
पादयितुमेतदधिकरण मारभ्यते-

॥ ईक्षतिकर्मव्यपदेशात्सः ॥

अस्य विषयः- प्रश्नोपनिषदि श्रूयते-

यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण
परमपुरुषमभिध्यायीत इत्यारभ्य · पु
तस्माज्जीवघनात् परात्परपुरुषमु
रिशयमीक्षत इत्यादि उक्त ईक्षतिक
र्मत्वेन श्रूयमाणः परमेश्वरो न वेति
संशयः । नासौ परमेश्वरः हिरण्यगर्भ
एव सामभिरुन्नीयते ब्रह्मलोकमिति ·
तस्य लोकप्राप्तिश्रवणात् परशब्दस्य -
जीवोत्कृष्टतया तस्मिन् संभवाच्च - अ
थवा · नारायणः तस्य पुरुषशब्दवाच्यत्वात् -
जीवघनाद्धिरण्यगर्भाच्च परत्वोपपत्ते
श्च - तस्मिन्नेव प्रणवशब्दवाच्यत्व
प्रसिद्धेश्च · तद्विष्णोः परमं पदं स
दा पश्यन्ति सूरयः इति तत्पदस्यैव
विद्वदनुभवविषयत्वश्रवणाच्चेति पू
मः - उक्तेक्षतिविषयः परमेश्वर इ

तत्र तु तमोङ्कारेणायतनेनान्वेति वि
द्वान् यत्तच्छान्तमजरममृतमभयं परं चे
ति सर्वसाधारणानन्तत्वादिधर्मव्यपदे
शात् न हिरण्यगर्भे तत्कार्येण तद्ब्रह्मस्थ
ब्रह्मलोकमिति परब्रह्मणः जीवस्य लो
कः प्राप्यतया गम्यते जीवघनादिति-
४४. 13 जीवसमष्टिरूपो यो हिरण्यगर्भः परा
त्परमात्, तत्परत्वेन ध्येयं हि श्रूयते-
ततो हि ततो हिरण्यगर्भपक्षोऽनयुक्तः
नारायण इति यदुक्तं तद्विचार्यं अमृतमभयं
परं चेति नित्यमुक्तत्वं अभयहेतुत्वं विश्वा
धिकतया परत्वं च कथमस्मिन्नुपपद्यते-
ति विश्वरूपो ह्यसौ जीवघनाद्धिरण्यगर्भा
दपि परात् तत्पुरुषात् नारायणात् परमपु
रुषं म् पुरिशयान्तमन्तर्यामितया तमेव
पुरुषं परं ब्रह्म तदुपासकः साक्षात्पश्यति

ति। नारायणं परं ब्रह्म ऋतं सत्यं परं ब्रह्म
पुरुषं कृष्णपिङ्गलम् ऊर्ध्वरेतं विरूपाक्ष
मिति श्रूयते हि। पुरे दहरपुण्डरीकव
र्तितया। पुरुषशब्दवाच्यं तस्य प्रकृतिली
नस्य यः परः स महेश्वरः इत्यादि
श्रुत्या। प्रणवाभिधेयं नारायणं परं ब्रह्मे
ति। नारायणाद्विश्वरूपप्रा. दधिकं वाङ्-
ङ्मनविपर्यासरहिततया ऋतं सत्यं त्रि
लोचनतया। विरूपाक्षं परशक्त्या प्रणव
वर्णवृत्त्या स्वरूपोमा श्री. शब्दवाच्यया
प्र. अकारतया। कृष्णपिङ्गलं परं सर्वाति
शायि ब्रह्म परात्परं पुरिशयानं पुरुषमीरि
ष्यत इति। ईक्षतिकर्मत्वेन व्यपदिश्य
ते। इति युक्तं। यदुक्तं तद्विष्णोः परं पद
मिति। प्रपञ्चाकारत्वमन्तरेण यन्निरतिश
यानन्दस्वभावं परं रूपं शिवं तदभिधं

परं ब्रह्मेत्य विरोधः - विष्णुशिवयो रुपादा
न निमित्तयोरवस्था भेदमन्तरेण स्वरूप
४६ भेदो नास्तीत्यर्थः ॥ तदिह हरि विरिञ्चा
अ दिः प्रपञ्चोत्तीर्णस्यापि साधकानुग्र
हाय परीक्षायानतया पुरुषस्य परमशिव
रूपो मा शक्लिलित रूपस्य विरूपाक्षस्य
परब्रह्मणः साक्षात्कारः सकलसंसारभ
यनिवृत्तिपूर्वकं तदुपासकानां तद्रूप
प्रापणपरो भवतीति निरूपितं - तद
स्य परीक्षायानमुपासनञ्च प्रकटयितुमि
दं प्रकरणं प्रस्तूयते -

॥ दहर उत्तरेभ्यः ॥

छान्दोग्ये स्यविषयः श्रूयते अथ यदिद
मस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म
दहरोस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्त

दन्वेष्टव्यं तद्विजिज्ञासितव्यमित्यादि - दह
र शब्देन हृ.. भूताकाश उच्यते उत जी
वः परमेश्वरो वेति ~~सन्देहे~~ हे ः (संशयः)
आकाश शब्दस्य वियति रूढतया भूता
काशपरो दहराकाशः अन्यवा जीवो दह
र इति स्वल्प प्रमाणत्वात् तस्याणुभूते
स्मिन् संभवात् व्यापी परमेश्वरो द.
हराकाश शब्दवाच्य इति प्राप्ते ब्रू
मः- परमेश्वर एव दहराकाश उच्यते .
कुतः उत्तरेभ्यो पहत पाप्मत्वादिभ्यो धर्मे
भ्यः अपहत पाप्मा विजरो विमृत्युर्वि
शोको विजिघत्सोऽपिपासः सत्यकामः स
त्य संकल्प इति श्रुति सिद्धेभ्यः इति शेषः
तदेक संसारिणि जीवे संभवतीति तस्मा
दीश्वर एव दहराकाशोऽपहतपाप्मत्वादि
गुणक इति-- ....

॥धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः॥

४५ B अथ य आत्मा स सेतुर्विधृतिरिति - जगद्धृतिः परमेश्वर महिमा अस्मिन् दहराकाशे उपलभ्यते - अतः परमेश्वरमहिमा च दहराकाशः एव सेतुर्विधारण इति श्रूयते

॥प्रसिद्धेश्च॥

दहरं विपाप्मं वरं वेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थं तत्रापि दहरं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम् इति महोपनिषदि - हृत्पुण्डरीकं विरजाभेत्यारभ्य उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तं ध्यात्वेत्यादि कैवल्योपनिषदि च परमेश्वरस्योमासहायस्य दहरं पुण्डरीकाकाशवर्तिनी प्राप्तिः प्रसि

ष्विरवगम्यते ततोपि परमेश्वरो दहरशब्द
वाच्यः. ननु दहर पुण्डरीकमध्य दहरान्त
र्वर्तित्वेन परमेश्वरोपास्यत्व उपनिषद्वे
रे प्रसिद्धं इह दहरस्याकाशत्वेनेति इति चेन्न. अविरोध-
त्वापि दहराकाश वर्ति. परमेश्वर उपास्यः
किं तु दहराकाशस्य परमेश्वरस्य धर्मिणी
संबन्ध प्रतीतेः स्तस्य वाच्यकत्वमस्ये
ति युक्तं .....

॥ इतरपरामर्शात्स इति चेन्ना
संभवात् ॥

अथ य एषः संप्रसाद इति .... तत्रो जीवः
परामृश्यते अतः प्रकृताकाशः स एव
भवतीति चेन्न. श्रुतानां अपहतपाप्म
त्वादीनां तस्मिन्न संभवात् ततः परमेश्व
४६. रएवं तत्परामृश्यत इति युक्तं.
A. ॥उत्तराच्चेदविज्ञान स्वरूपस्तु ॥

उत्तरत्र य आत्मापहत पाप्मेति ---- सं भव श्रूयते जीवत्व लक्षण भवस्थायव त्तिंच तत्स्वरूपवार्यं भवितुमर्हति इति चेन्न सारमेतत् निजानादि कर्म कक्ष्य संबन्ध घटिक कक्ष्कार तिरोहित पाप्मत्वादिको जीवः परंज्योतिरु पसंपद्य पश्चादा विर्भूत स्वरूपतया- - पहत पाप्मत्वादिको को तं प्रतिपाद्यते नसंसार दहराकाशस्तु स्वाभाविका तिरोहित तत्कल्याण इति ततो न बद्धो मुक्तोवात्त दहराकाशः-

॥ अन्य थाऽऽख परामर्शः ॥

अस्माच्छरीरात्समुत्थाय परंज्योतिरु पसंपद्य स्वेनरूपेणाभिनिष्पद्यत इति- जीवस्य दहराकाश निर्देशेन परब्रह्म मासंपद्य स्वरूपा विर्भावोऽवगम्यते-

ताद्दृक्माहात्म्य प्रतिपादनार्थोहि तत्परा
मर्शः न तद्भावत्वात् अतो न विरोधः
।। अल्पश्रुतिरिति चेत्तदुक्तं ।।
अल्प स्थानायतत्वाल्पस्वरूपवत्व प्रती
तेर्नपरोय मिति शंकायाः पूर्वमुक्तमे
वोत्तरं व्योमवच्चेति ।।

।।अनुकृतेस्तस्यच ।।

जीवस्य तस्य ~~जीवस्य~~ दहराकाश निर्दिष्ट पर
ज्योतिरनुकृतिरवगम्यते ....
अतश्चायं न जीव इति तात्पर्यं -
पुनरस्मिन्न प्रमाणमाह -

।।अपिच स्मर्यते ।।

४६. 13. दहरपुण्डरीकान्तर्वर्तित्वं उपास्यत्वं च क
ष्णः स्मर्यते च - अथवा परमात्मानं प
रमानंद विग्रहं । गुरुरूपदेशाद्विबोधये पुरु
षं कृष्णपिङ्गलं ।। कञ्ज कञ्जपुरे ~~मध्ये~~ श..

ह्रि: दहराब्जखमध्यमे। अभ्यासात्संप्रप-
श्यन्ति सन्तस्त्वं च तथा कुरु॥ इत्यादि
ततः परं ज्योतिःस्वरूपं मुक्तपा - - -
- - - त्युमासनार्थं परं ब्रह्म दहर-
पुण्डरीकान्तराकाश मध्यवर्ति स्वाभाविक
पहत पाप्मत्वादि गुणक मुपासनीयमिति-
सिद्धं॥ ततः परमस्योपाख्य रूपान्त
रमुच्यते -

॥शब्दादेव प्रमितः॥

कैवल्यमस्य विषयः श्रूयते- अंगु
ष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति
ईशानो भूतभव्यस्येत्यादि इहांगुष्ठप्र
माणतया श्रूयमाणः पुरुषः परमेश्वरो
जीवो वेति संदेहः जीव इति विवेकु
लालावत शतभागस्य शतधा कल्पित-
स्येत्यादिषु स्वल्पाकारत्वावगमात्

तस्य मध्य आत्मनीति देहान्तरवर्तिनिया
न परमेश्वरो व्यापक इति प्राप्ते वदामः-
परमेश्वर एवाङ्गुष्ठमात्रः इत्युक्तं-
-ईशानो भूतभव्यस्येत्यादि परमेश्वरस्य-
-लिङ्गः शब्दात् सर्वैश्वर्यसंपन्न एवं
भूराकाशमध्यगा इति तस्यैव सर्वेश्वरत्व
श्रवणात्॥ कुतः परमेश्वरे परिच्छिन्न
त्वं अभ्युपगमान मुपपाद्यत इत्याह

18 A हृद्यपेक्षया तु मनुष्याधिका
रत्वात्॥

अपरिच्छिन्नस्यापि परमेश्वरस्याङ्गुष्ठ-
मात्रत्वमुपासकहृदयापेक्षया मनुष्या
धिकारत्वात् उपासनशास्त्रविधेर्मनु
ष्याणां हृदये यावत् तदवच्छिन्नरूपप
रमेश्वरः परमकारुणिकः परिगृह्य
ति तदुपासनसिद्ध्यै मतः परमेश्वरो-

ज्योतिर्मयो लिङ्गरूप उपास्यकानां हृदयमध्ये तिष्ठतीति निर्णयः- मनुष्याधिकारत्वादित्यस्मिन् प्रकरणे मनुष्यमात्राणाँ ईश्वरोपास्यते अधिकारः सूचितः कथं देवानामपि परमेश्वर विषयमुपासनं श्रूयते अथर्वशिरसि ते देवा रुद्रं नापश्यन् ते देवा रुद्रं ध्यायन्तीत्याशङ्कायाँ तदुपपादनार्थेद माधिकरणमारभ्यते -

॥ तदुपर्यपि बादरायणः सम्भवात् ॥

अस्याथर्वशिरसि श्रूयते ते देवा रुद्रं ध्यायन्तीति इति विषयः इह परमेश्वरोपासने देवानामाधिकारस्सम्भवति वा नवेति संशयः सम्भवतीति पूर्वः पक्षः - कुतः - अर्थित्वादिनी तेषु सम्भवात् अर्थी समर्थो विद्वान् शास्त्रेणा

पर्युदस्तो हि स्त इत्यादिकारीति स्यते-
देवानामर्थित्वमेव नास्ति परमेश्वरं प्रति
तेषां अस्यन्त पदस्यैकत्वात् देवाद्वै
स्व — — — — — मृ.ते देवा रुद्रमपृच्छन्
46
13. इति श्रुत्या स्वर्ग एव लोको रुद्रस्य पर
ब्रह्मण४ पदमिति गम्यते- स एव देवानां
मुकुस्याचे स्वराज्यमेव प्राप्यत यावग
म्यते आप्नोति स्वाराज्यमित्यादिषु अतो
नार्थित्वं तेषां वा सर्वेषां च तन्नैव विग्रह
भावात्: विग्रहवत्ता हि स्तुतिष्यानादि
षु कस्यचित्सम्मर्णा इन्द्रे वृत्राय वज्र
मुद्यच्छदित्यादिना प्रामाण्यात्ते
षां विग्रहवत्वं इतिचेन्न तेषां विधै
क वाक्यतापन्नानां अन्यततात्पर्याभा
वात् तथा वैदुष्यसिमापि विद्वात स्य-
ब्रह्मण४ उपासनं देवानामुपनयन संस्का

रपूर्वं वेदाध्ययनाभावेन वेदांत विचारासं-
भवात् ब्रह्मबोधानुपपत्तेः अतएव
तेषां शास्त्रपर्युदासः - तस्मादेव दे-
वानां ब्रह्मोपासनेऽनाधिकार इति -
सिद्धांतस्तु ब्रह्मोपासने देवानामप्य-
धिकारोऽस्तीति - कुतः - तेषामर्थित्वा-
द्याधिकारि लक्षणसंभवात् - नवरमे-
श्वरस्य देवीः प्रदे समानं सामान्येन
सुखवाचकोऽपि स्वर्गशब्दः प्रकरणादि-
ना विशेषमभिधत्ते - यथैश्वरः शब्द
स्वामित्वमात्रवाचकः प्रकरणवशादुपेया-
दीश्वरश्चैव योगक्षेमार्थं सिद्ध्यत्
त्यादिषु जनपदाधिपतिमात्रराजवि-
षयः पुनरपि ब्रह्मणः प्रकरणे निरतिश-
५८ यैश्वर्यवाचित्वं विषयो भवति तथा - सुख-
मात्रवाचक स्वर्गशब्दप्रकरणे प्रमाणं

तदोपपत्त्याच देवानां पदं क्षयित्वसा
तिशयत्वादिदोषकलुषितं स्वल्पसुख
रूपमपि भवति · परब्रह्मणः शिवस्य पदं
तु निरतिशय सुखरूपमनन्त लक्षणमे
व भवति - अतस्सातिशयत्वादि दुष्ट सुखप
दवर्तिना निरतिशय सुख ब्रह्मपद मपा
प्यनिर्वृतस्यैव · तेषामर्थवादप्रामा
ण्यात् · विग्रहवत्वेन सामर्थ्यञ्चास्ति - तथा
आदित्यो यूपो अग्नेर्यमस्य भं पर्ज्वं
रुत्यादीनां गुणवादानुवादानां स्वार्थे
तात्पर्याभावेपि इन्द्रो वृत्राय वज्रमुद
यच्छदित्यादीनां भूतार्थवादानां प्रामाण्ये
न स्वार्थे तात्पर्यदर्शनात् शक्त्यातिशयस्व
पं भूत वेदार्थतया पूर्वाधीत वेदार्थविस्म
रणाभावाद्वा तेषां वैदुष्यञ्च संभवति·
शास्त्रस्य विधायकत्वात् उपासना विधेरस्य

दूरतः तत्पर्युदासः - तस्मादेवायमधिकरणो ब्रह्मविद्यायामिति न विरोधः।
वेदा
देवानां विग्रहादिमत्वे विरोधमाशङ्क्य परिहरति-

विरोधः कर्मणीति चेन्नानेक-
प्रतिपत्तेर्दर्शनात्॥

नानादेशेषु प्रवृत्तेषु यज्ञेषु तत्तदहनानां देवतानां विग्रहादिमत्वात् एकस्यानेकत्र युगपत्सान्निध्यं न युज्यते ततः कर्मणि विरोध इति चेन्न। शं.के.कथ
५८
13 मेतद्विग्रहत्वेऽपि सौहरि प्रभृतिवद्युगपदनेक प्रतिपत्तिः दृष्टा।पि ततो न कश्चिद्विरोधः - .. ~~वैदिके शब्दे विरोधः प्रसज्यते~~ नाभूत् कर्मणि विरोधः वैदिके शब्दे भवतीत्याह-

शब्द इति चेन्नतः प्रभवात्-

— प्रत्यक्षानुमानाभ्यां ॥ ---

कर्मविरोधात्तु वा योऽपि वैदिके शब्देऽवि रोधः प्रसज्यते - कथं देहानां सावयत्वा दि नित्यत्वं स्पष्टमेव ततः इन्द्रादि देवानामप्युत्पत्तेरिति ---- देवोत्पत्तेः प्राग्विद्यमानात् परत्वात् वैदिके न्द्रादिशब्दानां अर्थशून्यता नित्यत्वं वा स्यात् अनित्यत्वे विधिनिषेधवाक्यानां प्रामाण्यं अतस्तत्प्रयुक्तकर्मण्याख्ये छिद्र प्रयत्नापत्तिः ततो वैदिक शब्दविरोध परिहाराय विग्रहवत् देवानामङ्गीकार्य मिति चेन्न वैदिकादेवेन्द्रादिशब्दा त् इन्द्राद्यर्थाः सृष्टेर्यदिन्द्रादि शब्दा व्यक्ति वाचकाः स्युस्तदा खलु इन्द्रादे वि नाशे ते प्रामण्यशून्यं अनित्यत्वं वा स्यात् रावादिशब्दवत् आकृतिवाचकमेवेन्द्रा

दि शब्दानां उच्यते: तथाऽपूर्वस्मिन्निन्द्रादौ
विनष्टे वैदिकेन्द्रादि शब्दादेव ब्रह्मपू
र्वेन्द्राद्याकृति विशेषं स्मृत्वा तदाकार-
परमिन्द्रादिकं कल्पयति. तत इन्द्रा
दि व्यक्तिविनाशेपि तच्छब्दानां नित्य
त्वाद विरोधः किं प्रमाण मिति चेत- श्रु
ति श्च स्मृति श्च. तथा देवादीनां रूपोऽव्या
४९.३. करोत: स एतासतो प्रजापतिः स भूरिति
तिव्याहरत स भूमि समसृजतेत्यादि-
श्रुतिः .... वेद शब्देभ्य एवादावित्या
दि स्मृतिः -

॥ अत एव च नित्यत्वं ॥
अत एव मन्त्रकृतो वृणीते - विश्वामित्र
स्य सूक्तं भवतीति विश्वामित्रादीनामि
न्द्रादि कर्तृत्वेपि मन्त्र ब्राह्मणमयस्य
वेदस्य नित्यत्वं नित्यम्यप्रति . यतोऽप-

श्रौ. वै. दिकाच्छब्दात् अर्थात् स्मृत्वा सृज
ति अनधीत मन्त्रादिदर्शनः शक्तत्वात्
पूर्वं विश्वामित्रादीनां च तत्तद्वैदिकशब्दं
स्मृत्वा ~~सृजन्ति~~ - तदाकारानेवापरांस्तच्छ
क्तिविशेषयुक्तान्.. ब्रह्मा नैमित्तिकप्र
लये गते सृजति - ततस्ते चानधीत्यैव
तावन्मात्तान् अखिलान् पठन्ति - अत
स्तेषां मन्त्रादिकर्तृत्वं वेदनित्यत्वं च - भव
तु प्राकृतप्रलये ब्रह्मादौ भेदाख्य शब्देन-
- पे कथं वेदनित्यत्वमित्यत आह -
समाना.ना. रूपत्व.च. वृ.त्ताव -
- प्यविरोधो दर्शनात्स्मृतेश्च ॥
सृज्यानां समानानां रूपत्वादेव प्राकृ
तप्रलयावृत्तावपि अविरोधो भवति -
तथाहि - सर्वज्ञः सर्वशक्तिः विश्वाधि
को हि परमेश्वर आदिकर्ता पूर्वसंस्थान

प्रपञ्चं स्मृत्वा तदाकारमेव पुनस्सृजति - दे
वानपि पूर्वानुपूर्वं विशिष्टानपि संस्कृत्य
पुत्रभूताय ब्रह्मणे प्रयच्छति · कथमवग
म्यते · श्रुत्या स्मृत्या च । धाता यथापूर्व
४९ 13. मकल्पयत् दिवं च पृथिवीं चान्तरि
क्षमथो सुवः - यो ब्रह्माणं विदधाति
पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै इत्या
दि, स्मृतिरपि · अपव्रव स.स या.दौ तासु
वीर्यमपासृज ब्रह्माणं विदधाति पूर्वं ·
यो वेदानस्मै प्रयच्छतीत्यादि - ततः प्रकृ
त प्रक्रियावृत्तावपि वेदानां नित्यत्वमेव -
मतीतरमाह-

तस्मा, दिष्वसंभवा -
- नधिकारं जैमिनिः ॥

मधुविद्यादिषु वस्वादिदेवानामेवोपास्य
त्वात् प्राप्यत्वाच्च वस्वादीनां कर्तृकर्मभाव

विरोधेन उपास्यत्व संभवात् वसूनांस्तां, वसुत्वं प्राप्तमिति प्राप्यत्वासंभवात्-तत्त वस्वादीनामधिकारं जैमिनिर्मन्यते - .... तं देवा ज्योतिषां ज्योतिरायु र्होपासतेमृतमिति· ज्योतिः पं· परब्रह्म णि· देवानां साधारण्येन प्राप्तत्वेपि आधि काराभाव वचनात्· अन्यत्त वस्वाद्युपास नेनाधिकारोन्यायासिद्धो गम्यते- स्वम तमाह——

॥भावं तु बादरायणोऽस्ति हि-॥

मधुविद्यादिष्वपि वस्वादीनां अधिकारभा वं बादरायणो मन्यते- अस्ति वस्वादीनां सतां स्वस्वरूप ब्रह्म रूपेण उपास्यत्व संभवः कल्पांतरे वस्वादेः प्राप्य संभवश्च का र्यकारणोभयावस्थं ब्रह्मास्तां समुपास्य कल्पांतरे वस्वादित्व मुभयाधिकारावसाने

६०४. ब्रह्मप्राप्तेश्च ततें मध्वादिष्वधिकारसिद्धिः-त
स्मात्सर्वथा.. वेदा ब्रह्मविद्याधिकारिण इति-
अपशूद्रा मनुष्याधिकारत्वादिति सामान्येन
मनुष्याणामधिकारे प्राप्ते विशेषमाह-
।।शुगस्य तदनादर श्रवणात्
~~त~~ सूच्यते हि।।
छान्दोग्ये श्रूयतेऽस्य विषयः - आजहा
रेमाः शूद्रानेनैव मुखेनालपयिष्यथा
इति. अस्याताचार्यः जानश्रुतिं प्रति शूद्रेत्या
मन्त्रयते ततोऽत्र शूद्राणामपि ब्रह्मविद्या
धिकारे शंकास्ति नवेति तेषामधिका
रोऽस्तीति वदामः अर्थित्वादिसंभवात् न
तु त्रैवर्णिकानामपि देवानां तद्दर्शनात् देवा
नामुपनयनाध्ययनाभावेऽपि स्वयंभूत
वेदान्तितया युज्यते तद्वत्ता वचमङ्गी
पामिति न शक्यं तेषामपि पुराणश्रवणादि

ना. बोधोपपत्तेः - निषादस्थपतिन्यायेन-
महावाक्यग्रहणे अधिकारसंभवाद्धमोक्षी
अधिकारी ब्रह्मविद्यायामुचित इति प्रा
प्तेरूमः नास्ति शूद्राणां ब्रह्मविद्याया
मधिकार उपाजहारेमां शूद्रे त्यन्तक
र्थं ब्रह्मविद्योपदेशं न शूद्रे इति शिष्यं
प्रत्यामन्त्रणं इतिं चेन्नयात्ता जाति
योग्येन शूद्रेत्यामन्त्रणं किंतु ब्रह्मज्ञाना
प्राप्त्या शुचं स जातेति दर्शनात् शूद्रे
त्यामन्त्रणं तद्धनाद्धर श्रावणात् ब्रह्मवि
६० 13 द्या वैकल्पेन स्वात्मानं प्रति हंसोक्तान
दर वाक्य श्रावणात् तदैवाचार्यं प्रति -
आद्रवणात् "यत शूद्रेत्यामन्त्रणं - न
जाति योग्येन तत शूद्रस्य ब्रह्मोपासनं
न सूच्यते — अतश्च न शूद्रे
त्यामन्त्रणं जाति योग्येनेत्याह —

॥ क्षत्रियत्वावगतेश्च ॥

शुश्रूषो क्षत्रिय इत्यवगम्यते अतः
क्षत्रिय एव शूद्र इत्याशंक्ते : यदुक्तं
निषादस्थपति न्यायेन शूद्रस्य महावा
क्य श्रवणमात्रेऽधिकार इति तत्राह-

॥ संस्कारपरामर्शात् तदभावा
भिलापात् ॥

विद्योपत्तमे. उपनेष्य उपनयनपरा
मर्शात् शूद्रस्य तदभावश्रावणात्
तस्य ~~तस्य~~ ब्रह्मविद्यायां नाधिकार-
निषादस्थपतिं याजयेदिति विधिर-
स्ति यथा तत्र नविरोधः उपनयनाभावे
पि शूद्रस्य महावाक्यश्रवणे कृतापेनवि
धिप्रसङ्गः - ननु उपनयनाभावेपि
ब्रह्मोच्चारण निषेध एकत्र सर्वत्र पा.
न सर्वेषां शिशोरुपनयनाभावेपि अन्यत्र

स्वसा निनयनं स्वस्था निनयने चि वह्नौ कारण नाशेसं भवात् नै कर्तीति पुज्यते अत्र शूद्रस्याप्यनुपनीतस्य यानना‍द्वे. वह्नौ कारण निषेधो ब्रह्म विद्याया मित्या शङ्कायामाह—

श्रवणाध्ययनार्थ प्रति-
षेधात् ॥

शूद्रस्य वेदवाक्य श्रवणादि निषिध्य
५१ A ते— तस्माच्छूद्र समीपे नाध्येतव्यमिति.

॥ स्मृतेश्च ॥

स्मार्यते च शूद्रस्य वेदाध्ययनादौ दण्डः अथहास्य वेदमुपशृण्वतः त्रपु जतुभ्यां श्रोत्र प्रति पूरण मुदाहरणे जिह्वाच्छेदः धारणे शरीर भेद इति — एवं श्रुति स्मृतिभ्यां शूद्रस्य समीपेऽपि अध्ययनादिकमपि निषिध्यते. वेदस्य कुतः तदर्थ विचारात्मकं तदे

हे सर्वेक्षाप्ः. विवक्षा. ब्रह्मत्वे. णत्वाद्युप.
र.को पनयन संस्कारमंत्तरेण वेदाध्यय
न प्राप्तेर्न कुत्रापि नकुत्रापि. कस्यचिदि
ति सिद्धांतः -तत आर्द्रा ब्रह्मविद्याया
मनधिकरण एव- प्रासङ्गिक मधिका
र निरूपणं कृत्वा प्रकृतमनुसरति -

॥कंपनात् ॥

ॐ अंगुष्ठ प्रमित पुरुष प्रकरणे - यदिदं किंच
मृगत्सर्वं प्राण एजति इत्यादिना प्राणश
ब्दनिर्दिष्ट जनितभयात् सकल जगत्कं
पन मुच्यते. ततः कंपनहेतुः परमेश्वरोऽ-
न्यो वेति संशये परमेश्वरस्य सकलज
गद्भय प्रदस्य मधुरप्रभावस्य जगत्कंप
नहेतुत्वं युक्तं इति प्राप्ते ब्रूमः परमेश्वरस्य
सकल जगत्कंपन हेतुत्वं शासकत्वात्संभवति.
यस्य शासनभयेन सर्वे वयं निषिद्धेषु

विमुखा विहितेषु प्रवर्तामहे - भीषास्मा
द्वातः पवते इत्यादिषु तच्छासनभयात्
९१ः 13 वाय्वादीनां व्यापार प्रवृत्तिरवगम्यते - कल्या
णमूर्तिरपि परमेश्वरः शासकतया भय
दर्शनो भवति तच्छ्रूयते तस्माद्राजमुखं
भीष्मं भयुकं इति तस्मात्स्वामितया स
कलजगद्भयहेतुरीश्वर एव ॥ दहरादि
रूपादितया निर्दिष्टस्य परमेश्वरस्य
ब्रह्मणः प्राप्यत्वमुपपादयितुं अधिकरणमा
रभ्यते

॥ ज्योतिर्दर्शनात् ॥

छान्दोग्यस्य प्रजापति विद्यायां श्रूय
ते विषयः - एष संप्रसादोऽस्माच्छरीरा
त् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रू
पेणाभिनिष्पद्यते स उत्तमपुरुष इत्यादि -
अत्र मुक्तिप्राप्यतया परं ज्योति स्वरूपेण श्रूयमा

ननु परमेश्वरः किं वा नारायणमूर्त्ति-
त्तम वेति संशयः उत्तम पुरुष इति पु
रुषोत्तम शब्दवाच्यतया मुक्तप्राप्यस्य
परंज्योतिषो वचनमात्रः पुरुषोत्तमशब्द
स्य नारायणे रूढतया सगुणात्तोत्तम
शब्दः समानाधिकरणी परंज्योतिरिति
प्राप्ते ब्रूमः मुक्तप्राप्यं परंज्योतिरिह
परं ब्रह्म प्राप्तानामनावृत्तिदर्शनात्
परब्रह्मणोन्यत्र प्राप्तानामनावृत्ति
शब्दः समुचितः पुरुषोत्तम शब्दो-
नारायणे रूढोपि ब्रह्मण्यपि वर्त्तते पुरु
षाणां जीवानाम शक्ततया ब्रह्ममेव
— कल्पेपि वेदितं पुरुषोत्तममिति प्रा
प्यस्य परब्रह्मणः पर्यायत्वेन पुरुषोत्तम
शब्दप्रयोगात् अतः परं ब्रह्मैव परंज्यो
तिः ॥

६२। आकाशोऽर्थान्तरत्वादिव्यपदे-
4· शात्॥

छान्दोग्ये श्रूयते ~~स्वविषयः~~ आकाशो
ह वै नाम रूपयोर्निर्वहितेत्यादि - अत्रना-
मरूपयोर्निर्वोढृत्वेन श्रूयमाणः परमे-
श्वरो वा भूतो वा जीवो वेति संशयः।
सर्वभूतावकाशप्रदानेन नामरूपयोर्निर्वो-
ढृत्वस्य विधृति संभाव्यत्वात् वियदिहा-
काशशब्दवाच्यं - अथवा - अनेन जीवेना-
त्मनानुप्रविश्य नामरूपे व्याकरवाणीति जी-
वस्यैव नामरूपसंबन्धव्याकरणदर्शनात्
इत्येवं प्राप्ते ब्रूमः - परमेश्वर एवात्राका-
शशब्देन नामरूपनिर्वोढृतया श्रूयते -
अमृतत्वादितद्धर्मव्यपदेशात् - नह्याकाशे-
ऽमृतत्वादिकं संभवति - जीवो वा - अतः
परमेश्वर एवाकाशशब्दवाच्यः॥

॥सुषुप्त्युत्क्रान्त्योर्भेदेन॥

प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंच
न वेद नान्तरं प्राज्ञेनात्मनान्वारूढ-
इति सुषुप्त्युत्क्रान्त्योर्जीवाद्भेदान्तर विष
यात् प्राज्ञाज्जीवात् तदानीमेव प्रा
ज्ञतया भेदेन व्यपदेशात् अर्थान्तरभूतः
परमेश्वर एवाकाश शब्द वाच्यः॥

॥पत्यादि शब्देभ्यः॥

परिष्वक्ते प्राज्ञेन श्रूयमाणेभ्यः पत्यादि
शब्देभ्य श्चाप्यस्य एव जीवादित्यवगम्य
ते - सर्वस्याधिपतिः सर्वस्येशान शब्दा
दिकमुत्तरत्र हि श्रूयते. पशूनां पतये वृ
क्षाणां पतये इत्यादिभिरीश्वरस्य हि —
62-B जगदाधिपत्यं प्रसिद्धं - न कुत्रापि जीव
स्य - तस्मादयं जीवादन्यः परमेश्वर एवा
त्राकाश शब्दवाच्यः॥ ......

.... विक विन्यस्तगृहीतेर्दर्शय
ति च ।।

एकेषां कठानां शाखामाम्नायते इत्य
स्य विषयः- इन्द्रियेभ्यः परा ह्यर्था अर्थे
भ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बु
द्धेरात्मा महान् परः महतः परमव्यक्तं
अव्यक्तात्पुरुषः परः पुरुषान्न परं किं-
चित् सा काष्ठा सा परा गतिरित्यादिकः
अत्र महत्परत्वेनाव्यक्तशब्दवाच्यं प्रधानं
कापिलमुत शरीरं वेति संशयः - प्रधा
नमिति पूर्वपक्षीयाः कथं महदव्यक्तपुरुषा
णां सांख्यतन्त्र एव प्रसिद्धेः- तेषामिह
श्रुतौ प्रत्यभिज्ञा भवति न पुरुषेण किंचि
दिह प्रसंगः तस्मात्सांख्यं प्रधानमिति
पुनरिति सिद्धान्तो युक्तः - पूर्वमात्मानं
रथिनं विद्धीत्यादिषूपासनोपायेषु-

वशीकार्यत्वाय · शरीरस्याऽऽदि रूपकविन्यस्ता
व्यक्तशब्देन गृह्यते॥ इन्द्रियेभ्यः परा ह्यर्था
इत्यारभ्य साकाष्ठा परा गतिरिति · वशीका
र्यत्वाय परा उच्यन्ते - मनसा प्राज्ञ इत्यादि
ना श्रुतिरेवात्र दर्शयति · ततो व्यक्तं वपु
रत्र प्रतिपाद्यं प्राधानमेवाव्यक्तमिति प्राप्ते
चेत् - कथमिह शरीरं इत्याशङ्कायामाह -
॥ ॥ सूक्ष्मं मिस्यव्यक्तमुच्यते · अव्य
क्तमेव कारणा - - - कार्यीभूतयाव्य
९३. क्तशब्दवाच्यमिति युक्तमेव · युक्त्यन्त
४. रमुच्यते -

॥ तदधीनत्वादर्थवत् ॥

आत्मशरीरादिकं परमेश्वराधीनतया -
र्थवदुपासन निवृत्तमेव भवति सर्वान्त
र्यामी सर्वमात्मादिकं प्रेरयति.. उपासनो
पायत्वेन शिवकार्यं काष्ठा प्राप्य साकाष्ठा

साधारणगतिरिति उच्यते ततोऽव्यक्तमिह शरीरमेव

॥ ज्ञेयत्वावचनाच्च ॥

यदि सांख्याभिप्रायेण प्रधानमत्राऽव्यक्तं तदाऽस्य ज्ञेयत्वमुच्येत न च तदस्ति अतो न कापिलमव्यक्तं ज्ञेयत्वमप्यस्यास्तीति आशङ्क्य परिहरति

॥ वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥

अशब्दमस्पर्शमित्याद्यस्यापि विधार्यतां वदतीति चेन्न युक्तं मनसा प्राज्ञस्यैव प्रकृतत्वात् अतोऽव्यक्तं शरीरमेव; प्रधानस्य प्रसङ्ग एव नास्ति त्रयाणामुपन्यासः क्रियते न प्रधानस्य

॥ त्रयाणामेव उपन्यासः प्रश्नश्च ॥

त्रयाणामुपास्योपासनोपासकानामेवात्र प्र
करणे ज्ञेयतया प्रश्नोपन्यासः क्रियते नात्र
स्थानादेः - यथा अध्यात्मयोगाधिगमेन-
देवमित्यादिरूपन्यासः येयं प्रेते विचि-
कित्सा मनुष्य इत्यादिरपि प्रश्नः तस्मा
देतत्प्रकृतत्वादपि शरीरमेवाव्यक्तं नात्र
स्थानं किंच लिङ्गान्तरमपीत्याह भाष्यव-
~~यथेह बुद्धेरात्मा महान्~~ ॥ महद्वच्च ॥
यथेह बुद्धेरात्मा महान् पर इति ना
त्मशब्दान्तर्गत्तिको महान् भवति यथा-
९२ B. - अव्यक्तशब्दादपि न प्रधानमिति निर्णयः
उपक्रतत्वादपि न प्रधानप्रस्तावो भवतु
तदन्यत्र प्रधानमेव कारणत्वेन श्रूयते इ
त्याशङ्क्याधिकरणमिदं तद्विषयमारभ्य
ते ॥

॥ चमसवदविशेषात् ॥

श्वेताश्वतरोपनिषदि श्रूयते स्यविषयः - अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः.. इत्यादि इह प्रकरणत्वेन जन्मरहितत्व..जे, श्रूयमाणो प्रकृतिः । सा साङ्ख्यसिद्धा किं वा परा वेति संशये साङ्ख्यसिद्धेति वक्तुं युक्तं अजामिति जन्माभाववचनात् सर्वप्रजाकारणत्वाच्च लोहितशुक्लकृष्णामिति वर्णानुमित गुणत्रयात्मकत्वावगमाच्च तदन्यस्याः कस्यास्विदेवं विधत्वं नयुक्तमित्येवं प्राप्ते सिद्धान्त उच्यते - न नैतत्सिद्धा प्रकृतिरिह प्रकरणत्वेनोच्यते जन्माभावमात्रेण न तस्या एव प्रकृतित्वः अर्थाद्विलक्षणमसः इति प्रकरणविशेषाभावात् - यद्वेत.त..ऽरइति नमसो विशेष्यते यौगिकशब्दविशेषः. प्रतीतिर्हि वि..कापेक्षा ततो न तोति

हि प्रकृतिर्हि रिति - तत्र तत्सिद्धायाः
प्रकृतेरन्या कोऽहं श्रीत्यत आह -

॥ ज्योतिरुपक्रमा तु तथा ह्यधी
यत एके ॥

ज्योतिरिति परमेश्वरस्योच्यते - परमेश्व
र कारणिकेयं प्रजा प्रकृतिरुच्यते तथा
परमेश्वर कारणिकायाएव प्रतिपादन
मेके तैत्तिरीयका स्तत्स्वरूपमधीय
६४५ ते - अणोरणीयान् महतो महीयानित्या
रभ्य प्राणादि पंचकस्य परमेश्वराद्
त्पत्त्या तदात्मत्व प्रतिपादन समर्थे हि-
अजामिति पठन्ति अतस्तत्प्रत्यभिज्ञा
नादियमपि परमेश्वर कारणिका सर्व
थै सर्वत्रेति निश्चीयते ततो न तन्त्रसि
द्धेति वादो निर्बन्धः ननु परमेश्व
र कारणिकेत्यस्याः परमेश्वर कार्यत्वम्

-च्यते-कथमस्याः तादृश्या अजात्वादृष्-
ट्या शङ्क्याह-

॥कल्पनोपदेशाच्च मध्वादिवदवि
रोधः॥

कल्पनेति सृष्टिरुच्यते- मायां तु प्रकृतिं
विद्यान्मायिनं तु महेश्वरं इति - तस्मान्मा
यी सृजते विश्वमेतदिति सृष्ट्युपदेशाद
जात्वं महेश्वरकार्यत्वं च - तस्याः पुनः-
प्रलयकाले माध्वादिव्यपदेशः पुनरन्य
त्रापि तत्तसिद्धानां तत्त्वानां पंचविंशति सं
ख्यानां प्रकारः श्रूयते इत्याशङ्क्य तत्परिह
र्तुं मतं कीकरणान्तरमारभ्यते ॥

॥न संख्योपसङ्ग्रहादपि नानाभावादति
रेकाच्च-

श्रूयतेऽस्य विषयः- यस्मिन् पंच पंचजना
आकाशश्च प्रतिष्ठितः तमेव मन्य आत्मानं वि-

द्वान् ब्रह्मामृतो मृतं इत्यादेः - अत्र पः
ञ्च पञ्चजना इति पदार्थः किं सां·
ख्यतत्त्वानि श्रुतिप्रसिद्धानि वेति संशयः-
पूर्वं सति पंचविंशति तत्त्वसंख्यायाः सां
ख्यशास्त्र एव प्रसिद्धत्वादेतत् तदभावात्
१४ 13 पंच पंचजना इति सर्वेषां तन्त्येवात्र
प्रतिपाद्यानि· श्रुतित्वे काप्ते ब्रूमः- पं·
चपंच इति पंचविंशति संख्योपसङ्ग्र·
हो· न तान्ति कानि तत्त्वानि यस्मिन्निति·
यच्छब्दनिर्दिष्ट परमेश्वराधारत्वमभी
प्सैव गम्यते· तदेतत्पृथग्भावादेते
षां आकाशस्य प्रथमं निर्देशात् तत्त्वा
तिरेकश्च भवति तत्त्वानामधिकसंख्या
त्वमिति भावः- अतोऽत्र न पंचविंशति तत्त्व
प्रसङ्गः किंच पंचविंशति संख्याग्रहे
पि न युक्त एव· दिक्संख्ये संज्ञायामिति

संज्ञाविषयोऽपि पंच पञ्चजनानां केचित्तेहि पंच पंचजना इत्युच्यन्ते । सप्त सप्तर्षय इतिवत् । अतो न संख्यातत्वप्रविष्टा प्राप्तिरिति - के पुनरेते इत्यत आह -

॥ प्राणादयो वाक्यशेषात् ॥

पंचजनधर्मिणः प्राणादयः पञ्चेन्द्रियाणि गम्यते अतोऽपि न तौ संख्यात्वप्रसक्तिः पुनरुपपत्तिरुच्यते -

॥ ज्योतिषैकेषामसत्यन्ने ॥

एकेषां मन्नस्थान्नमिति .. ज्योतिषां ज्योतिरिति उपक्रममगतेन ज्योतिःशब्देन पंच पंचजना इन्द्रियाणि ज्ञायते । ज्योतिषां ज्योतिः प्रकाशकानामपि प्रकाशकत्वेनोक्ता ततः पंच पंचजना इत्युक्ते ते प्रकाशकाः पंचेन्द्रियाणीति गम्यन्ते ॥

४६
१९ A. ॥ कारणत्वेन चाकाशादिषु यथा व्यप-

५८९ — इति प्रोक्तः ॥

A. उभयथा आकाशादिषु कार्यवर्गेषु कारणत्वे न सर्ववेदान्तवाक्येषु सद्वा इदमग्र आसीत् तद्धेदं तर्ह्यव्याकृतमासीत् इत्येवमादिष्वज्ञातविषयेषु च आत्मा वा इदमेक एव अग्र आसीदिति विशेषवाक्येष्वपि वाक्यनिर्दिष्टस्यैवोक्तः न तीति का व्याकृता तथात्र विशेषवाक्यदृष्टानां धीन्द्रियाणामेव ग्रहणयोगः कथमित्यत आह —

॥ समाकर्षात् ॥

सोऽकामयत बहु स्यामिति पूर्वनिर्दिष्ट सर्वज्ञस्यैव असद्वा इदमग्र आसीदिति समाकर्षात् यथा यथावावगम्यते तथात्रापि समाकर्षात् पञ्चजनानामिन्द्रियत्वावगतिरिति न विरोधः ॥

गतः · स्थैर्य तत्र शंकापरिहारः पुनरपि जी
वात् परमेश्वरस्यान्यभावमुपपादयति ॥

॥ जगद्वाचित्वात् ॥

श्रूयतेऽस्य विषयः कौषीतकी ब्राह्म
णोपनिषदि ब्रह्म ते ब्रवाणि इत्युपक्र
म्य यो वै बालाक एतेषां पुरुषाणां कर्ता
यस्य वैतत्कर्म स वै वेदितव्य इत्यादिका इ
ह वेद्यत्वेन श्रुतः परमेश्वरो जीवो वेति
संशयः सकलपुरुषकर्तृत्वस्य जीवेऽपि
विद्यमानत्वात् कर्मशब्दस्यापूर्ववाचि
त्वात् पूर्वस्य तदधीनत्वात् निर्धूतसकलकर्म
संबन्धे परमेश्वरे तदयोगात् पूर्वपक्षायमि
९५ 13. त्ते पूर्वः पक्षः ॥ कर्मशब्दस्यैतच्छब्दसामा
...धिकरण्येन क्रियते इति व्युत्पत्त्या च-
जगद्वाचित्वात् जगत्कार्यवाचित्वात् परमेश्वर एवा
त्र प्रतिपाद्यः सकलजगत्कर्तृत्वसंभवोप

कृः-पूर्वोक्त पादर्शन विधायाँ विख्यातत्वादिहापि पूर्वापरपर्यालोचनया कृद्धत्वेन पुनराशङ्कय परिहरति-

॥ जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् ॥

एतैरात्मा भो भुङ्क्ते अन्यास्मिन् प्राणप्रवेकथाः भवति जीवमुख्यलिङ्गदर्शनान्नासौ परमेश्वर इति ∴ नि चार्यं स्थिरे तदनुरूपतयान्यलिङ्गानि ∴ प्रश्नोत्तरमुच्यते

॥ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥

तमाहस्सुप्तं पुरुषमाजग्मतुरित्यादिना देहातिरिक्त जीवसद्भाव प्रतिपादने तदतिरिक्त परमेश्वर प्रज्ञापनार्थमिति कृ छ ८ ९ तद्वालोके पु.रु.पा.श. यप्रेति प्रश्नमस्मिन्नैव कथाभवतीति वा

क्यसमानार्थं प्रतिपादनाद्याय मीश्वर इत्यव
गम्यते एके वाजसनेयिनोपि स्पष्टमेतत्
समानार्थं मभिधीयते एषतादित्यारभ्य-
यएषोंतर्हित आकाशं तस्मिन् शेते इ
त्यवसानं तस्मात्परमेश्वर एवायं सकल
जगत्कर्तृत्वेन सिद्धः सर्वत्र जीवेश्व
रयो रेकस्य च्छब्द विषयत्वे प्रतीयमा
९६ अ नें तत्सामानाधिकरण्यं कथमेतन्निरू
पणाय इदमधिकरणं आरभ्यते ॥

॥ वाक्यान्वयात् ॥

बृहदारण्यके श्रूयते स्य विषयः नवा
अरे पत्युः कामाय पतिः प्रियो भवति आ
त्मनस्तु कामायेति आरभ्य आत्मावा अ
रे द्रष्टव्य इत्यादि इह आत्मनस्तु कामाय
पतिः प्रियो भवतीत्यादि वाक्ये भोगप्री
ति युक्ततया आत्मनस्सं सारित्वावगमात्

अयमत्र प्रतिपाद्यमानो जीव इति सन्देहे
न पूर्वपक्षे प्राप्ते । सिद्धान्तयति । मिथः प
रमेश्वर इति । कुतः अमृतत्वस्य तु ना.
न्यः स्यात् आत्मा खल्वरे दृष्टे श्रुते मते -
विज्ञातमिदं श्रुतमिदं विदितमित्यादि
येनेदं विजानात् इत्यवसानस्य वाक्यस्य
परमेश्वरेऽन्वयात् [illegible] भोगप्रीतेर्युक्तस्य
जीवस्यानुवेदन [illegible] परमेश्वरप्रतिपाद
नादविरोधः । क [illegible] क्यमिह सर्वत्र जीवश
ब्देन परमेश्व[illegible]राभिधानमिति आश्म
रथ्यो मन्यते ॥

॥ उत्क्रमिष्यत एवं भावादित्यौडु
लोमिः ॥

उत्क्रमिष्यतो मुक्तस्य परमेश्वरस्वरूप
भावात् आत्मशब्दात् परमेश्वराभि-
धानमिति औडुलोमिर्मेने ॥

॥ उपवस्थितेरिति काशकृत्स्नः ॥
य आत्मनि तिष्ठन् इत्यादिना जीवात्मनि
परमेश्वरस्यात्म...यावस्थितेः जीवशब्द
६ ६९. वाच्यत्वं परमेश्वरस्येति काशकृत्स्नो मे
13 ने- इदमेव मतं सूत्रकारस्य· मतद्वयमुप
न्यस्य तद्विरोधेन तदभिधानात् अन्यस्या
नभिधानाच्च नि[illegible]ज्ञायते· प्राबल्य
श्रुत्यानुगुण्यं चास्य [illegible] संभवति· तथाच
वेदशिरसि- सर्व[illegible]चेदं इत्यनुप्र
वेशात् परमेश्वरस्य स[illegible] सर्वशब्दवाच्य
त्वं इति श्रूयते- देवाहवै स्वर्गं लोक
मगमन् ते देवा रुद्रमपृच्छन् को भवा
निति- सोऽब्रवीत्- अहमेकः प्रथममासं
वर्तामि च भविष्यामीति च नान्यः क
श्चिन्मत्तो व्यतिरिक्त इति- सोऽन्तरादन्त
रं प्राविशदिति; दिशश्चान्तरं प्राविशद्

शरीरान्तरं प्राविशत्‌· सोऽहं नित्यानित्यो
ब्रह्माणमित्यारभ्य· अतश्चोर्ध्वं च दि
शश्चाहं पुमानपुमांस्त्रियश्चाहं गा
यत्र्यहं सावित्र्यहं त्रिष्टुप् जगत्यनुष्टु
प् चाहं इत्यादि· छन्दोऽहं सत्योऽहं गा
र्हपत्योऽहं दक्षिणाग्निरहं आहवनीयोऽहं-
ज्येष्ठोऽहं वरिष्ठोऽहं ऋग्यजुस्सामा
थर्वानुप्रवेशादेव यो वै रुद्रः स भग
वान् भूर्भुवस्स्वः ब्रह्मेत्यारभ्य ब्र
ह्म विष्णु रुद्रोमालक्ष्मी सरस्वत्यादि स
र्वप्रपञ्च शब्द वाच्यत्वावगम्यते· तथा
सर्वश्रुति सामरस्य विचारे· सर्वेषामपि चिद
चिद्वस्तूनामन्तर्यामितयानुप्रविष्टः
सर्वशरीरः सर्वशब्दवाच्यः परमेश्वरः
शिव इति विज्ञायते· अतः काशकृत्स्न
५६अ. त्स्नमतमेव सूत्र श्रुति समाश्रियुक्त

मिति- समंजसमेव- पूर्वं जन्माद्यस्य
यत इति द्वितीयाधिकरणे यतोवा इमानी
ति पंचमी श्रावणात् परमेत् परमेश्वर
स्य जगदुपादानत्वं सामान्येन निरूपितं-
तद्विशेषत स्समर्थयितुं इदमाधिकरण
मारभ्यते -

॥प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरो
धात् ॥

तस्माद्वा एतस्मादात्मन आकाशस्संभूतः
द्यावाभूमी जनयन् देव एकः इत्यादीनि
ब्रह्मणो जगदुभयकारणत्व प्रतिपादनपरा
णि वाक्यानि वात्त विषयः - एतेषु प्रसिद्धं
उभयकारणत्वं ब्रह्मणो युक्तं नवेति संदेहः
सन्देह इत्त निमित्तस्य कुलालादेरुपादा
नस्य मृत्पिण्डादेर्भावदर्शनात् उपादानस्य
मृत्पिण्डादेः निमित्त कुलालादिभावदर्शे-

नाव: कल्पमेकस्मिन्निमित्तत्वमुपादानत्वं
जगत्कार्यं प्रतीति - पूर्वपक्षस्तु - जग
त्सृष्टौ निमित्तमेव नोपादानमिति - कुतः
असंभवान् न हि घटनिर्माता कुलालः स्व
यमेव मृत्पिण्डीभूय तं घटं करोति घटं
वा कुर्वन्दः यदि कर्तुमीहते तन्न संभव
त्येव अतो निमित्तभूतस्य ब्रह्मणः उपा
सनत्वं न संभाव्यते निष्प्रयोजनं च निमि
त्तस्योपादानकल्पनं घटस्य कः कार्य
निष्पत्तेः कुलालस्य मृत्पिण्डादन्यत्वेपि
घटनिष्पत्तिदर्शनात् ततो ब्रह्मणि नि
९६ 13 मित्तमात्रमेव नचोपादानमिति - उच्यते -
निमित्तमुपादानञ्च - तमादेशं प्राक्ष्य
येनाश्रुतं श्रुतं भवति इति येनादेशेन
निमित्तभूतेन चिदचिज्जगद्विज्ञानं भ
वतीत्यादेशः विज्ञानेन सर्वविज्ञानप्रति

ज्ञानात् यथैकेन पिण्डेन सर्वमिदं मृ-
न्मयं ज्ञातं स्यात् इति तदुपादान-
ब्रह्मैवोपादानम् अन्यः इति अने
नेत्यादेश शब्दादेव भूतैकोच्य
ते न तदन्यान्तरत्वं उपादानस्येति ज्ञाप
यितुमाह—

॥अभिध्योपदेशाच्च॥

तदैक्षत बहु स्यां प्रजायेयेति निमित्त
भूतस्य ईक्षितुः सर्वज्ञस्य ब्रह्मण एव
विचित्रजगद्रूपकारेण बहुभवनसंकल्प
उपदिश्यते अतो निमित्तादन्यदुपादानं
ननु विश्वाधिको रुद्रो महर्षिः हिरण्यग
र्भं पश्यत जायमानमिति विश्वोत्तीर्ण एव
सर्वज्ञः परमेश्वरो निमित्तभूतः स्वव्यति
रिक्ते प्रकृतिस्थाने स्वसंकल्पेन जायमा
नं सकलजीवप्रधानं हिरण्यगर्भं स्रष्ट

मनुग्रहः इष्यापदुयदिति ज्ञायते कथम
स्य विषयाकारत्वं ज्ञानकारणत्वं प्रकृतिरू
पत्वेन संभवतीति - मायांतु प्रकृतिं विद्या
दित्यादि मायायाः प्रकृतित्वेन श्रूयते - त
स्माद्विराडजायत विराजो अधिपुरुषः -
पुरुषस्य प्रकृतित्वं जगदाकारत्वं उचि
तमित्यत आह -

॥ साक्षाच्चोभयाम्नानात् ॥

98 A साक्षात्प्रत्यक्षमेव वेदांतविभागेषु पर
मेश्वरस्य प्रकृतित्वं जगदाकारत्वं नि
मित्तत्वेन जगत्पतित्वंच श्रूयते तथाहि
एव एवाधिको रुद्र इत्यादिना यथा विश्वाधि
कत्वमवगम्यते तथा सर्वो वै रुद्र इत्यादि
ना प्रकृतित्वात् विश्वरूपत्वमपि श्रूयते
शतरुद्रीये - नमो हिरण्यबाहवेत्यारभ्य - कु
लुंचानां पतय इत्यन्तेन विश्वाधिपत्य

तन्त्र नमः पर्य्यायत्व वर्ण्यते इत्येत
त्पर्यं तेन जगदाकारत्वेन च परमेश्वरस्योच्य
यते- प्रदेशान्तरेच बहुवनं बहुसवृक्ष
आसोत् बहुस्याम्यतिष्ठत भुवना..धारयन्
इत्युभयश्रुति रपुर्वशिरासेन च- प्रथम
द्वितीय खण्डयो जगदाकारत्वं तदुपरि-
जगदीश्वर्यत्वं च प्रकृति निमित्तत्वेन प
रब्रह्म परमेश्वरास्यैव श्रुते रुक्तमेव-
किंच प्रमाणांतरमस्तीत्याह-
॥ आत्मकृतेः॥
तदात्मानं स्वयमकुरुतेति स्वस्यैव जग
दाकारत्वेन कृतिरवगम्यते परमेश्वरस्य
अतस्तदेवोपादानं- नन्वज्ञानविका
रस्य ~~देह~~ स्वदेहेयप्रपंचरूपेण प्रकृ
ति भावेन कथं वर्तते- निरस्तसमस्तदो
षकलंको निस्सीम मंगलरत्नाकरो नि

स्ङ्गु. शं। यत्य सिद्धं वैभवः प्रपञ्चातीतः
परमशिव इत्यत आह-

॥ परिणामात् ॥

नित्य शुद्धानन्दस्य निरतिशय भैग
९८ ३. कस्वभावस्यापि निमित्तस्य-परमशिव
स्य प्रकृतित्वेन जगदाकारत्वं युक्तमेव-चि
द्रूपिदाकारेण-परिणामात्- हन्त-कार
ण विकार रूपोहि परिणामः- पूर्वरूपपरि
त्यागेन रूपान्तरापत्तिः परिणामि इति-क
थं परमेश्वरो नर्ण्यधर्मात् परिभूयत इति
चेन्न सत्यं यथानिमित्तस्य प्रकृतित्वे
पि नविकारादि स्पर्शः तथापरिणामस्या
स्ये भवति- कोयं पूर्वः परिणामः-कुतू
हलिनो वयं तच्छ्रवणे पि विच्यतां इति चे-
च्छृणु त- विवेचयामः- यस्तस्मा
न्नजो न रातिं नसन्न चासच्छिवस्व

केवलं ऽक्षरं तत्सवितुर्वरेण्यं प्रज्ञाच
तस्मात्प्रसृता पुराणीति - यस्मिन्काले वि
गत चन्द्र सूर्यादि तेजस्तया दिवारात्रि वि·
भाग शून्यं नामरूप विषयराहित्येन स्थूल
सूक्ष्म चेतनाचेतन सदसद्व्यक्ति व्यवस्था
रहितं सर्वमिदं तमोभूतं तदा· शिव एवा
द्वितीयः केवल स्वाभाविक मापन्न चिद्
विच्छक्तिः स्वयं प्रकाशः परिशिष्टोभूत-
तदक्षरं तदेव तदानीं क्षर रहितं नाशरहि
तं वस्तु परं· तत्तत्सवितुर्वरेण्यं तत्स
वितुरादित्यस्य· पूर्वं तेजः प्रदत्वेन वरे
ण्यं तत्रवर्ति तेजस्तदपि तदेव तस्मात्ता
दृशात् स्वविलीन स्वेतर निखिल चिद्-
-चित्प्रपञ्चाद्द्वितीयात् पुराणी. सनातना
नित्यसिद्धां... तत्काल तमोपनोदनि. महा
स्फुरत्तारूपा परमाज्ञा ज्ञानशक्तिः प्रसृ

प्रसूता प्रवर्तेत ततस्सोकामयत - बहु
स्यामेति – विभागरहित नामरूपादि सू
क्ष्म चिदचिद्वस्तुशरीरकः कारणावस्थः पर
मेश्वरः स विभक्तनामरूपकः चिदचिद्व
स्तु शरीरकः भवेयामेति संकल्पमकरोत्
ततश्चेदं सर्वमसृजत यदिदं किञ्चेति स्व
शरीरभूतमेतत् सूक्ष्मचिदचिद्वस्तु स्व
स्माद्विभज्य तत्सृष्ट्वा तदेवानुप्राविशदिति
स्वतो विभक्ते चिदचिद्वस्तुनि स्वयमेवात्म
तया प्रविश्य सच्च त्यच्चाभवदित्यादिना
सदसद्रूपचररूपेण बहुधा परिणतो भवति -
आदिपुरुषस्य कालयतेः पुनस्त्वादिपूरुष
इणो जगच्छरीरिणः कारणत्वं कार्यत्वंच
मायान्तु प्रकृतिं विद्यान्मायिनं तु महेश्व
रं । तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगदि
ति - श्रवणात् मायायाः सकलप्रकृतित्वं

तद्विशिष्टत्वं महेश्वरस्य तदवयवभूतेनांश
भूतेन भोक्तृत्वदशायां पुरुषसंज्ञकेन स
कलजगद्व्याप्तिरस्यावगम्यते- यद्वा केव
लाच्छरीराल्लोमनखाद्युत्पत्तिर्न संभव
ति आत्मनश्च यथा केवलं मायायानजग
दुत्पत्तिः महेश्वराच्च किंनु मर्त्यशरीरिणः
-केशनखाद्युत्पत्तिवत् मायिनः परमेश्व
रस्य जगत्कार्योत्पत्तिः- मायिनः परमेश्व
रात् सकलचेतनाचेतन प्रकृति पुरुषः -
कोऽभिव्यक्तो भवति तद्रूपादीश्वरात् अ
९९. व्यक्त चतुर्मुखाद्युत्पत्तिः- तथाच श्रुति
13 रीश्वरस्य पुरुषरूपमभिधत्ते पुरुषो
वै रुद्र इति- ततस्समुचितं चिदचिद्वि
शिष्टः परमेश्वरः कारणं कार्यं च -
तदवस्थाविशेषादिति —
।। योनिश्चापि गीयते ।।

साक्षात्परमेश्वर एव भूतयोनिरित्युच्यते उमासहायं परमेश्वरमित्यारभ्य भूतयोनिं समस्तसाक्षिं तमसः परस्तादिति समस्तसाक्षिणः सर्वज्ञस्य तमःपरस्य विश्वोत्तीर्णस्य परमशक्त्योमा-सहायस्य विशिष्टस्य परमेश्वरस्यैव भूतयोनित्वं भूतप्रकृतित्वं गीयते — तत्स्योपादानमपि निमित्तं परब्रह्मैव

॥ एतेन सर्वे व्याख्याता व्याख्याताः ॥

जन्माद्यस्य यत इत्यादिना एतदनंतरवेदांतरवाक्यानां व्याख्यानेन ब्रह्मलिङ्गाभिधायिनो वेदांतरूपाः कर्मकांडमध्यपातिनः पुरुषसूक्त शतरुद्रीय प्रभृतयो मन्त्रब्राह्मणभागाः स्मृतीतिहास पुराणागमाभियुक्तविशेषास्त्व्याख्याता इति —

द्विरुक्तिः स्वाध्याय समाप्त्यर्थः। अतः कर्म
प्रकृत पठितानां पुरुषसूक्त शतरुद्रीया
दीनां स्मृतीतिहास पुराणादीनां च तात्प
र्यलिङ्ग समन्वयेन ब्रह्मबोधकत्वमस्ति न
संशयः- संशयबीजं प्रकरण भेदादिकं
कर्मप्रकरणगतानां पुरुषसूक्तादीनां अ
नुष्ठातृमेव समीचीनं नित्यमुक्तब्रह्म
60 A. विषयत्वे प्रयोजनाभावात् स्मृति पुराणादी
नामपि नैकार्थ परत्वमस्ति यतः तेषु कुत्र
चित् ब्रह्माणां परं ब्रह्मेत्याहुः- कुत्र
चिद्विष्णुं कुत्रचिद्रुद्रं कतिचिच्छक्तिमेव
कुत्रचिदग्निं कतिचित्सूर्यं कतिचिद्दैवं
अनवस्था- अतएतेषां न ब्रह्म बोधक
त्वमिति प्राप्ते ब्रूमः- पुरुषसूक्तादीनां
ब्रह्मबोधकत्वमस्ति तल्लिङ्ग दर्शनात् तस्मा
द्विराडजायत आदित्यवर्णं तमसस्तुपारे.

तमेवं विद्वानमृत इह भवति सकलकार
णत्वं तमः परत्वामृतहेतुत्वादीनां परमेश्व
रलिङ्गानां अत्र संबन्धो दृश्यते. अतः-
ईश्वरपर्यन्त पुरुषशब्दे प्रतिपाद्यते। अत्र
रुद्रीये च साम्बात्परमेश्वरस्य जगदधिप
त्य जगदात्म — नीलग्रीवादि रूप लक्षणं
च श्रूयते. अतः परमेश्वरस्य तद्वाच्यत्वं
युक्तं - ननु परमेश्वरस्य मंगलगुण मन्यु
रूप संकल्प्याबगमादिति चेत् न.
नैवं विचारणीयं मन्युशब्दस्य तापवाच
कत्वात् अथवा, क्रोध पर्यायत्वेपि मन्युशब्द
स्य न दोषः - अथवा निग्रहार्थं स्वेच्छागृ
हीता प्रकृतिः गुणत्वेनास्य परमेश्वरे संब
न्धाभावावगमात् पुराणादीनां तात्पर्य
लिङ्ग वशेन ब्रह्म विष्णु वाच. तत्तच्छब्द
वाच्यं सर्वात्मकं सर्वज्ञं सर्वशक्तिं सर्वाधि

६०: 13 कसामान्यवैभवं ब्रह्मशब्दार्थं विश्रांति
पदं निखिलवेदवेदांतवाक्यसामरस्य
समन्वयतात्पर्यसहितं शिवमुमासहितं
परमेश्वरं प्रतिबोधकत्वं श्रुत्युक्रमेव-तदु
के कर्मप्रकरणमिति लिङ्गं प्रकरणबो
धो हि:- अनेन न्यायेन सत्ता चेतने वा अचेतने
वा जगत्कारणत्वादिकं शिवस्य तात्पर्यलिङ्गा
दिकं श्रूयते - वेदादिषु प्रमाणवचनेषु त
त्तत्तत्मा शिव एव वाच्यः यत्र यत्र पुरु
षार्थ विकारा ज्ञत्वादिको धर्मस्तत्र तत्र शि
वस्य परब्रह्मणः शरीरं चिदचिद्वस्त्वेव
बोद्धव्यं इति निपुणं समभिरूपमिति स
र्वं समंजसमेव-॥

इति

श्रीकंठशिवाचार्यविरचिते ब्रह्ममीमांसा
भाष्ये प्रथमस्याध्यायस्य चतुर्थः पादः॥
समाप्तश्चाध्यायः-
श्रीकृष्णार्पणमस्तु.

६१ A. स्मृत्यनवकाश दोषप्रसङ्ग इति
चेन्नान्य स्मृत्यनवकाश दोष
प्रसङ्गात् ॥

अतीतेध्याये सच्चिदानन्दस्वरूपे सर्वज्ञस्य
सर्वशक्तित्वादि स्वधर्मलक्षणे सर्वजगज्ज
न्मादिकारणत्वाद्युपलक्षणे सर्वविलक्षणे
सर्वात्मनि विरूपाक्ष कृष्णपिङ्गल-
नीलकण्ठत्वादि लीलाभेद रूप स्वभावे
भव शिव महादेव परमेश्वर शब्दादि
मुख्य वाच्ये परमकारुणिके परब्रह्मणि
शिवे निखिलवेदान्तवाक्यानां तदनु
गुणानाञ्च स्मृत्यादीनां तात्पर्येण सम
न्वयो हि हितः। इदानीमनेनाध्यायेन
तस्य समन्वयस्य वेदाविरुद्ध स्मृति
तर्कादिभिर्विरोधो यः परिह्रियते-
पा.ध. मु. सा.ख्य. स्मृति विरोधः परिह्रि

यतेः अस्मिन् सर्वत्र पूर्वोक्तसमन्वयो-
विषयः- इह वैदिकसमन्वयस्य सांख्य
स्मृत्या सङ्कोचोऽस्ति नवेति सन्देहः
कथं ब्रह्मणो जगत्कारणत्वं वेदो ब्रूते ध
त्ते सकलं स्मृतिः प्रधानस्य कपिलो
पि महात्मा सो तद्वचनमपि प्रमाणमेव-
वेदोहि भगवान् निखिलप्रमाण सार्वभौ
मः सच प्रामाण्य वृत्तं न सहते तदन
योः कस्य केनवा बाधइति संशयप्रा
प्तेः इह सांख्यस्मृतेरनवकाशत्वेन प्र
बलत्वात् वेदस्य धर्मेण सावकाशतया दु
६१
१३ र्बलत्वात् दनवकाशतया स्मृत्या सावकाश
प्रमाणस्य सङ्कोचोयुक्तः इतिचेत् वदतीति
पूर्वपक्षी मयमपि नेति ब्रूमः- कथं
मन्वासी वेदाविरोधिनीनां मन्वा
दि स्मृतीनामनवकाशदोष प्रसङ्गात् ॥

अपएव ससर्जादौ तासुवीर्यमपासृजदित्या
दिना हिरण्यगर्भं पश्यंत जायमानमि
ति इत्यादि प्रत्यक्ष श्रुतिः ब्रह्म कारणत्व
पराभिः मन्वादि स्मृतिभिः स्तद्विरुद्धाभि
र्वापि न्या अनुमेय श्रुति मूलाया सां-
ख्यस्मृतेरेव बाधक प्रामाणिकपरि
ग्राह्य इति..

॥ इतरेषां चानुपलब्धेः ॥
इतरेषां मन्वादीनां सर्वज्ञानां स्मृतिषु
कपिल दृष्टस्य प्रधानकारणत्वादेरनुप
लब्धेः कपिलस्मृति रागम मूलेति न-
युक्तं अतः सांख्यस्मृत्या समन्वयस्य
न संकोचः॥

॥ एतेन योगः प्रत्युक्तः ॥
योगाङ्गः प्रतिपादिनि हिरण्यगर्भस्मृतिरपि प्र
धान कारणत्वमेव वदति. यथा. प्रधानका

रणवादिन्या सांख्यस्मृत्या विरोधोपपत्ते
र्वशात् वैदिकसमन्वयस्य संकोचो न भव
ति भवतिवेति सन्देहो भवतीति वदामः -
कथं श्वेताश्वतरोपनिषदि ब्रह्मसाक्षात्का
रहेतुतया प्रपंचिता योगविद्या सांख्यस्मृ
६२.५ तेरनुमेयश्रुतिसिद्धान्तोऽपि प्रत्यक्षश्रुति
सिद्धया हिरण्यगर्भस्मृत्या प्रधानकारण
वादिन्या ब्रह्मकारणवादि समन्वयस्य कोपो
युक्त इति प्राप्ते ब्रूमः - न योगस्मृत्या समन्व
य संकोचः तस्या योगश्चित्तवृत्ति निरोधः,
इत्यारभ्य वैदिकाप्रादुः योगप्रतिपादन
मात्रे तात्पर्यमात्तमवैदिके प्रधानकारण
वादे ~~ब्रह्मकारणवादश्रुतेः~~ यदि तात्प
र्यं सांख्यस्मृतिवदस्या अपि प्रत्याख्या
नमेव . ततो हिरण्यगर्भस्मृत्यापि प्रधानका
रणवादे न ब्रह्मकारणवादश्रुतिसमन्व-

यस्य सांख्यो... इत्युक्तमेव" पुनरपि सांख्यतर्कै
बाध्यतां समन्वयस्याशङ्क्य परिहरति -
"न विलक्षणत्वादस्य तथात्वं च शब्दात्"
यथा सांख्यस्मृत्या समन्वयस्याबाधः त
था तत्तर्केणापि बाधोऽस्ति न वेति संशये पू
र्वः पक्षः प्रवर्तते । सर्वथा तर्कबाध्यो
यं ब्रह्मकारणवादः कथं कारणब्रह्मणः
प्रपञ्चस्य विलक्षणत्वात् तत्कार्यत्वं
न संभवति- कुतो वैलक्षण्यमवगम्यत
इति चेत् शब्दादेव तथा विज्ञानं चावि
ज्ञानं चेत्यादि शब्दो हि प्रपञ्चस्य विकारा
स्पदत्वाशुद्धत्वा च पुरुषार्थरूपत्वमभिध
त्ते अतस्तस्य ज्ञानानन्दरूपात् ब्रह्म
णोऽस्य वैलक्षण्यं सिद्धं कथमेवं योः गोम
हिषयोरिव कार्यकार कार्यकारणभावस्सं
६२·13 भवति ॥

॥ अभिमानव्यपदेशस्तु विशे-
षानुगतिभ्याम् ॥

यद्यचेतनत्वेन चेतनाद् ब्रह्मणो विलक्षण
मिदं जगत्कथमस्मिन् तं पृथिव्यब्रवीत्
आपो वा अकामयन्त — — शृणोत ग्रावा
णो विदुष इत्यादौ चेतनस्य व्यपदेशः । त
स्मादिदं चेतनमेव सर्वं अतो ब्रह्मप्रपञ्चयो
श्चेतनरूपतया न वैलक्षण्यमिति न शंक्यं
तथा सर्वत्र ज्ञानकार्यव्यपदेशस्तु तदभिमा
नि देवता विषयमित्येव गम्यते । हन्ताहं
इमास्तिस्रो देवता इति देवताशब्दविशेषात्
अग्निः:.... भूत्वा वाचं प्राविशदित्यादिना ।
अविद्वस्त्यपहिमानु देवतानुगतेश्च । तस्मा
दचेतनत्वादिना विलक्षणमेव जगत्कारणा
स तस्य कार्यत्वं ब्रह्मणः कारणत्वं युक्ते
वाच्यमेव ॥

॥ दृश्यते तु ॥

सिद्धान्त उच्यते विलक्षणयोरपि प्रकृतप्रत्यययोः कार्यकारणभावस्सं भवति तथाहि अचेतनात् चेतन वृत्तिकोत्पत्तिदर्शना च पुरुषाद्वा चेतनात् केशाद्युत्पत्तिदर्शनाच्च अतः शुष्कतर्को न बाधकः समन्वयस्येति निर्णयः पुनश्शङ्कते परिहरति च

तस्मादिति चेन्न प्रतिषेधमात्रत्वात् ॥

पूर्वकार्यकारणयोर्वैलक्षण्यात् पूर्व
६३ ब. कार्यकारणयोर्वैलक्षण्यात् कारणे कार्यमसदेव असद्वा इदमग्र आसीदिति श्रुतेरिति चेत् न सालक्षण्यस्य प्रतिषेधविषयत्वाच्छ्रुतेः अतः कारणकार्ययोर्सत्वे कार्ता नहीयत इति ॥

। अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥
सत्कार्यवादेन वस्त्वैकत्वं कार्यकारणयोः
प्र. ब्रह्मणो ऽसमन्वयस्य तर्कबाध्यत्वं -
अस्ति न वेति सन्देहोऽस्ति पूर्वः पक्षः ॥
कुतः · यत एव जगतो ब्रह्मणा वस्त्वैक्यमु
क्तं तथा सति जगत इव ब्रह्मणोऽपि विकाराद्या
ज्ञाद्यनिष्टप्रसङ्गः स्यादिति · ततो वेदा
न्तवाक्यानां सामरस्यमसमञ्जसं भवति तत
स्तर्केण समन्वयबाध इति ॥

॥ न तु दृष्टान्तभावात् ॥

नेति पूर्वपक्षं व्यावर्तयति · यस्यात्माशरी
रं यस्याव्यक्तं शरीरमित्यादि श्रुत्याच ^ । चि
दचिच्छरीरकस्य परब्रह्मणः शिवस्य
कार्यतयावस्थाने कारणतयावस्थाने गु
णदोषव्यवस्थायां दृष्टान्तसद्भावात् वे
दान्तवाक्यसमन्वयसामरस्यं समञ्जसं ·

^ विग्रहं देवदेवस्य जगदेतच्चराचरम् । एतदर्थं न जानन्ति ·
पशवः पाशगौरवात् ॥ इत्यादि पुराणोक्त्याच

न भवति कथं यथा सशरीरस्य मनु-
ष्यस्यात्मनो बालत्व युवत्व स्थविरत्वा
दि विभवेपि बालाद्यदयः शरीरस्यैव
६२ सुखादयस्त्वात्मन्येव · तद्वदत्रापि शरी
13 रभूत चिदचिद्वस्तुगताज्ञान विकारस्व
निष्ठानि शरीरभूते चिदचिद्रूपे वस्तुन्ये-
व तिष्ठति निरवद्या विकारत्व सार्वज्ञ सत्य
सङ्कल्पादय॰ आत्मभूते परमेश्वरे स्वप्रा
न्तभावात् शुत्वा. सामरस्य..कारणे.ना
स्त्येव

॥ स्वपक्ष दोषाप्त ॥

केवलं तर्कावलम्ब — — — — — प्रधान
कारणवादे दोषो दुर्वारो भवति · अयमेवायु
क्तः तथाहि प्रधान कारण वादेऽपि तु निर्वि
कार पुरुष संनिधिवशात् प्रकृति प्रवृत्तौ
सत्यामन्योन्य धर्माध्यास इत्यादय · दुरुपपाद्य

भवन्ती ~~ति~~ न्ति रि, त्यन्य धर्मानु संधान रूपोध्यासो निर्विकार पुरुषस्य न संभवति॰ अचेतनायाः प्रकृतेरनुसंधानरूपोध्यासस्तु न संभवति॰ अतः प्रधानकारणवाद एव तर्कबाध्या.

॥ तर्काप्रतिष्ठानात् ॥

तर्कस्याप्रतिष्ठितत्वात् प्रधानकारणवादस्य तन्मूलत्वात्तस्यैव त्याज्यत्वं न ब्रह्मकारणवादस्येति.

॥ अन्यथानुमेयमिति चेदेवमनिर्मोक्षप्रसङ्गः ४ ॥

अन्यथा प्रकारान्तरेण प्रधानमनुमेयमिति वादो युक्तो न भवति तथाचेत्तत्रोप्येव प्रतिकूलतर्कस्य संभवतयाप्रतिष्ठितत्वादनिर्मोक्ष एव प्रसज्य त इति. अतश्च तर्कमूल प्रधानकारणवाद एव त्याज्यः॥

६४. सकलश्रुतिप्रमाणसिद्धो न ब्रह्मकारणवाद इति युक्तं.

॥एतेन शिष्टापरिग्रहाः व्याख्याताः॥

अथेदं सांख्यदर्शने तर्कमूलत्वेनाप्रतिष्ठितत्वादुक्तादिना प्रत्याख्याते तन्नोच्यते नैव हेतुना शिष्टानां कणभक्षाक्षपादादीनां वृद्धा अपरिग्रहा व्याख्याता. एवमिदमुक्तं भवति. कणादादिमतसिद्ध परमाणुकारणवादोऽपि निराकृत इति.

॥भो — — त्तेरपि भागश्चेत् स्याल्लोकवत्॥

यदुक्तं पूर्वं चिदचित्प्रपञ्चविशिष्टशिव एवाद्वितीयं कारणं कार्यं च भवतीति विशिष्टशिवाद्वैतस्य समन्वयात्.

धस्य युक्ति बाधापत्तेरस्ति नवेति सं-
शयः - एवं सति पूर्वः पक्षः प्रसज्यते
यदि चिदचिच्छरीरकत्व मिष्यते परमे
श्वरस्य तदा सशरीरत्वमस्य सिद्धं तर्हि
जीववत् सशरीरत्वेन तस्यापि शरीरसंबन्ध
प्रयुक्त सुखदुःख भोक्तृत्वापत्तिसंभवः -
तस्मात्संसारिणो जीवादस्य परमेश्वरस्य-
विभाग एव प्राप्नोति अतोयं जीवोयं मीश्व
र इति विशेषानुपपत्त्या जगद्विशिष्टानुवा
दे परमेश्वरस्य स्वरूप सिद्धं प्रसङ्गः
इति - एवं चेत्पूर्वपक्ष मन्य मतेनाजात
विरोध इति सिद्धान्तः स्यादेव विभागो
जीवात् परमेश्वरस्य निष्कलंक निखिल
मङ्गलाकारत्वेन - न खलु सशरीरत्व प्रयुक्तं
६४/18 अनिष्टं भोक्तृत्वं भवति किन्तु पराधीनत्व
प्रयुक्तमेव - तथाहि लोके राज्ञः सशरीर

त्वेपि अनन्य ब्रह्मस्य स्वाज्ञातिव्रत्ति कृतानिष्ट प्रसङ्ग. भोक्तृत्वादिकं नेतरख भानं शङ्को द्वावजावीशाविति जीवेश्वरयो. स्वातन्त्र्य मस्वातन्त्र्यं स्वतस्सिद्ध मेव अतः स्वतन्त्रस्य परमेश्वरस्य जीवाद स्वतन्त्र्यात् शरीरसंबन्ध सामान्येन ना - भांगप्राप्ति नीतो विशिष्टाद्वैतह रिः :- यदि स्वातन्त्र्या स्वातन्त्र्यादि - विरुद्ध धर्म संबन्धेन जीवेश्वरयोर्भिन्न उच्यते तथापि तयोः कार्यकारणयो - म. नन्यत्व मव्यतिरिक्तत्वं सिद्धमेवेत्याह -

॥ तदनन्यत्व मारंभण शब्दा - दिभ्यः ॥

इह कार्यकारणयोः प्रपञ्च ब्रह्मणोः सम्बन्ध सिद्ध मनन्यत्वं सन्दिह्यते युक्तं भवति सन्देहस्य चेतनाचेतन परस्पर विरु

द्वु धर्मसंबन्धवैलक्षण्यं कारणे -कनम
नयोरनन्यत्वमुपपद्यते पूर्वोद्दिकरणे :
सर्वज्ञत्वादिमहत्त्वेन परमेश्वरस्य भेत्तृ
त्वाज्ञानत्वादिना जीवस्य चोभयोर्विभागो
निर्दिष्टः : उपचिद्वस्तुनोऽप्यनेनात्यंत
विलक्षणत्वादनन्यत्वकथा दूरतएव -
न हि कार्यकारणत्वमनन्यत्वसाधकं -
गोमयवृश्चिकादौ सत्यपि तस्मिन् वैलक्ष
ण्यदर्शनात् घटमृत्पिण्डादिष्वपि अनुक्रि
यादिव्यवहारभेदादभेदो नास्त्येव अथ
वा कार्यकारणयोरत्यन्ताभेदे प्रपञ्चब्रह्मणो
५५.५.4 ररवण्डतया सर्वत्रकर्तृकर्मक्रियादिव्यवहार
लोप एव स्यादित्येवं प्राप्ते ब्रह्मणः का
रणात् ब्रह्मणः कार्यं जगदनन्यदेव कथमव
गम्यते वाचारंभणशब्दादिभ्यः -यथा वा
चारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं
तदैक्षत बहु स्यां प्रजायेयेति - सदात्ममि
दं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेत
केतो विश्वं भूतं भुवनं चित्रं बहुधा जातं
जायमानं च यत्सर्वं रुद्र इत्यादिशब्दे
भ्यः - यदुक्तं कार्यकारणयोरनन्यत्व
साधकं भवतीति तत्राह -

॥ भावे चोपलब्धेः ॥

घटादिकार्यभावे च मृन्मयं घटइति -
उपलभ्यते - अतः कारणादनन्यदेव कार्यं
कथं वाचारंभणं विकारो नामधेयं
मृत्तिकेत्येव नामधेयं सत्यं - मृत्तिकैव
मद्व्यतिरेकेण घटभावादर्शनात् - अथ
वा- वाचारंभणं विकारो घटो वाचारंभणं -
घटोपमिति वागारंभणविषयमात्रं मृत्तिके
त्येव नामधेयं घटो सत्यं घटो मृदेवेति -

अतः कारणात्तदन्यत्वेन कार्यसिद्धिर्न संभव
ति । किन्तर्ह्यर्थक्रियादिव्यवहारो मृद्घटयोः
वस्तुत्वेऽपि भवत्येव । ततो मृद्घटयोर्यमि
ति अर्थयोरिव ब्रह्मप्रपञ्चयोरपि व्याप्यव्या
पकभावात् तदन्यत्वं तथा पुराणवाणी-
६९. १० शाक्यादि च बृध्निव्यंत शिवतत्त्वसमुद्भवं ।
तेनैकेनात्तु तद्व्याप्तं मृदा कुम्भादिकं य-
था इति मृद्रूपं घट इत्यत्र ---- व्याप्ते
स्वरूपेण घटे दृश्यते तथा ब्रह्मेदं जगदि
त्यत्र ब्रह्मव्याप्तिः - कथं दृश्यते सर्वत्रेति
चेत् सद्घटः सन्पट इति सर्वत्र दृश्य-
ते हि सद्रूपस्य ब्रह्मणो व्याप्तिः सच्चिद्रूपे
ण शिवेन यदि न व्याप्तः जगत् सत्तास्फूर्ति
भ्यां विनाकृतं कथमेतद्दृश्यते अवस्त्वेव
भवति । अतो मृदा घटादिकमिव कारणेन
शिवेन कार्यमिदं व्याप्तं तदनन्यभूतं चेति सि-
-द्धमेव द्धं ।

॥ स्पत्वाच्च परस्य ॥
कार्यविकारेण संबन्धात्कारणादनन्यदेव कार्यं घटशरावादिकं पूर्वमेवं मृदेवासीदिति घटादिकं मृदात्मनोपलभ्यते -
॥ असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेः शब्दान्तराच्च ॥
इदं वा अग्रे नैव किंच नासीत् इति कार्यस्य पूर्वमसद्व्यपदेशात् कारणे कार्यमसदिति चेत् - न - स्थूलत्वविरोधि सूक्ष्मत्वधर्मान्तरयोगनिमित्तं नामवत्त्वमयति। पिण्डत्वघटत्वकपालत्वपरस्परविरोधिभिर्भावरूपैर्धर्मैर्घटः प्राङ्नासीदिदानीमासीत् तदानीं न भवतीति सदा विद्यमानस्यैव मृत्पिण्डस्यैवा असदादिव्यपदेशः तथा शब्दादेवासद्व्य

पदेशः नाभावादिति - कुतः तदसदेवास
६६ न्मनोऽकुरुत स्यामिती ति वाक्यशेषा
दवगम्यते - नमस्कारोहि - विद्यमानस्यै
व युक्तिरपि तथा धर्मान्तरयोगनिमित्तता
मवगमयति पिंडत्व घटत्व कपालत्व परस्प
रविरोधिभिर्भावरूपैर्धर्मैः घटः प्राङ्ना
सो सन्नीमासीत्तदानीं न भवतीति सदा
विद्यमानस्यैव मृत्पिण्डस्यासदादि-
व्यपदेशः ॥ तथा शब्दान्तरं च तद्धैत
त्तदव्याकृतमासीत्, इत्यादि - अयमभिप्रा
यः - पूर्वं स्वात्मनि नामरूपविभागानर्हस्थू
लचिदचिद्रूप परशक्तिगर्भितो हि शिवः
केवलो भवति - पुनः स्वात्मिकां तादृशीं शक्तिं
पूर्वदशाविरोधि स्थूलयुक्तनामरूपवि
भागार्हं, चिदचिद्रूपं बहिर्विस्तारयति -
तत्र शक्तिमतच्छिवस्य संकोचावस्थापक्षः -

निकासावस्था सृष्टिरिति। तथा प्रवचनम
पि - चिदात्मैव हि देवोंतः स्थितं मि
च्छा वशाद्बहिः। योगीव निरुपादा
नं अर्थजातं प्रकाशयेत् इति। निरुपादान
मिति। निरपेक्षितोपादानांतरः स्वयमु
पादानं भूत्वेत्यर्थः ततः परं कारणात् पर-
ब्रह्मणः शिवादभिन्नमेव तत्कार्यं भेद जगदि
ति - निदर्शनान्तरमुच्यते -

॥ पटवच्च ॥

यथा संकुचितः सूक्ष्मरूपः पटः प्रसारि
तो मह - - - कुटि रूपेण कार्यं भवति
तथा ब्रह्मापि संकुचितरूपं कार्यं भवति।

॥ यथा... प्राणादिः...॥

६६ यथा वायुरेक एव वृत्ति विशेषे - - - -
दं भजते। तथा ब्रह्मापि शक्तिव्यापारभे
देन सदाशिवादि विश्वरूप भेदं भजते ततो

ब्रह्मणः कारणादनन्यदेव कार्यं जगदिति
समीचीनं॥ उत्तरार्ध्यमाशङ्क्य समाधत्ते·
॥ इतरव्यपदेशा — ता करणा
दिदोषप्रसक्तिः॥
तत्त्वमसि· अयमात्मा ब्रह्मेत्यादिना कार्य
भूतस्य जीवस्य कारणभूत ब्रह्मव्यपदे
शादनन्यत्वमुपपादितं - एवं सति· सर्व
ज्ञस्य परमेश्वरस्य सर्वस्य सर्वगतस्य
···· स्वस्य रहितरूपं जगदेककारणम
नभिमतरूपं करणञ्च प्रसज्यते· दो
षाय, यदि सर्वज्ञ ईश्वरस्य स्मा· दनन्यस्य
जीवस्य संसारतापे स्वस्येति जानन्.
कथं संसार निमित्तं महितं जगत्कारणं
च नानुवर्तेत ·तस्मा ज्जीवादनन्यत्वे सि
द्धे परमेश्वरस्य सर्वज्ञस्यापि स्वहिताहित
करणे विचार शून्यत्वादि दोष प्रसक्तिर्भवति

अतः कार्यकारणयो जीवेश्वरयोरनन्यत्वमयुक्तमयुक्तमिति चेत् युक्तमेत्युच्यते॥

॥ अधिकं तु भेदनिर्देशात्॥

कार्यकारणयोरनन्यत्वेपि कार्यभूताच्चिदचिद्वस्तुनः पश्चात् कारणभूताधिकमेव ब्रूयते' विश्वाधिको रुद्रो महर्षिरिति तत्तद्भेद निर्देशाद्भवति- तथाहि जीवेश्वरयो भैदो निर्दिश्यते- विद्याविद्ये ईशते यस्तु सोन्यः क्षरात्मानावीशते देव एकः पृथगात्मानं प्रेरितारञ्च मत्वा द्वासुपर्णा सयुजा सखायो द्वेः अजौ द्वावजानवीशौ नित्यो नित्यानां चेतनश्चेतनानाम् अन्तःप्रविष्टः शास्ता जनानां मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं- तस्मि

न्नान्यो मय्यासन्निरुद्धः सुपर्दे यशा, पश्य
त्यन्यमीशं प्रधानक्षेत्रज्ञपतिर्गणेशः -
येषामीशो पशुपतिः पशूनां इत्यादिभि
रनेकश्रुतिभिः उपबृंहितो विश्वस्मादधि
कमेवः परनामधेयं ब्रह्म, ननु तदन्य
त्वमित्यभेदप्रतिपादनात् आधिक्यंचेति
भेदप्रतिपादनात् प्रपंचब्रह्मणो भेदाभेदः
साधितो भवतीति चेन्न - भेदाभेदरू
पं विशिष्टाद्वैतं साध्यते नवा । यं ब्रह्म
प्रपंचयोरत्यन्तमेव भेदवादिनः घटपट
योरिव तदनन्यत्वपरश्रुतिविरोधात् -
न वाद्वैताभेदवादिनः शुक्तिरजतयोरिव
एकस्य मिथ्यात्वेन तत्स्वाभाविकगुण
भेदपरश्रुतिविरोधात् - न च भेदाभेदवा
दिनो वस्तुविरोधात् - किंतु शरीर ~~शरी~~ शरी
रिणोरिव गुणगुणिनोरिव विशिष्टाद्वैत

वादिनः प्रपञ्चब्रह्मणोरनन्यत्वंनामम्र
द्धटयोरिव कार्यकारणत्वेन विशेषण — —
— — — — च विनाभावरहितत्वं नहि
मृदं विना घटो दृश्यते नीलं विना नि
66 13 लोत्पलं तथा ब्रह्म विना न प्रपञ्चश
क्तिस्थितिः शक्तिस्थितिव्यतिरेकेण नक
दाचिदपि ब्रह्म विज्ञायते व — — — वो
पयो विना येनविनायं न ज्ञायते तत्तेन
विशिष्टमेव ... तस्य स्वभावएव अ
तः सर्वथा प्रपंचं विना भूतं ब्रह्म त
स्मादनन्यमित्युच्यते भेदस्सस्वा
भाविकः ततश्च विश्वस्मादभिन्नमेव
परब्रह्म कारणकार्यत्व व्यवस्थास्य नतु
दृष्टांताभावात् इत्यत्र निरूपितमेव
तस्माद्भेदाभेदे श्रुतीनामविरोधएवायं
मार्गः —

॥ अश्मादिवच्च तदनुपपत्तिः॥
सर्वथा जीवेश्वरयोरभेद एव अभेदश्रुति...रिति चेन्न नानुपपत्तेः- अश्मकाष्ठलोष्ट तृणादेरचेतनस्येव जीवस्याज्ञत्वादिना सर्वज्ञत्वादीश्वरात् अत्यन्तविजातीयत्वश्रवणात् तयोरेकभावो नोपपद्यते तस्मादीश्वरो जीवादर्थान्तरभूतमेव. एवं चेतनस्यापि अधिकगुणवैधर्म्यादेश्वरभावानुपपत्तेः कथमचेतनस्य स्वरूप विलक्षणस्येति तात्पर्यं. सर्वश्रुति-स्मृति न्यायैश्च स्वानन्यभूतादपि कार्यत्वेन चेतनाचेतनप्रपञ्चात् विश्वस्मादवेक एव सर्वज्ञ सर्वशक्तिः परमेश्वरः.

॥ उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि॥

एक. एवाद्वितीयं द्यावाभूमी जनयन्देव

९८A इत्यादिषु परमेश्वर एव जगत्कारणम
वगम्यते तस्यैक.. नानाजगत्कर्तृत्वेषु
कं न वेत्ति· संशयो न युक्तमिति वदन्तः
तदसम्भवात् - कार्यमेतदाकाशवा
य्वग्नि सलिलादिरूपं विचित्रं कथमेत
त्कारणवैचित्र्यमन्तरेण संभवति· दृश्य
न्ते हि रथादिकार्येषु बहुकारकोपसंहारः
तस्मादेककारणत्वं न संभवतीति :: चेत
दसच्चेतनादेकस्मात् पुरुषात् केन
शक्त्यादि विचित्रकार्यनिष्पत्तिदर्शना
त् ततो विचित्र जगत्कार्यनिर्वाहेण-
कारणान्तरापेक्षमिति; शक्तिमती सर्व-
संभाव्यमित्याह-

॥ देववदपि लोके ॥

देवादेः शास्त्रादवगतशक्तेर्यथा साऽपे
क्षित नानारूपभावः एवं शास्त्रादवगत

शक्तेः परमेश्वरस्य सर्वमुपपद्यते-एक
एव रुद्रो न द्वितीयाय इमान् लोकानीशत
ईशनीभिः परमशक्तिभिरिति परमेश्वर-
स्यानन्तशक्तित्वं तस्य न किं साध्यं
।। कृत्स्नप्रसक्तिर्निरवयवत्वशब्द
कोपो वा ।।

... अतः पूर्वोक्तो ब्रह्मणः जगदाका
------- ति सन्देहः कथं युज्य
ते एकमेव जगदाकारेण परिणमतीत्यु
क्ते तस्य क्षीरस्येव दधिरूपेण सर्वात्म
ना जगदाकारेण परिणामे कृत्स्नस्यापि
कार्यत्वप्रसक्तिः न ब्रह्म परिच्छिद्यते-के
६८. 13. न चिदंशेनेति चेत् तस्य निरवयवत्व-
श्रुतिकोपो वा भवति। तस्माद् ब्रह्म परिणामो
न युक्त इति प्राप्ते ब्रूमः-
।। श्रुतेस्तु शब्दमूलत्वात् ।।

ब्रह्मणो जगत्परिणामो युक्त एव तच्छ्रुतेः
श्रुतिरेवात्र प्रमाणं न प्रमाणान्तरं शब्द
मूलत्वादेव तस्य सकलेतर प्रमाणावगत
वस्तु विजातीयत्वेन तत्तादृश शक्तियोगवि
रोधाभावात् अतः परिपूर्णस्य तस्यैव
कार्यत्वं कारणत्वं च संभवति यथा जातिवा
दिनां जातेः खण्डमुण्डादिषु तस्य स्व
रूपनिरूपणे शब्द एव मूलमिति न स
र्व विरोधः

॥ आत्मनि चैवं विचित्राश्च ॥

जीवात्मनि चाविद्धर्म विरोधिधर्म
योगोपि विजातीयत्वादेव भवति अग्नि
जलादयो व्यतिरेकि शेषा अन्योन्य विल
क्षणान्वित शक्तयो दृश्यन्ते ततो ब्रह्मापि
शब्दैक प्रमाणं विचित्रानन्त शक्तिकमेव मेव ततो विचित्रानन्तशक्तिकत्वे
त्वे नाविरोधः

।। स्वपक्षदोषाच्च ।।
कृत्स्नप्रसक्त्यादि दोषो. निरवयवत्वे
सजातीयं प्रधानादौ हि नब्रह्मणे·
शास्त्रप्रमाणे— सर्वोपपत्ति मह—
।। सर्वोपेता च तद्दर्शनात् ।।
परस्य शक्तिर्विविधैव श्रूयते स्वाभावि
की ज्ञान बलक्रिया च· मायांतु प्रकृतिं—
विद्यान्मायिनं तु महेश्वरं तस्यावयवभू
तेन व्याप्तं सर्वमिदं जगत्· इत्यादि दर्श
नात्: सर्वशक्ति.. ब्रह्मोपेतेति विज्ञा
69· यते· अतः सर्वशक्तिः ततः किंतस्य सं
भवति· · · · · · ·
।। विकरणत्वान्नेति चेत्तदुक्तम् ।।
न तस्य कार्यं करणं च विद्यते इति·
ब्रह्मणोपि विकरणत्व मुच्यते ततोस्य नका
रणत्वमितिचेन् तस्योत्तर शब्दमूलत्वादि

त्ति पूर्वमुक्तमेव विचेतानन्तशक्तिशवका -
-या. परमशक्तिविशिष्ट. परमेश्वरः. स्वशक्तिशकलेन प्रपञ्चाकारं प्रपञ्चातीतश्च
भवतीत्यत्र मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं। तस्यावयवभूतेन व्याप्तं सर्वं जगदिति श्रुतिरेव भवति-प्रमाण,मत्रविषये पुराणश्च.. विश्वोत्तरोत्तरविचित्रमनोरथस्य · यस्यैकशक्तिशकले सकलस्समाप्तः। अध्वानमध्वपतिमध्वविदोवदन्ति तस्मै - - - - - लोकविलक्षणाय।
इत्येवं सकलदोषकलङ्करहित शब्दप्रमाणैकसिद्ध सर्वशक्तिसंपद्विलसे परमेश्वरे परब्रह्मणि संभावना संभावनाविचारस्य सर्वस्य निरवकाशत्व- पुनरन्यथानुपपत्त्याक्षेपं परिहरति -

॥ नप्रयोजनवत्वात् ॥

शास्त्रावगात सर्वशक्तो ब्रह्मणस्सर्वकार्येषु करण सामर्थ्यमस्तीति निर्णितं तथापि सर्वप्रवृत्तेः प्रयोजनवत्वात् अवाप्त-सकलकामस्य परमेश्वरस्य जगत्सृष्ट्यादिव्यापारः संभवति नवेति सन्दिह्यते-अतः कथं संभवति 'आनन्दो ब्रह्मवि
६९ भूं छंद्दानन्दमरूप मद्भुतमुमासहाय
13 मित्यादि श्रि.निरतिशयानन्दस्वरूपो-नित्यतृप्तो हि शिवः श्रूयते: कथमसौ सृष्ट्यादिव्यापारेण प्रयोजननिरपेक्षं प्रप्रवर्तते.. यदि सप्रयोजनस्य प्रवृत्तिः-नित्यतृप्यताहानिः स्यात् अन्यथा जलमूकादिवत् अनुचेतकारी स्यादिति पाप्ते ब्रूमः-

॥ लोकवत्तु लीलाकैवल्यम् ॥

यदुक्तं नित्यतृप्तस्य प्रयोजनाभावात्-

अप्रयोजना जगत्सृष्ट्यादि प्रवृत्तिर्न संभवतीति ∴ संभवत्येव निष्प्रयोजनापि प्रवृत्तिः केवलं लीलामात्रेण परमेश्वरस्य यथा लोके प्रयोजनमन्तरेणापि केवललीलया कौतुकतापनादिषु प्रवृत्तिः ∴ परमेश्वरस्यावाप्तसकलकामस्यापि लीलया सृष्ट्यादि प्रवृत्तेरपि विरोधएव

॥ वैषम्य नैर्घृण्येन सापेक्षत्वात्तथाहि दर्शयति ॥

प्रयोजनाभावेपि लीलया परमेश्वरस्य जगत्सृष्ट्यादिषु प्रवृत्तिरिति निरूपितं - तत्तु पुनस्सन्दिह्यते सैषा संभवति नवे ∴ लीलयापि परमेश्वरस्य सृष्टेर्न संभवति परिपूर्णतया रागद्वेषादिहीनत्वात् - सकल सामान्येन मध्यस्थएवहि परमेश्वरः तदस्य केषांचित् सुखमयं देवशरीरं के

प्राप्ति दुःखोत्तरं मनुष्यशरीरं सृजतो वै
षम्यं दुर्वारं - किंच सृष्टेः संहार पूर्वत्वात्
६० सू. सकलं युगपत्संहरतो नैर्घृण्यं च भवति ·
तदेवं पुरुषार्थ धर्म संबन्धा पादिन्या-
जगत्सृष्ट्यादिः परमेश्वरे वैषम्य नैर्घृ-
ण्ये न भवतः कर्मसापेक्षत्वात् सृष्टिवैष
म्यस्य ज्ञाज्ञौ द्वावजावीशनीशौ इ
त्यादिना यथा जीवानां अनादित्वं श्रुत
दृश्यते हि - यतः कर्म प्रवाह सिद्धोयं सं
सारः परमेश्वरो हि जीवानां विचित्रं क
र्मावलोक्य सर्वज्ञतया स्वशक्त्या तत्तदनु
गुणमेव भोगायतनं देवादि शरीरं सृजति
ततः कर्ममूलमेव सृष्टौ वैषम्य संहार व्या
पार खिन्नानां सुषुप्तिवद्विश्रान्ति हेतुत
या परमेश्वरस्य न नैर्घृण्यावकाशः -
ननु जीवानां सुखदुःखादेः कर्मणः प्रयो-

जकत्वात् किं प्रयोजकेन परमेश्वरभव इ
तिचेत् न, कर्मणोपि तद्दर्शिनत्वात् तस्य
न स्वातन्त्र्यहानिः पुनरपि पदतिरवेरी
पभातन्यायेन कर्मण स्वातन्त्र्याभावेपि
परमेश्वरस्य वैषम्यादि दोषापत्तिरितिन
वाच्यं कर्मशक्तीनामनन्तानां मायाग
तानां संस्थापकमात्रत्वात् परमेश्वरस्य
कर्मणामेव स्वशक्तिवशात् सृष्टिवैषम्य
हेतुत्वं तद्धव स्थापकमात्रकस्य वैषम्या
दि दोषापत्तिरिति ननुजीवानां शरीर
सृष्टौ ~~अचेतनस्य~~ कर्मणां ~~चेतन~~ अप्य
चेतनत्वेन परमेश्वर एव प्रयोजक इति
सिद्धं कथमसौ सृष्टेः प्राक् संहृतभोग
60,13. साधनतया संसारक्लेशरहितान् सुखि
नो जीवान् पुनरपि संसार हेतुना शरीरे
ण योजयति परमकारुणे कोपीतिचेत् –

न. सर्वानुग्राहकः परमेश्वरः सर्वेषांजी
वानां कर्मपाकमन्तरेण ज्ञानानुदयात् ज्ञान
मन्तरेण निरतिशयानन्द मोक्षाभावात् क
र्मपाकस्य च भोगादन्तरेणानुपपत्तेः तत्क
र्मफलभोगाय पुनरपि तेषां शरीरादिकं क
ल्पयति. एवं क्रमेण परत्वे कर्मणि भोगे
न जीवानां विशुद्धान्तःकरणानां स्ववि
षयज्ञानमुत्पाद्य निरतिशयानन्दां मोक्ष
लक्ष्मीं प्रकाशयति. एवं शक्तिमान् परमेश्व
रः परमकारुणिकः कथं वा युगपदेव स
र्वजीवानां कर्मपाचयित्वा समम् एव मोक्षानन्दं
प्रकाशयतीति चेत् सत्यं. परमेश्वरेण.
सममेव सर्वेषामनुग्रहे क्रियमाणे. ये प
क्वमलास्ते मुच्यन्ते. अपक्वमलाः काल
क्रमादेव. यथा सवितृकिरण सन्दोहे
सममेव संततेऽपि पक्वा एव पद्मा विकसन्ति

रः. पक्षः. ततः परिपूर्णोऽपि परमेश्वरः प
रार्थमेव सर्वप्रवृत्तिं करोति. तथा पौराणि
की भणितिः. आदित्येन यथा हीनं तमो
भूतमिदं जगत्। शिवेनापि विना तद्व
त्तमोभूतमिदं जगत्॥ वैद्यं विनाऽनि
रानन्दाः क्लिश्यन्ते रोगिणो यथा। शिवं
विना निरानन्दं क्लिश्यन्ते हि जगत्कार्य-
तथा॥ व्याधीनां भेषजं यद्वत् प्रतिपक्षः
११ स्वभावतः। शिव संसारदोषाणां प्रति
पक्षः स्वभावतः॥ यथा ह्यादिप्रवृत्तोऽयं घो
रः संसारमण्डलः। तथानादिप्रवृत्तोऽयं
शिवः संसारमोचकः॥ इत्यादिका. अ
तः परमेश्वरस्य सर्वानुग्रहप्रवृत्तेर्जग-
त्सृष्ट्यादिव्यापारः संभवत्येव॥
॥ सर्वधर्मोपपत्तेश्च॥
किं बहुना प्रधानपरमाणुकर्मकालादीनां

ये धर्मा अनुपपन्नास्ते सर्वे ब्रह्मण्युपपद्यन्ते-
ततो ब्रह्मैव सर्वातिशायि जगत्सृष्ट्यादिका
रणमेति समञ्जसम्॥

इति

श्रीकण्ठशिवाचार्यविरचिते ब्रह्म
-मीमांसाभाष्ये द्वितीयस्याध्याय
स्य प्रथमः पादः॥

॥ रचनानुपपत्तेश्च नानुमा-
नं प्रवृत्तेश्च॥

पूर्वपादे सांख्यादितर्कविरोधमाशङ्क्य
स्वपक्षसाधनं कृतं पुनरिह तर्कावलम्ब
नेन सांख्यादिपरपक्षदूषणं क्रियते॥
प्रथमं सांख्यप्रधानकारणवादो युक्तो-
न वेति सन्देहः- सन्देहबीजं सर्वत्र
प्रसिद्ध... आदरणीयमेव- प्रधानकारणवा
दएवं युक्त इत्यवगम्यते- प्रधाने हि रजस्स-

त्व तमोरूपं तदेव जगतः कारणं भवितुम
र्हति सर्वत्र तत्कार्ये सुखदुःखमोहाद्यन्व
यदर्शनात् - तथाहि घटादयो ह्युपलब्धाः
प्रावरणादि हेतुतया सुखाय भवन्ति दुः
खायान्यापहृताः । कार्याभावादुपेक्षिता
मोहाय तदेवं सुखाद्यन्वया. त्रिगुण
मेव प्रधानं जगत्कारणमिति प्राप्ते निषिध्
यते - न प्रधानं जगत्कारणं अचेतनत्वात् -
तथाहि दार्वादि रचेतनस्य रथप्रासादा
दिनि मणि तद्वा नाधिष्ठितस्य रचनो
69.13. पपद्यते । तज्ज्ञानाधिष्ठितस्य रचना प्रवृत्ति
श्च दृश्यते - अतश्च नाचेतनं प्रधानं जगत्का
रणं भवितुमर्हति - यदुक्तं सुखाद्यन्वया
दिति - तदसत् सुखादीनामान्तरत्वात् -
घटादीनां बाह्यत्वात् अतः प्रधानकारणवा
दे नयुक्तिः संभवः - आशङ्क्य परिहरति -

॥ पयोम्बुवच्चेत्तत्रापि ॥

यथा पयोम्बुवत्. इत्यादिभावे अधिष्ठाना
नपेक्षं तद्वत्प्रधानमपीति चेत् नतत्रापि
युक्तएवहेतुः तस्याप्यचेतनत्वेन प
क्षीकृतत्वात्. किंच.

॥ व्यतिरेकानवस्थितेश्चानपे
क्षत्वात् ॥

यदि प्रधानाधिष्ठानानपेक्षत्वमचेतनस्य
प्रवृत्तौ तदा सर्वदा सृष्टिप्रसङ्गो भवति.
ततोनाचेतनं प्रधानं कारणं.

॥ अन्यत्राभावाच्च न तृणादिवत् ॥

क्षीरायमाणत्वानुपयुक्तं तृणादिवत् तद्
चेतनमपि प्रधानं कारणमिति युक्तं न वक्तुं-
केवलं तृणादिषु संभवात् तदपि प्रधानापे
क्षितमेव-

॥ पुरुषाश्मवदिति चेत्तथापि ॥

अचेतनमपि प्रधानं पुरुष सन्निधानात् प्रव-
-र्त्तते यथा वकुलं धरं यथायोगस्कान्त
मणिं तते. न प्रद्वापेक्षेति चेन् तथा नप्र
धानस्य प्रवृत्तेरस्ति पुरुषस्याविकृतत्वा
त्. पं.का. कमादे मीर्गोप्रदृश्यते देशांत
र प्राप्त्यादि कदाचिद्विकारो भवत्येव. त
२. स्मादविकृतः पुरुष संनिधिः प्रधानप्रवृ
A. त्तौ न हेतुः
॥ अङ्गि.त्वानुपपत्तेश्च ॥
गुणानामुत्कर्षापकर्षभावो गाङ्गिभावः
ततो जगत्प्रवृत्तिरुच्यते - प्रतिव.र्गावस्था
यां साम्यावस्थानां वैषम्याभावात् -
तत्कृताद्ङ्गित्वानुपपत्तिः - अतश्च जग
दारंभो नयुज्यते प्रधा.नकारणे ॥
॥अन्यथा नुमित्तौ च ज्ञातृत्व वि
योगात् ॥

उक्तप्रकारादन्यप्रकारेण प्रधानेनुमीयमाने
ज्ञातृत्वशक्तिवियोगात् रचनानुपपत्तिस्त
दवस्थैव।

॥ अभ्युपगमेप्यर्थाभावात् ॥

यथाकथंचित् प्रधानस्याभ्युपगमे यदि
प्रयोजनं तदभ्युपगच्छामः। न किमपि प्र
योजनमस्ति यतः पुरुषस्य निर्विकारक
त्वात् प्रधानदर्शनादिरूप स्वीकाराभावः
अतएव प्रकृतिधर्माध्यास निमित्त भोग-
स्तद्विवेकानुसंधानकृतं कैवल्यं च न सं
भवति। अतः प्रयोजनाभावात् प्रधान-
-म् अस्वीकार्यं।

॥ विप्रतिषेधाच्चासमंजसम् ॥

पुरुषस्य दृष्टृत्व भोक्तृत्वं निर्विकारत्वादि
विरुद्धधर्माभ्युपगमस्य दृश्यते। अतोप्य
समंजसमेव कापिलमतं; सर्वथा प्रधान

कारणवादो निष्प्रामाणिक एवेति निरूपि
तम् - अतः परम्. परमाणुकारणवादे नि
रसनाय प्रकरणमारभ्यते -

॥ महद्दीर्घवद्वा ह्रस्वपरिमण्डला
भ्याम् ॥

अत्र वैशेषिकमतसिद्धिः. परमाणुकारणवा
62. B. दो युक्तो नवेति सन्देहः प्रधानमते अ
चेतनत्वात् परमेश्वरानङ्गीकारात् तत्र तत्कार
णवादे विरुद्धेऽपि परमाणुकारणवादो तु-
युज्यते. तथा हि - प्रलीने जगति परमेश्व
रस्य सर्वज्ञस्य सिसृक्षायां सत्यां प्राणि
नां कर्मवशात् निश्चलेषु परमाणुषु आद्यं
कर्मोत्पद्यते. तस्मात्कर्मणः एकः परमाणुः
परमाण्वन्तरेण संयुज्यते तस्माच्च संयोगात्
द्व्यणुकमारभ्यते. तेभ्यस्त्रिभ्यो द्व्यणुकेभ्यः
त्र्यणुकमित्यादिक्रमेण सर्वजगदुत्पद्यते.

ततः परमाणुकारणवादे न विरोधइति पूर्वपक्षे सिद्धान्त उच्यते - ह्रस्वपरिमण्डलाभ्यां महद्दीर्घत्र्यणुकद्व्यणुकाख्यानि उच्यते कारणादमते, कथमेतत्सर्वं भवति· इदं सर्वं समञ्जसमेव - तथाहि - परमाणवः परिमण्डलपरिमाणयुक्ताः - द्वाभ्यां परमाणुभ्यां अणुपरमाणु रहिताभ्यां अणुपरिमाणोपेत द्व्यणुकमुत्पद्यते· इदं किमुचितं. एतदनुचितमेव सर्वं भवति· अवयवास्त्रिचैः पड्भिः पाश्र्वैः संयुज्यमानाभिः पृथुतरमवयविनमारभते· परमाणूनां पार्श्वाभावात् पार्श्वानपेक्षया संयुज्यमाना· पृथुतर द्रव्यारम्भकत्वं न संभवति अतः परमाणुकारणवादो न युक्त एव - पुनरनुपपत्तिमाह·

॥ उभयथापि न कर्मातस्तदभावात् ॥

अणुगताद्यकर्माभावादेव तत्कृतानुसंयो
गाभावः जीवादृष्टानां विपाकापेक्ष
६३.ब त्वेऽपि न तत्कृत कदाचित्काणुगत कर्मसं
भवः - अनपेक्षत्वे प्रावाह्यु त्पादकं स्या
त् विपाको नाम दृष्टोऽतः कश्चित्कर्मो
न जायते कर्मविष्ठित्वे ख्यायामेव कालविशे
षनियतफल दायित्वं. यस्य कस्य तचित्क
र्मण क्वोदितं तस्य तत्कालागमएव, विपाकः
अनियतकाल विशेषाणां कर्मणां प्रबलक
र्मान्तर प्रतिबन्धाभाव एव कर्मविपाकः
अदृष्टानि तत्तत्कर्मानुगुण फलदान स्वभा
वानि अतोऽनन्तैरात्मभिः विविध कालफ
ल दायित्वेन अनुष्ठितानामेकदैकरूप विपा
को न संभवति. अनुमेयेश्वरासिद्धेश्च तद
धिष्ठानं च न संभवति. अतः परमाणुकारणवा
दो न युक्त एव. इत्यैच्छानुपपत्तेरित्याह-

॥ समवायाभ्युपगमाच्च साम्यादन वस्थितेः ॥

समवायइति संबन्धोऽभ्युपगम्यते। अतएवास मंजसमेतत्कणं समवायस्यापि जातिगुणादेरिवापृथक्सिद्धिहेत्वपेक्षा साम्यादनवस्थानात् ततः कणाद. मतमसमंजसमिति।

॥ नित्यमेव च भावात् ॥

समवायस्य नित्यत्वाङ्गीकारे संबन्धिनिमित्तमन्तरेण तदनुपपत्तेरवयवावयविनोरपि नित्यत्वप्रसङ्गात् असमंजसमेतत्।

॥ रूपादिमत्वाच्च विपर्ययोदर्शनात् ॥

परमाणूनांमत रूपादिमत्वमङ्गीक्रियते अत स्तन्नित्यत्वादि विपर्ययः तथाघटादिषु दृश्य तेहि। तस्मादिदमसमंजसं एवं प्रकारेण क.

६२-१३: णादमतं- . . . .

॥ समुदाय उभयहेतुकेपि तदप्राप्तिः ॥

वैकैकदेशिनां मतं निरूपितं - इदानीं वेदबाह्यानां मतं निरस्यते प्रथमामिह बौद्धमत सिद्धान्तः समुदायकारणवादो युज्यते नवेति संशयः - युज्यते इति पूर्वः पक्षः तथाह्याम्नन्ति· द्वावेव समुदायौ जायते आन्तरस्य समुदायस्य - स्कंध पंचकं कारणं रूप वेदना विज्ञान संज्ञान संस्कार रूपाः पञ्च स्कंधाः - चित्ते निरूप्यमाणा शब्दस्पर्शादयो रूपस्कंधाः तदाभिर्व्यक्तिमव ज्ञान स्कंधः तज्जन्य दुःखी· वेदना स्कन्धः . वेदनादि नाम संज्ञा स्कन्धः तेषां वासना संस्कार स्कंधः - तेभ्यः पुंजीभूतेभ्यः अंतरस्समुदायो जायते· अतस्समुदा

यकारणवादे कोविरोध इति प्राप्ते निरू
प्यते । नयुक्तः समुदायवाद इति । ते हि
क्षणिकत्ववादिनः कल्पमेणां समुदाय
स्संभवति कारणानां परमाणूनां क्षणि
कत्वेन तदानीमेव नष्टत्वात् कार्योत्पा
दन सामर्थ्यत्वात्

॥ इतरेतरप्रत्ययत्वादनुपपन्नमिति चे
त् न संघातभावानिमित्तत्वात् ॥
अस्थिरेषु स्थिरत्वं बुद्धिरूपा या, अविद्या या
अन्योन्यकारणत्वादुपपन्नमिति चेत् -
अविद्यायाः संघातभावानिमित्तत्वा
न्न हि शुक्तिकादिषु रजतादि बुद्धिरूपा विद्य
या शुक्तिकादि वस्तुतो रजतादि कार्यं क
७५व रोति । किंतु स्तदानीमेव नष्टत्वात् -
तन्निमित्तं निमित्तरागादयोपि नसंभव
त्येव तस्मादेवमयुक्तस्समुदायकारण

वृद्धे:: पुञ्ज - - - तस्माह.
॥ उत्तरोत्पादेच पूर्वनिरोधात्॥
उत्तरघटक्षणोत्पत्तौ पूर्वघटक्षणस्य
विनष्टत्वात् अभावस्यैवोत्पादकत्वावि
शेषात् सर्वदा सर्वोत्पत्तिरपि स्यात् -
॥ असति प्रतिज्ञोपरोधो यौगप
द्यमन्यथा॥
असति तु उत्पत्तावधिपति सहकार्या
दीनां ज्ञानहेतुत्वात्प्रतिज्ञाविरोधः..
तस्यापि स्थित्युपगमे युगपद्घटद्वयो
पलब्धिप्रसक्तिः अस्थितौ संप्रयोगज्ञा
नादे यौगपद्यं -
॥ प्रतिसंख्याप्रतिसंख्यानिरोधा
प्राप्तिरविच्छेदात्॥
निरोधो निरन्वयविनाशः - सच स्थू
लस्य सूक्ष्मस्य नसंभवति कपाला

द्विभावरूपावस्थाप्राप्तेरेव विनाशः
शब्दवाच्यत्वात् सतो द्रव्यस्य विच्छेदात्
ततो न क्षणिकत्वसिद्धिः।
॥ उभयथा च दोषात् ॥
उत्पन्नस्य तुच्छतापत्तौ तुच्छादुत्पत्तौ चा
भावात् अभावात्म कार्योत्पत्तिरूपदोषा
त्। न तुच्छत्व ~~बुद्धि सिद्धिर्यत्~~ सिद्धिर्भ
वति।
॥ आकाशे चाविशेषात् ॥
आकाशो न तुच्छत्वमुत्पद्यते अबाधितत्वा
त्। अस्य श्येनादि पतनदेशेन।
॥ अनुस्मृतेश्च ॥
प्रत्यग्ज्ञानादपि न क्षणिकत्वसिद्धिः तदे
वेदमिति सामानाधिकरण्येन प्रतीत
पू॰ उ-वर्तमानकालविशिष्टं वस्त्वेकमिति हि
वि ज्ञायते। स्मर्ता च तस्याः पूर्वानुभव

जनित संस्कारवतः पुरुषस्येन्द्रियसंयोगः ततः क्षणिकत्वाद्यनुपपन्नाभिधानत्वादसंबन्धएव समुदायकारणवादः ॥ सर्वक्षणिकवादि निरस्तः ततश्च विज्ञानमेवेति वादि निरस्यते

॥ नाऽसतोऽदृष्टत्वात् ॥

इह बौद्धैकदेशिनो ज्ञानानुमेयवादी - युक्तो भवति संशये पूर्वपक्षप्रसङ्गः ज्ञानाकारवैचित्र्येण बाह्यार्थ वैचित्र्यमनुमीयत इति तदेतेन संभवतीत्युच्यते अर्थस्य क्षणिकत्वात् असतो विनष्टस्य धर्मिणो धर्मसङ्गमस्यादृष्टत्वाद्यमनुपपन्नः

॥ उदासीनानामपि चैवं सिद्धिः ॥

क्षणिकत्वाद्यभ्युपगमादन्य एवानुष्ठाता अन्य एव फलस्वामी ततो निष्प्रयत्नाना

मपि सर्वार्थसिद्धिः स्यात् ततो पुरुषपा
दोयं वादः -

॥ प्राय उपलब्धेः ॥

उ. बौद्धानां केवल विज्ञानवादोयु
क्तो नवेति संदेहे युक्तमिति पूर्व मुच्यते
तथाहि विज्ञानमेव तत्वमांतरं न बाह्यः
पदार्थः स्वप्ने बाह्य पदार्थाननपेक्ष्य
केवलया बुद्ध्या व्यवहार दर्शनात् त
स्यैव जाग्रद्व्यवहारस्यापि व्यवस्था यु
ज्यते ततो विज्ञानमात्रं तत्वमिति प्राप्ते
नयुक्तमित्युच्यते घटं जानामीति क
र्तृकर्मतया र्थस्यैवोपलब्धेः तदभावो
८६ न शक्यते वक्तुं पुरुषस्यार्थविशेषस्य -
व्यवहारानुगुण्यापादकत्वमेव ज्ञानस्याका
रः यदुक्तं स्वप्नदृष्टान्तेन जाग्रद्व्य
वहारस्यापि शून्यत्वं तदसत् स्वप्नस्य

बाध्यमानत्वात् जागरितस्यापि बाधदर्शनाद्विषमो दृष्टान्त इत्यर्थः ॥

॥ वैधर्म्याच्च न स्वप्नादिवत् ॥

कारणदोषरूपराहित्यरूप वैधर्म्याच्च न स्वप्नादिवत् जागरितज्ञानस्य मिथ्यात्वं ततो न विज्ञानमात्रं युक्तं तरमाह-

॥ भावोऽनुपलब्धेः ॥

अर्थशून्यस्य ज्ञानस्य सद्भावो न संभवति तत्राप्यनुपलम्भात् स्वप्नज्ञानस्यार्थवत्त्वान्न संभवत्येव ततो विज्ञानमात्रत्वमनुपपन्नमेव ॥

॥ सर्वथानुपपत्तेश्च ॥

इहाधिकरणे सर्वशून्यवादो युक्तो नवेति सन्देहः एवं सति युक्तिमापादयति सर्वं जगत् असत् साक्षित्वात्

नासत् प्रतीयमानत्वात् नोभयात्मकः
विरोधात् नानुभयात्मकं असंभवात् किं
तु चतुष्कोटिनिर्मुक्तं सर्वं शून्यमेव
प्रत्यक्षाभावस्तु संवृतिमूलः तस्माच्छू
न्यवादः परं समीचीनमित्येवं प्राप्ते
सिद्धान्त उच्यते न संभवति सर्वशून्य
वादः ततः स्यादिति प्रतिज्ञातायां च
तुच्छत्वासंभवादनुपपत्तेः तदसि
द्धि तच्छब्दानां वस्तुगतान्योन्यवि
रुद्धभावाभावरूपावस्थाविशेषवि
66 13. पयत्वात् यत्संवृतिमूलः प्रत्यक्षा
वभासः इति तदपहारूपः सर्व
स्य शून्यत्वे कस्य प्रतीतेराश्रयः
यस्यैवमवभासः ततस्सर्वशून्यवा
दः सर्वविरुद्ध एव
॥ नैकस्मिन्नसंभवात्

गता बौद्धाः। जैनमतं निरस्यते - जैना
हि सप्तभङ्गीन्यायेन एकस्मिन्नपि व
स्तुनि नानाभावमापादयन्ति - तदेषां मतं
युक्तं न वेति विचारः - तदेवं तेषां प्रक्रि
या जीवाजीवाख्यौ द्वौ पदार्थौ जीवश्चेतनः
शरीरपरिमाणः सावयवः - अजीवश्च षड्वि
धः वनमाम्र धरादिरेकः। आस्रवसंव
र निर्जर बन्ध मोक्षाख्याः पञ्च एवं सप्त
अनेन जीवो विषयेष्वास्रवतीति इन्द्रिय
संख्यातं संवृणोतीति विवेकमिति अवि
वेकादिः संवरः निःशेषेण जीर्यते कामादि
रिति केशोल्लुञ्चन तप्तशिलारोहणादि त
पः इह निर्जरः। कर्माष्टकापादिता जन्म
परंपरा बन्धः चत्वारि घातिरूपाणि पा
परूपाणि चत्वार्यघातीनि कर्माणि पुण्यरूपा
णि तेभ्यो मुक्तस्य जीवस्य सततोर्ध्वगमनं

मोक्ष: एते सप्त पदार्था: सप्तभंगिन्यायेन
व्यवस्थाप्या: स्यादस्ति. स्यान्नास्ति च ना-
स्ति च. स्यादवक्तव्यं स्यादस्ति चावक्तव्यं-
स्यादस्ति च नास्ति चावक्तव्यं इति. सप्तभं
गिन्याय: स्याद्वजनमोपदर्श: अतस्स
प्तभंगिन्यायात् सप्तपदार्थसिद्धिरिति - ए
१६ब. तदयुक्तमित्युच्यते अतः एकस्मिन्
वस्तुनि सत्वासत्व नित्यत्वानित्यत्व भेदाभेदा
दीनामसंभवात् पर्यायरूपाक्ष द्रव्य
स्यास्तितादि शब्दबुद्धि विषया: परस्पर
विरुद्धा: पिंडत्व घटत्व कपालत्वादय
स्था..... युगपन्न संभवति. अतो विरुद्ध
एव जैनवाद:....... एवं चात्मनश्श
रीरपरिमाणत्वेन बृहत् शरीरा... लघीय
सि प्रविशतो विकलत्वं प्रसज्यते. अत आ
त्मनः शरीरपरिमाणत्वं अयुक्तमेव

॥ न च पर्यायादप्यविरोधो विकारादिभ्यः ॥

तथाप्यत्र योगावस्थायोगादपि अविरोधो न संभवति - घटादिवद्विकारादियोगप्रसङ्गात् अत्यावस्थिते

॥ अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ ^1

...... विध देहपरिमाणत्वे वैकल्यं भवत्येव अतएकस्मिन् सत्त्वासत्त्वादिवादादात्मनः शरीरपरिमाणत्वादिवादाच्च जैनमतं विरुद्धमेव.

॥ पत्युरसामञ्जस्यात् ॥

पत्युः परमेश्वरस्य श्रुतिसिद्धं जगदुद्ध्.पकारणत्वा.स्यापि तदागमनिष्ठामताभिप्राया- नाभिन्ना- एकदेशिनस्तार्किकास्तु केवलनिमित्तत्वमेव वदन्ति.

1 अन्त्यस्य मोक्षपरिमाणस्यैव अन्त्यावस्थितेः तस्य - स्वाभाविकत्वेनात्मतत्परिमाणयोरुभयोः नित्यत्वेन पूर्वतादृशविशेषः

न्युक्तं नवेति सन्देहः तदेवं पूर्वपक्षः प्रस
७६९ 13. क्तः तथा हि कुलालादिरनुपादानभूत
एव दण्डादिकं नियच्छन् कर्ता भवति-
तद्वदीश्वरोऽपि निमित्तमात्रं मायोपा
दानं भवति शक्त्यः कारणं अन्यथा मृदा
दिवत् ईश्वरस्योपादानत्वे विकारादिप्र-
सक्तिः अतो निमित्तमेव परमेश्वर इति -
अतोच्यते - पत्युरीश्वरस्य केवल निमित्तत्व
मपि नयुक्तं श्रुतिन्याय विरोधेन - समं-
जस्यात् न्याय विरोधमाह —
.... अशरीरस्य परमेश्वरस्य मा-
योपादानाधिष्ठानं नोपपन्नं लोके शरी
रेण. एव कुलालादेः मृत्पिंडाद्युपादा
नाधिष्ठानं भवति अतः कुलालादिदृष्टा
न्तो विरुद्धोः उपादेयाने मायादेरीश्वर
स्यानंगीकारात् - सांख्यमतमेव युक्तं इ-

श्वरेण प्रयोजनाभावात् अतः परमेश्वरस्य
निमित्तत्वं न संभवति । आशङ्कयाह –
॥ करणवच्चेन्न भोगादिभ्यः ॥
अधिष्ठाने शरीरापेक्षा नास्ति यथा कारण
मिन्द्रियं शरीरमप्यशरीराधिष्ठितं तत्व
त्प्रधानमपि ईश्वरइतिचेत् न । तत्कृता
नर्थ भोगादिभ्यः यथात्मनश्शरीरस्यश
रीराधिष्ठाने शरीरगत सुखदुःख भोगा
दिप्रसक्तिः तथा परमेश्वरस्यापि तदधि
ष्ठाने तत्कृतभोगादि प्रसक्तिः अतोनानि
मित्तमात्रमीश्वरः ।
॥ अन्तवत्वमसर्वज्ञता वा ॥
सशरीर एव कुलालः स्वीयं मृत्पिण्डं पा
66 A. णिर्भ्यां नाधितिष्ठतीति । तथापत्युरीश्व
रस्य संसारिण इव अन्तवत्वमसर्वज्ञत्वंच
भवति । अतो भोगादि प्रसक्तेः प्रधाना

विध्वनं ईश्वरस्य न संभवति – प्रधानादि
ध्यानत्वेन परमेश्वरस्य "अनश्नन्नन्यो अभि
चाकशीति" इत्यादि श्रुतेः तत्कृतकर्मभोगादि-
अभावो भूयः. यथात्मनः शरीरस्याप्र
सक्तेर्न संभवतीति चेत् तथा सतर्कबलं वि
हाय श्रुतिप्रबावलंबनीया – तदात्मानं
स्वयमकुरुत बहुस्यां प्रजायेय सर्वोऽहं
रुद्र इत्यादिभिरुपादानमपि परमेश्व
रस्य त्वभ्युपेयः. जगदुपादाननिमित्त
भूतस्यापि परमेश्वरस्य निष्कलं निष्क्रि
यमित्यादि श्रुतिभिर्निर्विकारत्वमवग
म्यते शक्तिः परमसंभूता शीत्यतीतपदो
त्तरा। ततोमाया ततोव्यक्तं शिवाच्छक्तिमतः
प्रभोः।। शीत्यतीतपदं जज्ञे ततः शान्तिपदं क्र
मादित्यादिना मायादिप्रपञ्चस्य शक्तिम
तः शिवस्यैवोपादानरूपत्वमवगम्यते

वायव्यसंहितायामपुनश्च · शान्त्यादि च
पार्थिवान्तं शिवतत्त्वसमुद्भवं । तेनैकेनतु तद्व्या
प्तं मृदा कुम्भादिकं यथा ॥ इत्यादिना तत्रैव
शिवेनोपादानभूतेन जगद्व्याप्तं मृद्घट
न्यायेनावगम्यते - चिदात्मैव हि देवोन्तःस्थि
तमिच्छावशाद्बहिः। योगीव निरुपादानमर्थ
जातं प्रकाशयेत् ॥ इत्याद्यागमप्रमाणाच्च पर
मेश्वरस्य जगदुभयकारणत्वमित्यनवद्यमि
66 13 ति· शिवागमैकदेशे शिवस्य परब्रह्मणः के
वलनिमित्तत्वं प्रतिपादितं - तत्परिहरणार्थमाधि
करणमिति पूर्वाचार्याणां व्याख्या परं तु वेद
शिवागमयोर्विशेषं न पश्यामः वेदएव शि
वागमः इति व्यवहारो युक्तः । तस्य तत्कर्तृक
त्वात् अतश्शिवागमो द्विविधः त्रैवर्णिकवि
षयः सर्वविषयश्चेति· वेदस्त्रैवर्णिकविषयः
सर्वविषयश्चान्यः उभयोरेक एव शिवः कर्ता·

ईशानस्सर्व विद्यानां अस्यमहतोभूतस्य निश्व
सितं इत्यादि श्रुत्या मू. पादशान्त्यां मेतासां वि-
द्यानां भिन्न वर्त्मनां। आदिकर्ता शिवस्साक्षा
च्छूलपाणिरिति श्रुत्यादिस्मृत्याच वेदकर्तृ
त्वमवगतं- अन्यस्यापि तत्रैव परमेश्वरस्य -
ततः कर्तृसामान्यात् उभयमेकार्थपरं प्रमाण
मेव पंचब्रह्म प्रणव पंचाक्षरी प्रासादादिमं
त्राणां माहात्म्यादीनां पशुपतिपाशादिव
स्तुव्यवहाराणां भस्मोद्धूलन त्रिपुण्ड्रलिंग
धारण रुद्राक्षधारणादि परधर्माणामन्येषां
च सर्वेषां व्यवहाराणामुभयत्र उभयत्रसम
मेवदर्शनात् उभावपिप्रमाणभूतौ वेदागमयोः
कर्तृसामान्यात् एकार्थपरत्वेनच विरोधाभावा
दित्यधिकरणं केवलेश्वर निमित्तत्ववादी हि
रण्यगर्भोक्त योग स्मृति विषयामिति वयं वदामः -
अथवा वियदाद्यनुत्पत्ति शंकापरिहारवद्

५८A वीतर शंका परिहार प्रवृत्तौ नदोष इति कश्चित् अतो - हिरण्यगर्भ ग्राम परामिति द्वैम धिकरण मिति युक्तं - तत्त न केवले श्वरानु मित्तवादं दि - त्यस्माकं राद्धान्तः॥

॥ उत्पत्त्यसंभवात्॥

पांचरात्रमतं वासुदेव प्रोक्तं - तत्त जीवोत्प - त्त्यादिकं उच्यते तत्संभवो नवेति संदेहः - शायः, संभवतीति पूर्वः पक्षः - कुतः भगव ता वासुदेवेन द्रष्टस्य प्रमाणत्वात् तत्राहुत प्रक्रिया - भगवानेको वासुदेवः परमात्मा - तस्मात्संकर्षणाख्यो जीवोत्त जायते - जीवा च्च प्रद्युम्नाख्यो मनः मनसश्चा निरुद्धा ख्योहंकारः तदेते चत्वारो व्यूहाः सर्वात्मनः इति - तदिह हिरण्यगर्भादेरपि परत्वेन - वासुदेवस्य तदुक्तस्य प्रामाण्यादिदं सर्व मुपपन्न मिति प्राप्तेब्रूमः - जीवोत्पत्त्यभि

ध्यायामिदमप्रमाणं शास्त्रं कृतनाशाकृताभ्या
गमप्रसंगात्- जीव. जीवस्योत्पत्त्यसंभवा
त्- एकस्मिन् किंचेत् पुण्यापुण्यात्मकं कर्म
कृत्वा प्रलये नष्टे तदन्यः कश्चिज्जातः प्राप्नोती
ति अकृताभ्यागमः पूर्वस्य कृतनाश इत्ये त्या
दि बहुदोषः- ततो जीवोत्पत्त्याभिधायकमप्रमा
णं शास्त्रं इत्ययं चान्यदनुपपत्तिरित्यत आह-
॥ न कर्तुः करणं ॥
संकर्षणाख्यात् जीवात् प्रद्युम्नाख्यं मनो जा
यत इत्युच्यते कर्तृजीवात्करणोत्पत्ति-
श्च न संभवति- तस्य प्रकृतिकार्यत्वेन चेतनत्वा
नुपपत्तेः-
68. 13 ॥ विज्ञानादिभावे वा तदप्रतिषेधः ॥
चेतन विज्ञानशब्दो जीववाचकः- अत्र जी
वानामुत्पत्तिर्नाभिधीयते किंतु संकर्षणा
दीनां दिव्यादिभाव उच्यते- जीवाद्यभिप्राय

त्वं जीवादिभाव इति । ततस्तच्छास्त्रप्रतिषे
धः-
॥ विप्रतिषेधाच्च ॥
जीवोत्पत्त्यभिधाने परिहृतेपि पांचरा
त्रमतस्यानभ्युपगमः । श्रुतिविरुद्धेश्वर
कारणवाद मुक्तिहेतुत्व तप्तमुद्राधारणादि
धर्मपरत्वादिना विप्रतिषेधात् । पांच पांच
रात्रमतमसमञ्जसं- पांचरात्रे च बौद्धे च
तथा कालामुखेपि च । इत्युक्त्या दीक्षिताय-
यं भवतो । ब्राह्मणाय मा । इत्यादिषु त्रिशोपा
देस्य प्रतिषेधो । श्रुतेः अतो श्रुतिविरुद्ध
धर्मश्रूयत्वेन विप्रतिषेधविषयत्वात् अप्रमा
णं पंचरात्रमतं- ननु पुरुषो वै रुद्रः इत्यादि
श्रुत्या परमेश्वर एव पुरुषो वासुदेवः । तद्भ
क्त्याद्युपासनमात्मसाधनादिकमपि परमेश्वरपद
प्राप्ति साधनं क्रमेणेति श्रूयते पांचरात्रस्य ।

तदाराधन प्रतिपादकत्वात् तद्प्रामाण्ये-
तस्य वासुदेवस्यानाराध्य प्रसङ्ग. इति चेन्न
श्रुति विरोधात्. पाँचरात्रस्याप्रामाण्येऽपि तदा
स्यकाहानिः श्रुतिप्रसिद्धमार्गेणास्याराधन
संभवाद्विरोधः॥

इति
श्रीकंठशिवाचार्य विरचिते ब्रह्ममीमांसा
भाष्ये द्वितीयस्याध्यायस्य द्वितीयः पादः॥

=

श्री कृष्णार्पणमस्तु॥

९. ४. निरस्तो हि. समस्तो विरुद्धेतर दर्शनाद्....
न्यायः। पुनरिहाध्यायशेषे. अन्तीतर विरोध
परिहारः क्रियते.

॥ न वियदश्रुतेः॥

निरन्वयत्वा[त्] कृ[त]कार्यत्व प्रमादाकाशस्योत्प-
त्तिः सन्दिह्यते संभवति नवेति- वि[प]क्षः नोत्प

द्यते इति प्राप्ते कुतः अश्रुतेः । तथाच्छान्दोग्ये सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम् इत्यारभ्य तत्तेजोसृजतेति तेजःप्रभृति भूतसृष्टिरभिधीयते । तत्र नाकाशोत्पत्तिः श्रूयते । यद्यात्मनि आकाशस्संभूत ॥ श्रुतिस्तै तैत्तिरीयके सा गौणी भवितुमर्हति । आकाशोत्पादकसमवाय्यादि निरूपणासंभवात् - अतो जीववदाकाशोपि नोत्पद्यत इति प्राप्ते । क्रमः - वियदप्युत्पद्यते

॥ अस्ति तु ॥

तदुत्पत्तिश्रुतिरस्त्येव तस्माद्वा एतस्मादात्मन आकाशस्संभूतः इत्यादिश्रुतेः - आत्मनस्तु नक्रियते न म्रियत इति प्रतिषेधात् अनुत्पत्तिः न वियत उत्पत्तिः ~~श्रुतिप्र~~ प्रतिषेधश्रुतिरस्ति । ततो वियदुत्पद्यत एव - यदुक्तं उत्पत्तिश्रुतिर्गौणीति तत्राह -

॥ गौण्यसंभवाच्छब्दाच्च ॥

तत्तेजोऽसृजतेति तेजः प्रथमवचनादाकाश
स्संभूत इति श्रुतिर्गौणी तस्य निरवयवस्य
तदसंभवात् .. वायुश्चान्तरिक्षं च एतदमृतमिति
नित्यत्वशब्दाच्च ॥

॥ स्याच्चैकस्य ब्रह्मशब्दवत् ॥

६ 13 एकस्य संभूतशब्दस्याकाशे गौणत्वमन्य
त्र मुख्यत्वं अननुपपन्न श्रावणावृत्तेः तत्संभ
व यथैकस्य ब्रह्मशब्दस्य ब्रह्मनामरूप
मन्नं च जायत इति प्रकृतौ गौणत्वं तपसा ची
यते ब्रह्म इतिमुख्यत्व मावृत्तौ तद्वदत्रापि - तस्मा
दाकाशोत्पत्तिरयुक्तेति परिहार इति उच्यते

॥ प्रतिज्ञाऽहानिरव्यतिरेकात् ॥

येनाश्रुतं श्रुतं भवति इत्येकविज्ञानेन सर्व
विज्ञान प्रतिज्ञाया अहानिर्वियदादेः ब्रह्मणः
कार्यत्वेन तदव्यतिरेकादेव भवति - अतो नसं

~~भूतस्य~~ शब्दस्य गौणत्वं प्रतिज्ञाहान्या
पत्तेः- यथा प्रतिज्ञाहानिर्न भवति तथा
योजनीयं-

॥ शब्देभ्यः॥

तस्माद्वा एतस्मादात्मनः आकाशस्संभू
तः इत्यादि शब्देभ्योवगतौ वियदुत्पत्तौ तते
जो सृज्यतेत्येतत् तत्राकाशवचनावगततेजः
प्राय.श्रवचनं न निवारयितुं क्षमते॥

॥ यावद्विकारं.. विभागो लोकवत्॥

एतदात्म्यमिदं सर्वमिदं आकाशादेरपि विकारत्वा
वगमात् तेजःप्रभृति विभागवचनं यावद्वि
कारजातं तत्सर्वस्यापि दर्शनार्थमिति वि
भाव्यते- यथालोके दश मे पुत्रा इत्युक्त्वा ते
पुत्रकेषांचिदुत्पत्तिकथनं तथात्रापि तस्माद्वि
यदुत्पत्तिकथनं तथात्रापि तस्माद्वियदुत्प
द्यते इत्युच्यते छान्दोग्ये इति युक्तमेव॥

॥ एतेन मातरिश्वा व्याख्यातः ॥

४० A तेजोऽत इति वक्ष्यति· तदर्थं पूर्वमुपादानं
आकाशाद ———— उत्पत्तिरस्ति नवेति सं
शये वायुर्नोत्पद्यत इत्युच्यते, तत्र छान्दोग्ये
तेजः प्राथम्यात् वायूत्पत्तेरकथनात् बृ
हदारण्यके सैषानस्तमिता देवता· यद्वायुरि
ति तज्जन्म निषेध श्रवणात् च. सर्वथावा
युर्नजायत इति प्राप्ते ~~क्रमः~~ सिद्धान्त उच्यते-
सिद्धान्ते [छान्दोग्ये] वायोः जन्माश्रवणेपि गुणोपसं
हारन्यायेन तैत्तिरीयके आकाशाद्वायुरिति
जन्मवाक्यस्य उत्तरत्रोपसंहारे सति श्रुतमे
व छान्दोग्येपि वायोर्जन्म· सैषानस्तमे
तेति स्तुतिपरैवोपासनं· न पूर्व प्रकारणादु
त्पत्तिः किन्तु पूर्वपूर्वकाशादि विशिष्टादे
ब्रह्मण उत्तरोत्तर वाय्वादिकार्योत्पत्तिः त

... बहवः ग्रन्थाः त्रुटिताः) अन्यत्र दर्शने संभवन्ति

ऐक्षत बहु स्यामिति-वत् तत्तेज ऐक्षत ता
आप ऐक्षंत इति तदभिध्यानात्तु लिङ्गात् ई
श्वरः शब्दमूर्तिस्सदाशिवः - रुद्रस्तेजोम
यस्साक्षात् रसमूर्तिर्जनार्दनः गन्धमू
र्तिश्चतुर्वक्त्रः इत्येते पंचमूर्तयः - इतिवच
नात् सदाशिवादिरूपात् शब्दाद्यात्मन एव
ब्रह्मण आकाशादि संभवः - एते हि सदाशिवा
दयः पंच ब्रह्मसंज्ञकाः पञ्चभूतापन्नाः प
रब्रह्मण इशरीरं पंच ब्रह्मशरीरादेव परब्र
ह्मणः पंच सृष्ट्यादयः प्रवर्तन्ते · ननु भू
तानामेवातोत्पत्तिरुच्यते · आकाशस्संभूत
४० 13 इत्यादिना · सदाशिवादीनां न साक्षात् दृष्टि
र्दृश्यत इति चेत् कृत्यन्तराध्याहारादेवं
तथाथर्वशिखायां सध्यायीतेशानी तत्र ब्र
ह्म विष्णु रुद्रेन्द्रास्ते संप्रसूयन्ते सर्वा
णि चेन्द्रियाणि सह भूतैः कारणानां ध्याता.

कारणं तु ब्रह्मेय. सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुराकाश मध्यग इति. ब्रह्मादीनामिन्द्रियाणांच भूतैस्सहोत्पत्तिः श्रूयते कारणानामपि कारणत्वेन शंभुः परमाकाशमध्यग तस्सिद्धः ततस्याक्षादेव ब्रह्मण स्तत्कारणरूपात् तत्तत्कार्योत्पत्तेरिति निर्णयः

॥ विपर्ययेण क्रमोत उपपद्यते च ॥

इह पूर्वाधिकरण निरूपित सृष्टि क्रम. संपद्यते इह पूर्वाधिकरण निरूपित सृष्टे क्रम. संपद्यते नवेति संदेहः - न संपद्यत इति पूर्वः पक्षः - तथाहि मुण्डकोपनिषदि श्रूयते एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी इति प्राणादिभ्यः पूर्वमुत्पत्ति श्रूयते अन्यत्र शिखायां च ब्रह्मविष्णुरुद्रेन्द्राः संप्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भू.

तैरिति. ह्रासो. त्पत्तेर्ब्रह्मादीनामाम्नायते ततः
आकाशादेः पूर्वसृष्टिक्रमो न संपन्न इत्यु
च्यते. सिद्धान्तः संपन्नः पूर्वसृष्टिक्रमइ
ति अन्नमयं हि सोम्य मन आपोमयः प्राण
स्तेजोमयी वागित्यादि श्रुतेः प्राणादीनां
८१ A. भौतिकत्व श्रावणात्. भूतेष्वन्तर्भावात् नपृ
थग्भावः. ब्रह्मादीनां सहोत्पत्तिः भूतै
स्तत् स्वेष्वं तर्भावात्. अतः पूर्वक्रमे
प्र विरोधः॥

॥अन्तरा विज्ञानमनसि क्रमेण
तल्लिङ्गादिति चेन्न विशेषात्॥
भूतप्राणयो रिन्द्रियग्राममनसि क्रमेण
अन्तरोत्पद्यत इति हैरण्यवाक्यं खंवायु
ज्योतिरित्यादि क्रमप्रत्यभिज्ञानरूपाल्लि
ङ्गात्. अत इदमपि पारंपर्यक्रममितिचेत्
न. एतस्माज्जायते इत्यस्य पृथिव्यै

तेषु सर्वेषु प्राणादयः प्रवर्तन्ते प्रत्येक
मन्वयविशेषात् - अतस्सर्वे परमेश्वरस्य
वकारणं तथा पौराणिकी भणितिः-
शक्त्यादि पृथ्व्यन्तं शिवतत्त्वसमुद्भवम् ।
तेनैकेन तु तद्व्याप्तं मृत्कुम्भादिकं यथा ॥
इति, (x उत्पत्ति) क्रमसद्भावे सर्वस्य शिवतत्त्वसमुद्भवत्वेति
माभिधत्ते ततस्सर्वकारणं ब्रह्मेति समीचीन
मेव

॥ चराचरव्यपाश्रयस्तु स्याद्व्यपदेशो भा
क्तस्तद्भावित्वात् ॥

पूर्वत्र काशादि शब्दवाच्यत्वं ब्रह्मणः प्रतिपा
दितं तदिह विचार्यते - चेतनाचेतनसंबन्ध...
चराचरवस्तुसंबन्धितद्वाची शब्दो ब्रह्मणि...
मुख्य इति वदामः मुख्यतया अन्यवाचकश
ब्दस्यान्यत्र वृत्त्यभावात् । तथा आदित्यो
यूपो यजमानः प्रस्तर इत्यादिषु रूपादाम
वित्वा

81 दिं शब्दवाच्यं सारूप्यादिगुणसंबन्धादे
13 व दृश्यते – न मुख्येन. अत्रापि तत्तेजोऐक्षते
त्यादिषु चेतः प्रभृतीनामचेतनानां चेतनध
र्मेक्षणकर्तृत्वायोगात् तच्छब्दैस्तदाश्र
यं चेतनं ब्रह्म लक्ष्यते मंचाः क्रोशन्तीत्या
दिवत्. तस्मादाकाशादिशब्दवाच्यं ब्रह्म
णि तदाश्रये गौणमिति कः सन्देह इति प्रा
प्ते क्रमः – चराचरवस्तुसंबन्धिकं तद्व्यपदे
शशब्दो ब्रह्मण्येन भाक्. मुख्य एव. तेषां
खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति –
अण्डजं जरायुजं उद्भिज्जमिति. सेयं देव
तैक्षत हन्ताहमिमास्तिस्रो देवताः अनेन
जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी
ति सर्वस्य वस्तुनो नामरूपविभागाय तदा
त्मतया ब्रह्मणोऽनुप्रवेशभावाद्वित्वात् रू
पादीनामादित्यादिशब्दवाच्यत्वं अनुपपत्त्या

नमुख्यं मंत्रादिषु पुराणामविवेकानामा
त्तत्वात्तेषां तच्छब्दवाच्यत्वं नमुख्यं इत्या
त्मतयानुप्रवेशात् प्रपञ्चस्य ब्रह्मणस्त
च्छब्दवाच्यत्वं मुख्यमेव अन्यथा अष्टवर्षं
ब्राह्मणमुपनयीतेत्यादिषु उपनयनसंस्का
रादेः शरीरमात्रपर्यवसानात् आत्मनः -
संस्कार्यत्व प्रसंगात् तत्त यस्यैते चत्वारिंश
त्संस्काराः ब्रह्मणस्सायुज्यमित्यादिनात्मनः
संस्कारवतः फलश्रुतिरपार्था भवति ब्राह्म
णो यजेतेत्यादि विधिवैयर्थ्यं च भवति - ततः
८२. अ. सकल चराचर वस्तु शरीरविशिष्टस्य तत्त
च्छब्दवाच्यत्वं मुख्यमेव ।।
।। नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः ।।
पूर्वत्र आकाशादीनां ब्रह्मणः साक्षादुत्पत्ति
रभिहिता - जीवोऽपि तन्न्यायेन ब्रह्मणस्स
मुत्पद्यते नवेति संदेहः - एवं सति इहस्य

मुत्पद्यते इतिगम्यते यदा तमस्तन्न दिवा
नरात्रिः नसन्नचासच्छिव एवकेव
लः एकमेवाद्वितीय मित्यादि श्रुतेः प्राक्
सृष्टेः ब्रह्मण एकस्यैवावधारणात् सद्वस
द्वो निषेधाच्च सृष्टिकाले ब्रह्मण उत्पद्यत
एव जीवः विस्फुलिङ्गदृष्टान्तोपि जीवोत्प
त्यनुगुणः श्रूयते यथाग्नेः क्षुद्रा विस्फु
लिङ्गा अप्युच्चरन्त्येवमेवैतस्मात् आत्मनः
सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि
भूतानि सर्व एवात्मानो व्युच्चरन्तीति –
तस्मा यथाग्नेर्जायन्ते तथा ब्रह्मणः आ
त्मानोपि जायन्ते इति युक्तमिति प्राप्ते ब्रूमः
आत्मा न जायते न म्रियते वा विपश्चित् इति
श्रुतेः नित्यो नित्यानां चेतनश्चेतनानां एको
बहूनां ज्ञाज्ञौ द्वावजावीशानीशा वीशा
वि इत्यादि श्रुतिभ्यः नित्यत्वावगतेश्च –

सृष्टेः प्राग्ब्रह्मणोऽवधारणं तदाकृतिभू
तस्य तस्य कस्यचिद्वस्तुनश्च नामरूपरूपव्य
वहाराभावात् एवं नजीवादेः स्वरूपास
त्त्वं, या विस्फुलिङ्ग श्रुतिश्च, कृतनामरूप
सम्भवाभिप्रायैव तेषां जन्मपरा
८२ 13 अन्यथा - कृतनाशादि प्रसङ्गः तस्माद्ब्र
ह्मणो नजायत एव जीवः -

॥ ज्ञात एव ॥

सर्वत्र नित्यतया जीवः सिद्धः - पुनरत्रास्य
स्वाभाविकं ज्ञानमस्ति नवेति सन्दिह्यते,
एवं सति जीवस्य ज्ञानधार्मिकत्वं नास्तीति
वदामः स्वभावतः ज्ञोऽज्ञाविति जीवस्याज्ञा
त्वमेव श्रूयते तस्माद्दाज्ञ एवासौ चेतनं
मात्ररूपः किन्तु मायाशक्त्यवच्छेदात् उप
चाप्य शरीरकरणादिरयं सप देवमहं मनु
ष्योऽहं देव इति कल्पिताहंकार वद्बद्धः

संक्षयः इति संसारदशायां ज्ञानाज्जीव
स्य स्वतो ज्ञातृत्वं नास्त्येव अन्यथा स्यकु
तो मुक्तिरिति प्राप्ते ब्रूमः। ज्ञातैवायमात्मा।
अथ यो वेद इदं जिघ्राणीति। आत्मा मनसै
तान् पश्यन् रमते य एते ब्रह्मलोके।
इत्यादिश्रुतेरस्य स्वधर्मभूतं ज्ञानमस्त्यतः
अतो ज्ञाता स्वत एव। यदुक्तं मायाशक्तिसंब
न्धात् संसारदशायां ज्ञातृत्वमस्येति तत्स
त्यं। मायाशक्त्यवच्छिन्नस्य स्वाभाविकज्ञा
नशक्तिविलासोऽयं, प्राकृतमनस्संबन्धात्
भोक्ता सुखदुःखयोः ज्ञाता शरीराहंकार
मात्तविभ्रान्तिः संसरतीह जीवः। यदा पुन
रस्य ब्रह्मज्ञानोपासनाभ्यासात्तदापत्तये।
संबन्धोपैति सदासौ ब्रह्मसदृशो नैजनि
रतिशय ज्ञानधर्मो मुक्त इत्युच्यते किंच प्रा
६.२.८. णारामं मन आनन्दं शान्ते ब्रह्मणोऽपि स्थिर

त्विशायात्मानन्दविषयं मनःस्वाभाविकंक
रणमवगम्यते तत्सद्भावगुणत्वात् अपगतसंसा
रस्य जीवस्य स्वरूपानन्दानुभवसाधनं
मनोरूपमन्तःकरणं अनपेक्षितत्वादक
रणमस्तीति गम्यते. ज्ञाज्ञाविति जीवस्या
ज्ञत्वं किंचिज्ज्ञत्वमेव संसारिणः परमेश्व
रस्य सर्वज्ञत्वमुच्यते संसारे किंचिज्ज्ञत्वं
विमुक्तौ सर्वज्ञत्वमिति ज्ञातेवात्मा।।

।।उत्क्रान्तिगत्यागतीनाम्।।

पूर्वत्र ज्ञात्वेन सिद्धस्यात्मन उत्क्रान्त्यादि
दर्शनात् अणुत्वमवगम्यते तद्युज्यते न वेति
संदेहः - तदेवं सति नास्याणुत्वमुपपद्यते -
सएवपाप महान् — आत्मेति जीवस्य विभुत्वाव
गमात् अहं विश्वं भुवनं अभ्यभवामीति जी
वस्य ज्याख्या सकलभुवनाभिभावित्वश्रवणा
स सर्वव्याप्यात्मा विभुरिति प्राप्ते निरूप्यते -

॥ स्वात्मना चोत्तरयोः ॥

उत्तरयोर्गत्यागत्योः स्वात्मना संवाध्यत्वादणुरात्मा · यदुक्तं महानज आत्मेति - तदीश्वर प्रकरणान्नैतद्विषयमिति वक्ष्यति। व्याख्या विश्वभुवनाभिमान्त्वं यदुक्तं तदपि मलतिरोधानापगमे प्रकटित शक्ति मरीचि व्याप्त मुक्तजीव विषयमेव तस्मादणुरेवात्मा उपाशङ्क्य परिहरति -

॥ नाणुरतच्छ्रुतेरिति · चेन्नेतराधिकारात्-॥

सवा एष महानज आत्मा · इति श्रुतं नाणुः

८३।३ जीव इति चेत् · न - यस्यानुवित्तः प्रतिबुद्ध आत्मेति · परमेश्वराधिकरणात्।

॥ स्वशब्दमानाभ्यां ॥

एषाणुरात्मेति श्रुतेः - अणुशब्दादाराग्रमात्रो ह्यपर इति · मानशब्दाच्चाणुत्वस्य

सकलदेह व्याप्तिवेदनानुभवः कुत इत्यत आह-

॥ अविरोधाच्चन्दनवत् ॥

यथा चन्दनबिन्दुरेकस्थोपि सकलदेहव्याप्तिसुखं जनयति तद्वदविरोधः॥

पुनराशङ्क्य परिहरति-

॥अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥

देशविशेषस्थितिश्चन्दनस्येति चेन्न- आत्मनोपि तदभ्युपगमात् हृदिह्ययमात्मा योयं विज्ञानमयः प्राणेषु हृदि अन्तर्ज्योतिः श्रुतिरिति,मतान्तरं स्वमतमाह-

॥ गुणाद्वालोकवत् ॥

आत्मा गुणेन ज्ञानेन सकलदेहं व्याप्यानुभवति यथा मणिः स्वकीयेन तेजसा सौंदिनितं व्याप्य प्रकाशयति तस्माद्विरो

ध०- ज्ञानात्मनो व्यतिरेको नास्तीत्या
ह-

॥ व्यतिरेको गंधवत्तथाहि दर्श
यति ॥

गंधवती पृथिवीति वज्जानामीति गुण
त्वेनोपलब्धेः ज्ञानात्मनो व्यतिरेकोऽ
स्ति दर्शयति च श्रुतिः व्यतिरेकं जाना
त्ययं पुरुष इति-

॥ पृथगुपदेशात् ॥

आत्मनः पृथक्त्वेनोपदिश्यते ज्ञानं
नहि विज्ञातुर्विज्ञाते परिलोपो विद्यत इति ।
एवं नित्यज्ञानगुणक आत्मा सिद्धः एवं ज्ञा
2.4A नगुणकत्वेप्यात्मनः कथं ज्ञानमात्रव्य
पदेश इत्यत आह-

॥ तद्गुणसारत्वात्तु तद्व्यपदेशः-
प्राज्ञवत् ॥

दृष्टान्तगुण

प्राधान्यानुसारित्वात् आत्मनो ज्ञानव्यपदेशः
न ज्ञानमात्रत्वात् - यथा प्राज्ञस्य विपश्चितोऽपि
सत्यं ज्ञानमिति - ततो ज्ञानमात्रव्यपदेशो न दो
षो भवत्यात्मन इति - पुनरुपपत्तिमाह -

॥ यावदात्मभावित्वाच्च न दोषस्तद्
दर्शनात् ॥

आत्मस्वरूपानुबन्धित्वात् ज्ञानस्य व्य
पदेशो न दोषः - स्वरूपानुबन्धि धर्म
त्वेन हि गोत्वादिना खण्डो गौरित्यादि
व्यपदेशो दृश्यते · अतः स्वरूपानुबंधि
त्वात् ज्ञानधर्मस्य तद्व्यपदेशः A-B......
सुषुप्त्यादिषु सतो ज्ञानस्यानभिव्यक्तस्या
पि जागरितादिषु व्यक्तिसद्भावात् स्व
रूपानुबन्ध्येव ज्ञानं यथा पुंस्त्वं साधारण.
सप्तमधातोः बाल्येऽपि सतो युवत्वेऽभिव्यक्तिः
ततो ज्ञानस्यात्मनः स्वरूपानुबन्धित्वेन

A सुषुप्त्यादिषु असतो ज्ञानस्य यावदात्मत्वं कथमित्यत आह·
B पुंस्त्वादिवदस्य सतोऽभिव्यक्तियोगात्

दोषः - आत्मनो ज्ञातृत्वानुत्व प्रतिपादन-प्रयोजनमाह-

॥ नित्योपलब्ध्यनुपलब्धिप्रसंगोऽ-
-न्यतर नियमो वान्यथा ॥

अन्यथा ज्ञप्तिमात्र सर्वतत्त्वपेक्षता, पौनेत्यवत् सर्वदोपलब्धिप्रसङ्गः स्यात् सं कोचाभावात्- विद्यमानाया अनुपलब्धे

८४/13 रपि सैव हेतुरिति आगन्तुक ज्ञान सर्वगतात्मकत्वपक्षे सपुवदोषः- सर्वात्मनां सर्वगतत्वेन ज्ञानहेतूनां मनसःसङ्गादीनां सर्वसाधारणत्वात्- अदृष्टहेतूनामपि- तथात्वात् तेनापि न नियमः अयोपलब्ध्य नुपलब्ध्यो विरोधाद्युपलब्धेर्वैतवः स्युः अनुपलब्धेर्वा तथासत्यन्यतर-नियमः स्यात् अतः पूर्वोक्तमेव समीचीनः॥ —

॥ कर्ता शास्त्रार्थवत्वात् ॥

ज्ञातृत्वमणुत्व, निरूपितं, आत्मनः पुनरिह कर्तृत्वमस्ति नवेति सन्देहः - कूटस्थस्यात्मनः कर्तृत्वं न संभवति - बुद्धेर्वा कर्तृत्वमुचितं प्रकृतेर्वा कर्तृत्वं तद्धर्मस्यात् - स्वस्मिन्नारोप्य कर्तेव प्रतीव भाति - एवं सति तस्मादात्मनः कर्तृत्वमनुपपन्नमिति पूर्वः पक्षः - सिद्धान्तः सूत्रे, त्माकर्तेति - अन्यथा कुर्यान्न कुर्यादिति शास्त्रस्य वैयर्थ्यं स्यात् -

॥ उपादानाद्विहारोपदेशाच्च ॥

प्राणानादाय गृहीत्वा स्वे शरीरे यथाकर्म परिवर्तत इति विहारोपदेशाच्च - अथैकतैवं यदुक्तं बुद्धिप्रकृत्योरेव कर्तृत्वमिति - तत्राह -

॥ व्यपदेशाच्च क्रियायां इति चेत् न निर्देश विपर्ययः ॥

विज्ञानं यज्ञं तनुत इत्यादिना यज्ञादौ कर्तृत्व व्यपदेशाच्च कर्ता विज्ञान शब्दो युद्धेरात्म नो नेति हेतुं न विज्ञानेनेति निर्देश विपर्ययः स्यात् बुद्धेः करणत्वादेव बुद्धिकर्तृत्वं नास्त्येवः प्रकृतेः कर्तृत्व पक्षं दूषयति

८७ ॥ उपलब्धिवदनियमः ॥

प्रकृतेरेव कर्तृत्वे तस्याः सर्वसाधारणत्वे न पूर्वोक्तोपलब्धिनियमाभवात्

॥ शक्तिविपर्ययात् ॥

प्रकृतेरेव कर्तृत्वे कर्तुरेव भोक्तृत्वमिति सैव भोक्त्री स्यात्

॥ सामर्थ्याभावाच्च ॥

किंच प्रकृतेरेव कर्तृत्वे प्रकृतेरन्योस्तीति सामर्थ्याभावप्रसंगाच्च कर्तात्मा ॥

॥ यथाच तक्षोभयथा ॥

आत्मनः कर्तृत्वे इच्छया करोति अन्यदा न
करोतीति, एवं इच्छा यथा तस्या स्वा कार्यत
येति ततश्चात्मनः कर्तृत्वमेव, बुद्धेरेवे
च्छासंभवान्न व्यवस्थेति चेत्; न चेतन
रूप धर्मत्वादिच्छायाः सर्वन्यायादात्मनः क
र्तृत्वं न बुद्धेर्न प्रकृतेरिति निर्णयः॥

॥ परात्तु तच्छ्रुतेः॥

ज्ञातृत्वं कर्तृत्वं चोपपादितमात्मनः स्वाय
त्तमीश्वरायत्तं वेति सन्देहः एवं सति स्वा
यत्तमिति प्राप्तं अन्यथा कर्मविधाननिष्फल
ये तु व्यापारं जीवमीश्वरो वै वेष इत्यादि
दोषभाजन स्यात् किं चेत् जीवस्य प्रवृत्तेः
ईश्वरायत्तत्वे तस्य कर्तृत्वाभावात् विधिः
प्रतिषिद्धं वैयर्थ्यं च भवति तस्माज्जीवस्य-
स्वायत्ता प्रवृत्तिरिति प्राप्ते ब्रूमः - परमेश्वरा
यत्तमेव जीवस्य कर्तृत्वं न स्वायत्तं य आत्मा

न मन्त्रोपमयतीति श्रूयते। यदुक्तमीश्वरस्य
जीवं प्रवर्तयतो वैषम्यादिकमस्य च विधि
८६ 13 प्रतिषेध वैयर्थ्यमिति तत्राह

॥ कृतप्रयत्नापेक्षस्तु विहितप्रति
षिद्धवैयर्थ्यादिभ्यः॥

जीवो हि स्वेच्छया प्रवृत्तिनिवृत्तिहेतुं प्रयत्नं
करोति स्वकर्मपाकवशेन जीवकृतं प्रय-
त्नं प्रवृत्तिनिवृत्तिहेतुमवेक्ष्य तदनुमति-
दानेन परं प्रवर्तयति विधिनिषेधवैयर्थ्य-
र्थ्यादिनिग्रहानुग्रहादिभ्यो प्रगम्यते।
गुरुदाराद्यपहरणं बालः बहुकृत्सहायः
कुर्वन्नपि स्वप्रयत्नाः विधिनिषेधयो-
र्योग्यो भवति एवं जीवः परमेश्वरसहायः प्र-
वर्तमानोपि स्वयं विधिनिषेधयोग्यो भवति।
अतः कृतप्रयत्नापेक्षत्वाज्जीवस्य कर्म
सु प्रवर्तक ईश्वरो न वैषम्यभाक् तस्यापि

स्वाधीनप्रवृत्तिसद्भावात् विधिनिषेधादि
वैयर्थ्यं न भवतीति सिद्धं-
॥ अंशो नानाव्यपदेशादन्यथा चापि
दाशकितवादित्वमधीयत एके ॥
नित्यो ज्ञाताणुः कर्ता परमेश्वरसाहाय्या
पेक्षप्रवृत्तिर्जीव इति पूर्वत्र निरूपितं -
स इह परमेश्वर एव किं वा तदंशभूत इति
संशये प्राप्ते परमेश्वर एवेति पूर्वं नि
रूप्यते परमेश्वर एव बहुधोपाधिवशात्
जीवभावमुपगम्य दृश्यते यथैकमाकाशं
घटाद्युपाधिवशान्नानाकारं दृश्यते परिच्छि
न्नमेव च तथाहि श्रुतेः अयमात्मा ब्र
८६ A ह्मेति वदति - तस्मादीश्वर एवाज्ञाना
ज्जीवभावमुपगत इति पूर्वः पक्षः - सि
द्धान्तस्तु जीवात्मा परमेश्वरस्यांशो आत्मै
कदेश एव अनेन जीवात्मनानुप्रवेश्य

मानरूपे त्याकरवाणी,य आत्मनि तिष्ठ
न्पृथगात्मानं प्रेरितारं च मत्वा; यं तु
प्रकृतिं विद्या मायिनं तु महेश्वरं तस्यावय
भूतेन व्याप्तं सर्वमिदं जगदित्यादिनाना
व्यपदेशात यदुक्तमयमात्मा ब्रह्मेत्या
दिना ब्रह्मण एव जीवत्वमिति तत्राह अ
न्यथा तत्त्वमसि अयमात्मा ब्रह्मेत्यादिना
ब्रह्मण एव जीवत्वमिति तत्राह अन्यथा
तत्त्वमसि अयमात्मा ब्रह्मेत्यादिकाभ्युप
देशात्तयो जीवब्रह्मणो व्याप्यव्यापक
भावे नान्यत्वमवधीयते एके ब्रह्म दाशा
ब्रह्म कितवा इत्यादिना ब्रह्मणोंऽशत्वेपि
जीवस्य न व्याप्ततया तद्व्यपदेशो युक्त
मेव यथा वह्निना व्याप्तस्य काष्ठादेर्व
ह्निमयत्वं तथापि तयो वह्निकाष्ठयोर्नाभेदः
तस्माज्जीवो ब्रह्मणोंऽशभूतः तत्स्वरूप

स्य भवतीति ब्रह्मण एवाज्ञानाज्जीवभाव
कल्पने बहुश्रुति विरोधात् अन्यवस्थादि-
दोषप्राप्तेर्दुर्निराभवति ॥

॥ मन्त्रवर्णात् ॥

पादोऽस्य विश्वा भूतानि इति मन्त्रवर्णाच्च
ब्रह्मांश एव जीवः । मायां तु प्रकृतिं विद्यात्
८६. 13. मायिनं तु महेश्वरम् । तस्यावयवभूतैस्तु —
व्याप्तं सर्वं जगदिति श्रुतिरेव मायायाः प्र
कृतित्वं तद्विशिष्टत्वं महेश्वरस्य तदवयव
भूतत्वं सर्वजगतः प्रकटयति ततो मायिनः
परमेश्वरस्य अवयवत्वेऽंशः पुरुषः ॥

॥ अपि स्मर्यते ॥

आत्मा तस्याष्टमी मूर्तिः शिवस्य परमात्मनः ।
व्यापिकेतरमूर्तीनां विश्वं तस्माच्छिवात्मकम् ।
इति स्मरणाच्च शिवस्य मूर्त्येकदेश आत्मा

॥ प्रकाशादिवन्नैवं परः ॥

ब्रह्मणोंशत्वेपि जीवस्य जीवो यत्स्वरूपज्ञा
नेवं परमेश्वरः सर्वज्ञत्वादियुक्त एव कथं
प्रकाशादिवत् प्रकाशविशिष्टानां मणिप्र
भृतीनामपि प्रकाशो विशिष्टैकदेशतयात
दंशत्वेपि स्वरूपभेदो नविरुद्धः य आत्म
नि तिष्ठन्नित्यादि श्रुते.

।। स्मरति च ।।

विगाहं देवदेवस्य जगदेतच्चराचरम्।
तत्तदर्थं न जानन्ति पशवः पाशगौरवात्।
इत्यादि ततो ब्रह्मणोंशएव जीवः सद्रूस
द्विशिष्टतया स्वरूपभेदश्च सिद्ध एव.

।। अनुज्ञापरिहारौ देहादिसंबन्धात् ज्योतिरादिवत् ।।

सर्वेषां ब्रह्मांशत्वेपि जीवानां कस्यचित्
चि द्विजादिषु अनुज्ञा कस्यचित्परिहार इति
८६ अ चेत् ब्रह्मणो देहादिसंबन्धविशेषात्त

कुपपत्तौ यथा न्यादे शोत्रियाचारस्य श्मशा
नादिसंबन्धात्तदविरोधः-
॥ असंततेश्चा...व्यतिकरः ॥
असंतितेरव्याप्तेः प्रशरीरं भिन्नत्वात् तत्तणुत्वे
नावच्छिन्नत्वाद्संततेरव्याप्त्य स्थूलोहं कृ
शोहं सुखहं दुःखहमिति ब्राह्मणोहं क्ष
त्रियोहं इति देहाभिमानिना ज्ञानसुखाद्यव्य
तिरेको भवति ॰ किमुक्तं भवति - देहाभिमाने
नां व्याप्त्यभावस्य समानत्वात् परिच्छिन्नज्ञा
नसुखादिकं सांसारिकमेकप्रकारमेवासंकी
र्णं भवतीति ॰ अनेन परब्रह्मज्ञानविशेषेणवि
गलितदेहाभिमानामहाव्याप्त्या परंभाव
मुपगतानां मुक्तानामात्मनां निरतिशयत्वे
न नित्यत्वेन ज्ञानसुखादीनां स्वाभाविकानां
सांसारिकज्ञानादेः व्यतिकर इतिसिद्धं-
अज्ञानोपाधिभ्या ब्रह्मैव संबध्यते इति-

यदुक्तं तेत्ताह ॥ नव्यवस्थेति ॥ आभास
एवच सत्य

॥ आभासएवच ॥

सत्यमिथ्योपाधिभ्यां बद्धस्य ब्रह्म एव जीवभाव इति पक्षद्वयेपि युक्तय आभासा एव: तथाह —

सत्यमिथ्योपाधिकृत लेख्यात्मनां ब्रह्मण एवाज्ञानमुपाधिरित्यपि तत्कृतेनाद्रेष्टेनापि न नियमः किं चाह —

॥ अभिसंध्यादिष्वपि चैवम् ॥

अदृष्टहेतुताभिसंध्यादिषु चैवमेव नियमाभावः प्रदेशाभेदादिति चेत् —

८८·१३ ॥ प्रदेशाभेदादिति चेत् नान्तर्भावत्वात् ॥

उपाधिसंबन्धि ब्रह्मदेशभेदव्यवस्थेति चेन्न उपाधिषु गच्छत्सु सर्वप्रदेशा

भ्रां तद्वैतर्भावात् तस्मात्सत्यमिथ्योपा
धिं परिवृत्तेन्न ब्रह्मजीवत्व पक्षद्वयेऽपि न
व्यवस्थापि हि संभवति· ततो ब्रह्मणे गभूतो
जीवः तद्विशेष कैः एकस्वभाव इति युक्त
एकस्वभाव इति युक्तमेव ॥

इति

श्रीकण्ठशिवाचार्यकृते विरचिते ब्रह्म
मीमांसाभाष्ये द्वितीयाध्याये तृतीयः पादः॥

॥ तथा प्राणाः॥

पूर्वत्त भूतानि ब्रह्मण उत्पद्यन्त इति निरूपि
तं· जीवो नित्य इति· इह भूतानामेवेन्द्रि
याणां ब्रह्मणः उत्पत्तिः उत जीववन्नित्यत्व
मिति विचार्यते· यथा नित्यत्वा.न.जीव.
समुत्पद्यते तथेन्द्रियाणामपि जीवन्द्रमीषा
मपि नित्यत्वे श्रुतिसंभवात् तथाहि·
अन्द्वा इदमग्र आसीत् ऋषयोवाव इतेवी

सदासन्नः प्राणावात्यय इति प्रलयका
ले प्राणानां स्थितिः श्रूयते. प्राणाः स्मेते
ब्रह्मणो न संपद्यन्त इति प्राप्ते ब्रूमः-
॥ गौणसंभवात् तत्प्राक् श्रुतेश्च ॥
न प्राणानां सृष्टेः प्रागवस्थितिः. किंतु परमे
श्वरस्यैव सदेव सौम्येदमग्र आसीदि
ति श्रुतेः. ऋषिशब्दस्य प्राणशब्दस्य प
रमेश्वर एव वर्तते तस्य बहुत्वासंभवात् ब
८८ A हुवचन श्रुतिस्तत्र गौणी. ततो ब्रह्मण एव
प्रागवस्थितिः नेन्द्रियाणां - युक्तन्तस्माह.
॥ तत्पूर्वकत्वाद्वाचः ॥ परमेश्वरस्य
सृष्टेः पूर्वं वा. दितरेषां नामरूपयोगस्य तदा
नीं प्राणशब्दो नेन्द्रियविषयः अतो ब्रह्मै
व पूर्वभावीति.
॥ सप्तगतेर्विशेषितत्वाच्च ॥
पूर्वेत्त ब्रह्मकार्यतया सिद्धानीन्द्रियाणि कि-

यत्सर्वाण्यानीति सन्देहे तदन्त सर्वेन्द्रियाणीति पूर्वः पक्षः कुतः - यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह बुद्धिश्चेति - सप्तानामेवाव स्थिते विशेषितत्वात् सप्तप्राणाः भवन्तीत्यादि श्रुतेश्च इति प्राप्ते विधीयते

॥ हस्तादय .... स्थिते तो नैवं ॥

न सप्तैवेन्द्रियाणि हस्तादयोपीन्द्रियाणि - जीवे देहान्तः स्थिते उपकरणत्व विशेषादपि त्वेकादशः - मे पुरुषे प्राणा आत्मैकादशः इन्द्रियाणि दशैकं च इति श्रुतिस्मृतिभ्यां। बुद्ध्यादीनां न पृथगिन्द्रियत्वं · किंतु ते मनोवृत्ति भेदा एव सप्तानां गतेश्रावणं विशेषित्व ... तेषां गतिश्च सम्भवति ... चक्षुरादे दूरगत वस्तुग्रहणसंबन्धो न विभुत्वात् तेजोरूपत्वादणुत्वात्

शीघ्रगतिसंभवात् बन्धात् तद्ग्रहणयोगः
तस्मादिन्द्रियाण्येवाणून्येव ।। ।।

।। श्रेष्ठश्च ।।

प्राणमन्यक्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति इति सर्वप्राणश्रेष्ठतया श्रूयमाणः
88 13 पञ्चवृत्त्यात्मा प्राणवायुः ब्रह्मण उत्पद्यते न वेति संशयः - एवं सति न जायते प्राणवायुरित्युच्यते तथा नासदासीये सूक्ते आनीदवातं इत्यादिना छन्दे न स्पष्टः प्राणापि प्राणत्वे प्रश्रावणात् ।। इति प्राप्ते ब्रूमः - प्राणवायुरपि जायत एव आनीदिति निच्छब्दस्तु न प्राणव्यापारं वक्ति अपरमिति तन्निषेधात् ब्रह्मसत्वमेव ब्रूते ततो प्राणानादित्वं संभवति । भवत्वयं प्राणवायुरिन्द्रियवर्तिनो भूतवायोरपृथग्भूत इत्यत आह -

॥ न वायुक्रिये पृथगुपदेशात् ॥
पंचवृत्तिः प्राणोयं नवायुः नतद्वृत्तिः - प
तस्माज्जायते प्राणः एवं वायुरिति पृथगुप
देशात् ततो वायुरन्य एव प्राणः तथात्वेपि त
स्य न भूतान्तरत्वं इत्याह

॥ चक्षुरादिवत् तत्सह शिष्ट्यादिभ्यः ॥
वायोः पृथग्भूतोयं नानादिवत् भूतान्तरं भ
वति किंतु वायुरेव देहधारणे योग्यद
शाया मापाद्यते स्वयं परमेश्वराच्छ्रयः भती
सन्, भूयमाणो बिभर्ति एको देवो बभूवनु
पाविष्टः प्राणानां संश्लिष्टे रसे रुद्रेमा विशो
तकः इत्यादि श्रुतेः किं चायं चक्षुरादिव
त् जीवोपकरणं चक्षुरादिभिस्सहोपदेशा
त् तत्तुल्योपकारक मुख्यादिभ्यः -

॥ अकरणत्वान्न दोषः तथाहि द
र्शयाते ॥

अकरण मक्रिया न जीवोपकार क्रियार हि
तत्वाद्धोषः यत्र, श्रुतिरेव देहेन्द्रियाद्य
८९ A श्रौ विलयको रण वायुरितिदर्शयति· प्राणो
त्क्रमणो, देहादि शौ विलया द्यभिधानात्।

॥ पञ्च वृत्तिर्मनोवद्व्यपदिश्य
ते॥

प्रकरण पव स्ववृत्तिभिः प्राणापानादि संज्ञा
भेदव द्भवति· तृष्णाकामादिभिः मनएव
मेव· अतः प्राण एकएव भूतेन्द्रिय व्यति
रेकः प्रुति जीवोपकारकत्वेन सिद्धः-

। अणुश्च ॥

पंचवृत्तिरयं प्राणवायुः इन्द्रि...वदणु
रुत विभुर्वेति सन्देहः एवं साते अणुर
यं न प्राणवायुः समः प्लुषिणा समोमशकेन
न समो नागेन समस्त्रिभि र्लोकैः समो
नेन सर्वेणेति श्रुतेः- सवकर्म्मीलोनतर

वर्तितय व्यापी प्राणवृत्ति प्राप्ते ब्रूमः- अणु
रेव प्राणवायुः- प्राणमनूत्क्रामन्तं अनूत्क्राम
तीति तस्य गतिश्रावणात्‌ तत्र... त्वाधिदैवि
कस्य हिरण्यगर्भप्राणस्य समष्टिरूपस्य
विभुत्वं... युक्तं व्यष्टिरूपस्य वायोरिति
न विरोधः- तस्मादणुरेव प्राणः पंचवृ
त्तिरिति॥ ज्योतिराद्यधिष्ठानं सूप
दिश्यते तज्जीवेन सहेन्द्रियाद्यधिष्ठेतु
तदामननात्‌ प्राणवतो शब्दात्‌
इत्याग्निर्भूत्वा चक्षुषि प्राविशत्‌ इत्यादि
ना चक्षुरादेरन्याध्यधिष्ठानः श्रूयते जीव-
स्य रूपादि ग्रहणाय तदधिष्ठानमुपदिश्य
ते तज्जीवेन सहेन्द्रियाद्यधिष्ठानमन्या
देः परमेश्वरायत्तं उत स्वतस्स्वतंत्रमि
ति संशयः अग्निर्भूत्वा चक्षुषि प्राविशदि
29 13 ति स्वतंत्रश्रावणात्‌ अन्याधिष्ठानं न पर

मेश्वरायत्तं इति पूर्वः पक्षः सिद्धान्तः
परमेश्वरायत्तं इन्द्रियाद्यधिष्ठाने अग्न्या
देः कुतः योऽग्निमन्तरो यमयतीति श्रावणा
त् परमेश्वर संकल्प पूर्वत्वात् सर्वप्रवृ
त्तेश्च तस्मादिन्द्रियाद्यधिष्ठानजीवस्या
ग्न्यादेरीश्वरायत्तं॥

॥ तस्य च नित्यत्वात्॥

पूर्वस्य परमेश्वर नियम्यत्वे नित्यमेव
अतो न विरोध इति

॥... इन्द्रियाणि तद्व्यपदेशादन्यत्र
श्रेष्ठात् ॥

इह पूर्वोक्तानि वागादीनीन्द्रियाणि प्राणवृ
त्तिभ्यो भिन्नानि नवेति संशये तानिमुख्य
प्राणवृत्तय एव तेषां प्राणरूपत्व श्रावणात्
एत — स्यैव रूपमभवन् इत्यादिनाइ
न्द्रियाणी उपरम रूपे मरणे प्राणो योगइति

सामान्यात् प्राणादन्यानीन्द्रियाणीति प्रा
प्ते ब्रूमः मुख्य प्राणादन्यान्येवेन्द्रिया
णि ये प्राणास्त इन्द्रियाणीति चक्षुरादि
ष्विन्द्रियव्यपदेशात् इन्द्रियाणि - - - -
- - - इत्यादौ श्रावणाच्च तस्मदन्यत
त्त्वान्येवेन्द्रियाणीति॥ भेदश्रुतेः॥ वैल
क्षण्याच्च॥
॥ भेदश्रुते वैलक्षण्याच्च॥
एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणीति
प्राणेन्द्रियाणामभेदेनोत्पत्तिः श्रूयते इन्द्रि
याद्युपरमेच प्राणवृत्त्युपरम वैलक्षण्यं च
दृश्यते - अतस्तापि प्राणवृत्तिभ्यो भिन्ना
न्येवेन्द्रियाणीति॥
९० A ॥ संज्ञामूर्त्तिक्लृप्तिस्तु त्रिवृत्कुर्वत
उपदेशात्॥
चक्षुरादिष्विन्द्रिय व्यपदेशवत् पूर्व

आकाशादीनि भूतानि सह सदाशिवादि
भिरपि प्रजाभिः परमेश्वरादुत्पत्तिरुक्ते
ति: तदेवं तेषु जातेषु ततो देवादीनां
नामरूपादि क्लृप्तिस्तु तस्मादेव मूल
कारणादुत्पन्नात् यस्मा दित्यत्र संदेहः
एवं सति · तत्तेज ऐक्षत बहु स्यां प्रजा
येयेति तदपोऽसृजत इति तेजोपमानरु
द्रो -- जति ता सु च वीर्यं निक्षिपति · तासु
सत्त्वहितो विष्णुरभिवर्तते · आपो नारा
नरोरुद्र इति श्रुतेः रुद्रसंभूताप्स्वयन
त्वाद्विष्णोर्नारायणसंज्ञा ता आप ऐक्षन्त
अन्नं सृजतेति तदभिमानी नारायणो न
शब्दवाच्यां पृथिवीमुत्पादयति · तदन्त
रे पृथिवीतत्त्वरूपे अण्डे हिरण्यगर्भस्स
म्भवति · तथाहि श्रूयते अण्डे हिरण्मयं
मध्ये समुद्रे रुद्रस्य वीर्यात् प्रथमं बभूव

तस्माद्ब्रह्मा - विष्णुर्जातवेदो इति । अ
प एव ससर्जादौ तासु वीर्यमपासृजत् ।
तदण्डमभवद्धैमं सहस्रार्कसमप्रभम् ॥ त
स्मिन्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः । आ
पो नारा इति प्रोक्ता आपो वै नरसूनवः । ताद्वा
यं तस्य ततो नारायणः स्मृतः । नारायणपरो
ऽव्यक्तो ऽव्यक्तादण्ड ~~संभवः~~ समुद्भवः । अण्ड
स्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी ॥
इति मनुस्मृतिः - पुराणे च । रुद्रसंज्ञस्य
१० 13. देवस्य रूपो मूर्तिः प्रजायते । तेनाक्षिप्तं रसो
वीर्यं परमूर्त्यभिमानेन । तदण्डमभवद्धै
यं सहस्रकिरणप्रभं । विष्णुस्तस्माद्विशन्
साक्षात् मम शक्तेस्तु वैभवात् । पुनर्नारायणा
ख्यं मे नियोगात्प्राप्तवानसौ । इदं चोदाहृ
रत्यत्र श्लोकं नारायणं प्रति - ॥ आपस्सूक्ष्मे
रसो ज्ञेयो रसो नारः प्रकीर्तितः । नरजात

श्रुतौ ब्रह्मं नारस्तस्याद्या दूसो मतः॥नार
मस्यायनं प्रोक्तं तेन नारायणः स्मृतः॥ ब्रह्मा
पि नरस्मा दूल गंधजां मूर्तिमाविशत्॥ इ
त्यादि देवेन क्रमरूपे व्याकरोत् सात्
सतो प्रजापतिरित्यादिना. अण्डांतवर्ति हिर
ण्यगर्भोवा अद्भ्यः संभूतः पृथिव्यै रसा
च्चेत्यादेर्नारायणो वा देवादिनामण्डान्तर्व
र्तिनां नामरूपकर्ता भवितुमर्हति. नब्रह्माण्डा
देरुत्तीर्णः परमेश्वर इति पूर्वः पक्षः-
सिद्धान्त उच्यते न युक्तः प्रतिपादितः सृष्टि
क्रमः किंतु सदेव सोम्येदमग्र आसीदेव
मेवाद्वितीयं ब्रह्म तदैक्षत बहुस्यां प्रजायेयं
ति तत्तेजोसृजतेति तच्छब्दवाच्यं
ब्रह्म पंचभूतकारणं तेजः प्राथम्यं परि
हृतं.. ततस्त्वाकाशादि पृथिव्यंतं सद्वारि
वादिसंज्ञया.. पूर्वकारण रूपं ब्रह्मैवोत्तरोत्त

ऽकार्यं स्वयं कुर्वीति तदैक्षत तत्तेज ऐक्षत तदा
आप ऐक्षत इत्यादि श्रुत्यावगतं हन्ताहमि
मास्तिस्रो देवता अनेनजीवात्मनानुप्रवि
९१A श्य नामरूपे व्याकरवाणीति तासांत्रिवृतं त्रिवृत
मेकैकां करवाणीति त्रिवृत्कुर्वत एव परमेश्व
रस्य वायुरूपस्य तिस्रो देवतास्तेजोऽब
न्नात्मिका ब्रह्मविष्णुरूपक्लृप्तिरवगम्य
ते अतश्चतुर्मुखाद्यात्म त्रिवृत्कुर्वत एव
सकलनामरूपक्लृप्तेरिति त्रिवृत्करणं
केवलं चतुर्मुखस्य न संभवति । त्रिवृत्कृतौ
हि तेजस्यन्नैरण्डमुत्पाद्य पश्चात् च
तुर्मुखसृष्टेः अण्डं हिरण्मयं मध्ये स
मुद्र रुद्रस्य वीर्यात् प्रथमं बभूव ब्रह्मावि
ष्णुर्जातो जातवेदा इति श्रुतेः ... आशङ्क्य
परिहरति ।

॥ मांसादि भौमं यथाशब्दमितरयोश्च ॥

अन्नमशितं त्रेधा धीयते इत्यत्र प्राक्
त्रिवृत्करणादूर्ध्वान्तरभूतादण्डान्तर्व
र्ति पुरुषोपभुक्तान्नादीनां परिणाम
प्रकार उच्यते अन्यथा मांसमनसोः पुरी
षादेर्णीयस्त्वे नाप्यतैजसत्व प्रसंगः-
तथा सत्यन्नमशितं त्रेधेति भूमेरेव तौ
विध्योपक्रमः अन्नमयं हि सोम्य मनइ
ति मनसो भौमत्वं च विरुध्यते। तथेतर
योरप्तेजसोः स्तो विरुद्धं विरुध्यते त
दिदमाह मांसादि भौमं यथा शब्दमित
रयोश्चेति पुरीषवन्मांस मनसी अपि
भौमे इति भाव्यते तथा स्थूलावयवो हि
तः प्राणावाच्यो तथाप्सूक्ष्माव मनोवा
चौ तैजसौ- पूर्वमेव त्रिवृत्कृतयोस्तु क
थमन्नमापस्तेज इत्युच्यते इत्याह-
॥ वैशेष्यात्तु तद्वादः.... ॥

अन्नादिभूयस्त्वेन वैशेष्याद्दन्नादिव्य
११ 13 दद्दाति तस्मात्तत्त्रिवृत्कुर्वत एव परमेश्व
रस्य चतुर्मुखाद्यात्मना सकलनामरू
पसृष्टिरिति युक्तमेव ॥

इति

श्री नीलकंठ शिवाचार्य विरचिते ब्र
ह्ममीमांसाभाष्ये द्वितीयोऽध्यायस्समा
प्तः ॥

ॐ

॥ तदंतर प्रतिपत्तौ रंहति संपरिष्वक्तः
प्रश्न प्रतिवचनाभ्याम् ॥

अतीतेऽध्याये प्रथमाध्याय सिद्धस्य ब्रह्म
कारणवादसमन्वयस्य विरोधः परिहृतः ::
:: द्वितीये स्वपक्षसिद्धप्रधानकारणवादे
तर्कितर्क विरोधः प्रदर्शितः तृतीये

भूतसूक्ष्मवान्तः विरोधौ परिहारपूर्वं
जीवस्य नित्यत्वादि धर्मेण निरूपितः।
चतुर्थे प्राणेन्द्रियादीनां स्वरूपनिरूपणः
ब्रह्मण उत्पत्तिमभिधाय सर्वेषां नामरूप
करणं च निरूपितं अतस्तृतीयाध्याये
प्रथमे पादे नित्यत्वनियुक्तस्य जीव
स्य गतागति निरूपणं क्रियते; द्वितीये
स्वप्नानिरूपणपूर्वमीश्वरस्य स्वरूपल
क्षणमुच्यते तृतीये तु उपासन विशेषाणां
ईश्वरस्य गुहोपसंहारः चतुर्थे चाश्र
मधर्मवृत्ति ब्र॰सू॰ अत्र प्रथमाधिकरणे
जीवः परलोकगतागते तु देहान्तरप्राप्तौ
भूतसूक्ष्मैर्वेष्टितो याति उत नवेष्टितः
इति संशयः - एवं सति जीवो देहान्निःक्र
म्य भूतसूक्ष्मैर्भावि शरीरबीजैः उप
परिष्वक्त एव यातीत्युच्यते हेतूनां सर्वत्र

९२ सुलभ त्वेनापार्थत्वा दायासस्येति प्राप्ते
ब्रूमः जीवस्तु देहान्तर प्राप्तौ भूतसूक्ष्मैं
र्वेष्टितएव याति पंचाग्नि विद्यायां प्रश्न
प्रश्न प्रति वचनाभ्या मवगम्यते कर्मं वे
त्थ यथा पंचम्या माप: पुरुष वचसोभ
वन्तीति प्रश्न. पंचम्यां माहुतावाप: पु
रुषवचसो भवन्तीति प्रतिवचनं स.चा
यमर्थ: सपिण्डत: जीवो हि प्राणादि
दिदेह: सो हि स्वाहाकानादि कर्म
कृत्वा तत्फलभोगाया स्माद्देहादु-
त्क्रांय गच्छन् एतद्देहस्याभि रद्भि:
भूतांतर संसृष्टाभि: परिष्वक्तो त्वेन
निरूपितं द्युलोकं प्राप्य ताभिरेवामृतदे
हाकार परिणताभिरद्भि: परिष्वक्तो देवा
नां शेषभाव मुपगम्य तै: सह तत्भो
गातिशेषं अनुभूय कर्मवा — — नयाभु

क्तविशेषेण ब्राह्मणादिदेहप्रापकेन क
र्मणा सह पुनरिमामागम्य कर्म कर्तुं ता
भिरेव परिष्वक्तो गन्तृत्वेन निरूपितं प
र्जन्यं प्राप्य वर्षधाराद्भिः सं.नाम्नि
त्व निरूपितां पृथिवीमुपगम्य व्रीह्यादि
सस्येनान्नाकार परिणतेन तेन सहाग्नि
त्व निरूपितं पुरुषं प्राप्य तत्र शुक्राका
र परिणताभिरद्भिः परिष्वक्तोऽग्निनिरूपितां
योषितं प्राप्य तत्र गर्भाकार परिणताभिः
पुरुषशब्दाभिलपनीयाभिः परिष्वक्तः
कर्मानुरूपं ब्राह्मणादिदेहेन जायते इति
तदेतत्सर्वमुत्तरत्राभिव्यज्यते । तस्मात्
९२ 13 पुरुषः भूतसूक्ष्मवेष्टित एव देहान्तरं
प्राप्नोतीति -
॥ त्र्यात्मकत्वात्तु भूयस्त्वात् ॥
सर्वस्य त्रिवृत्करणेन त्र्यात्मकत्वात् भूतो

तर संसृष्टा एव आपो भूयस्त्वेन --- श
ब्देन नोच्यन्ते अतः पंचभ्यात्ता.पः इति
केवलाप्शब्द ग्रहणे विरोधाभाव इति ।

॥ प्राणगतेश्च ॥

प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीति
जीवेन सह इन्द्रियगते स्तदाश्रयत्वेन देहग्र
मनमपि प्रतीयते ततो न पूर्वोक्त --- व
प.परिहराते

॥ अग्न्यादिषु गतिश्रुतेरितिचेन्नाभाक्
त्वात् ॥

अग्निं वागप्येतीतीन्द्रियाणां अग्न्यादिषुग
मश्रूयते अतो न जीवेनेन्द्रियाणां सहगम
नमितिचेत् न वागाद्यभिमानदेवतावा
गादिशब्दस्य भाक्तत्वादोषधीर्लोमानीत्य
त्र विगद्धिर्लोमकेशः सह पाठात्

॥ प्रथमेश्रवणादितिचेन्नता एवह्यु
पपत्तेः ॥

पपत्तेः पञ्च मे त्युलोकाद्यापामश्राव
णात् नोद्भूच्छन्तिति एतास्मिन्नग्नौ देवा
श्राद्धां जुह्वतीति श्राद्धैव भोक्तृत्वेन ---
चेत् न आप एव श्राद्धाशब्देनोच्यन्ते
कर्णं पृष्ठा सकृदुत्तरोपपत्तेः गम्यते
श्राद्धा वा आप इति श्रुतेः पुनराशङ्क्य प
रिहरति

॥ अश्रुतत्वादिति चेन्नेष्टादिकारिणं
प्रतीतेः॥

अत्र प्रश्न प्रतिवचनयोरापएव प्रतीयते
१३.
४ न तत्परिष्वक्तो जीव इति चेत् न अत्र ह्य
अथ य इमे ग्रामा इष्टापूर्ते दत्तमित्युपास
ते इत्यादौ इष्टादिकारिणं प्रतीतेः धूमेन प्रकार
वचनस्य द्युलोकाग्नि संबध्यत्व शब्दस्य
तस्याहुतेः संभवस्येति सोमभूतस्य
पः सोमो राजेति प्रत्यभिज्ञानात् अद्भिः
म

परिपूर्णो स्तच्छरीरएवाय इत्युच्यते इति गम्यते अतो न विरोधः

॥भाक्तं मनात्मवित्वात् तथाहि दर्शयति॥

एषसोमः राजा तं देवा भक्षयन्तीति सोमापन्नस्य देवैः भक्ष्यमाणत्वश्रवणात् नासौ जीव इति चेत् न तदेतत्काम्यमेव अनात्मापि तेन देवोपकरणात्वे प्रायात्ः तथाहि दर्शयति यथा पशुरेवं स देवानां इति पशुर्वः देवोपकरणत्वं दर्शयते तस्मादात्मविदां परमेश्वरोपकरणत्वं मन्तव्यं तस्मात्सर्वथा जीवो देहान्तरप्राप्तौ भूतैः सूक्ष्मैर्वेष्टित एव यातीति सिद्धं॥

॥कृतात्ययेनुशयवान् दृष्टस्मृतिभ्यां यथेतमेनेति न जीवं॥

पूर्वोक्त सूक्ष्मभूतशरीरयुक्त एव जीवः स्व
र्गादिकमुपेत्य देवादिशरीरो निजकर्मानु
गुणं भोगं प्राप्नोतीति सिद्धं तदिह भो
गान्तरं स जीवः पुनरिमं लोकं सकर्मैवा
वतरति निश्शेषभुक्तकर्मेति. संशयः
तत्र व्याख्याति पुरुषो निरनुशय एव स्वर्गा
दिमं लोकं अवरोहतीति युक्तं अनुशयो
९३ 13 नाम कर्मशेषः जीवमनुशेत इति न स्वर्गा
दवरोहता नुशयः संभवति अनुशयफ
लस्य तद्भुक्तत्वात् यावत्संपातमु
षित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते
इति श्रुतिस्तद्विषया - अत्र संपात इति
कर्मसमूहः संपातमनतिक्रम्येति यावत्सं
पातमित्युच्यते अतो निश्शेषं कर्म - ल. भु
क्त्वा कर्मरहितः स्वर्गादवरोहतीति जीव इति
पूर्वः पक्षः - सिद्धान्तस्तु स्वर्गे सुकृतक्ष

ये पुनरिमं लोकं अवरोहन्त सत्कर्मशेषवत्वा
गच्छन्ति कथमवगम्यते श्रुतिस्मृतिभ्यामे
व यथा रमणीयचरणा रमणीयां योनिमा
पद्येरन् कपूयचरणाः कपूयां योनिमापद्येर
न् इति श्रुतिः स्मृतिरपि जायन्ते पुण्य
कर्मणा इत्यादिका - अन्यथा सद्यस्समुत्प
न्नस्य बालस्य धर्माधर्माभावात् सुखदुःखा
दिभोगो न स्यात् - तस्मादनुशयवानेव व
समागच्छतीति निर्णयः - मतांतरेणाश
ङ्कय परिहरति -
।। चरणादितिचेन्न तदुपलक्षणार्थे-
ति कार्ष्णाजिनिः ।।
रमणीयचरणा इति चरणशब्दान्नानुश
यः चरणशब्दस्य - चरणशब्दस्य स्मार्ता
चारविषये, त्वादिति चेत् न अनुशयोपलक्ष
णार्थेति श्रुतिः तस्यैव सुखसाधनत्वात् ।।

॥ आनर्थक्यमितिचेत् न तदपेक्षत्वात् ॥

स्मार्ताचारस्यानुशययोगात् आनर्थक्यं इतिचेत् न तदपेक्षत्वादेव सर्वस्य पुण्यकर्मणः संध्याहीनो शुचिर्नित्यं अनर्हः सर्व
९ सू: अ. कर्मसु ॥ इत्यादि काष्णाजिनिमतं ॥

॥ सुकृतदुष्कृते एवेति बादरिः ॥

बादरिस्तु रमणीयचरणाः कपूयचरणा इति चरणशब्देन सुकृतदुष्कृते एवेति ..... तत्र पुण्यं कर्म चरतीति प्रसिद्धेः ॥ तदेव स्वकृतं स्मार्ताचारापेक्षं कर्मेति अतः सुकृतदुष्कृतानुशयवानेव स्वर्गादेवावरोहति जीव इति सिद्धं ॥

॥ अनिष्टादिकारिणामपि श्रुतम् ॥

इह यज्ञपापूर्तादिकारिणां चन्द्रगमनं तत्रान्येषामप्यस्ति नवेति संशयः तत्रास

त्ति इष्टापूर्ताद्यकुर्वतामपि चन्द्रगमनमस्त्ये
व तथात्र श्रूयते ये वै के चास्माल्लोकात्प्र
यांति चन्द्रमसमेव इत्यविशेषात्-य
द्यपि तत्र पापिनां भोगो नास्ति पुनरागा
म्य शरीरग्रहणं पंचम्याहुतिलाभाय स्व
र्गगतिरपेक्ष्या· तस्मादिष्टा···र्ताद्यकुर्वतामपि
चन्द्रगमनं युक्तमिति प्राप्ते अभिधीयते-

॥ संयमने त्वनुभूयेतरेषामारोहा
वरोहौ तद्गतिदर्शनात्॥

इष्टापूर्ताद्यकुर्वतां चन्द्रगमनं नास्ति किंतु यमसद
ने कर्मफलमनुभूयारोहावरोहौ, वैवस्व
तं संयमनं जनानामिति तद्गतिदर्शना
त्· भोगार्थमेव स्वर्गगमनं न पंचमाहुति
लाभाय· द्रोणादीनां योषिदादेरभावात्तद्व्य
भिचारापत्तेः· अतः यमलोके प्राप्तिरेव पा
पिनामिति युक्तमेव॥

॥ स्मरन्तिच ॥

अस्मिन्नर्थे स्मरन्तिच· सर्वेचैते वशं यान्ति यमस्य. इत्यादि

॥ अपिच सप्त ॥

९/१३ सप्त रौरवादीनामपि पापिनो महा नरकान् स्मरंति-

॥ तत्र तद्व्यापारादित्यविरोधः ॥

म. व्यापारादेव य

म.. इयत्तया विरोधाभावः·

॥ विद्याकर्मणोरिति. प्रकृतत्वात् ॥

विद्या कर्मणो. फलं ब्रह्मगमनं चन्द्रगमनञ्चकमं· तद्य इत्थं विदुस्तेर्चिषमाभसंभवन्ति इष्टापूर्ते दत्तमित्युपासते ते धूममाभसंभवन्तीति ब्रह्म चन्द्रगमनयोरेव प्रकृतत्वात् पापिनां कर्म तद्गतिप्रसङ्गः

॥ नतृतीये ततोपलब्धेः ॥

नचपापिनामपि· पै·प़·····मूल प्राप्तिमूल
त्वात् देहारंभाय द्युलोकाद्यपेक्षा तेषां· द्यु
लोकगमनाभावोपलब्धेः· अन्यौतयो र्नैक
तरेण ··यारम्य तत्तृती·यं स्थानं तेना
सौ लोको नपूर्यते इति तृतीयं स्थानमिति·
पापकर्मणउच्यते· अतः पापिनां नस्वर्ग
गमनं

॥ स्मर्यतेऽपि च लोके ॥
लोके द्रौपद्यादीनामपि पुण्यकर्मणां पं
चमाहुत्यनपेक्षां देहारंभाय· स्मर्यते॥

॥ दर्शनात् ॥
किंच श्रुतिदर्शनञ्चं भूतानां त्रीण्येवबीजा
नि भवन्ति· अंड — — जमुद्भिज्जमिति-त
त्र स्वेदजोद्भिज्जयो स्तदनपेक्षत्वं ततः पापि
नां नस्वर्गगमनमिति निर्णयः-॥ ·····
॥ तत्स्वभावापत्तिरुपपत्तेः॥

पूर्वत्र फलभोगानंतरं स्वर्गात् सानुशय एवं
जीव इममवतरतीति. स्वर्गात् सानुशयस्य
जा. निरूपितं तस्या. वरोहतस्तु अनेक
९९A मेवाध्वानं पुनर्निवर्तंते यथेत माकाशाद्वा
युम्. वायुर्भूत्वा धूमोभवति धूमोभूत्वाभ्रं
भवति अभ्रंभूत्वामेघो भवति मेघो भूत्वा
वर्षतीति श्रुतेः- आकाशादिभावः. स्तत्र
जीवस्य आकाशादेव स्वरूपापत्तिः साहृ
श्यपत्तिर्वेति संशयः - तत्र भूत्वेति शब्दा दा
काशादिभावः जीवस्येति प्राप्ते ब्रूमः -
नावरोहतो जीवस्य तत्राकाशादेः स्वरूपा
पत्तिः किंतु सादृश्यापत्तिः नत्र सुखदुःखा
नुभवा भावात् तदनुभावार्थं हि तत्र
च्छरीर. संबन्धः अन्यस्यान्यत्वानुपपत्तेः
तत्र त्साहृश्यापत्तिरवरोहत इति निर्णयः
॥ नातिचिरेण... शेषात् ॥

पूर्वत्राकाशा दवस्तौ शनवो विलंबते नवेति संशय ॥ तत्पूर्वपक्षानन्तरं व्री ह्यादिभावमयते व्रीहि यवादे रोपधिवन स्पतयो जायंत इति प्राप्तेतस्मा. व्रीहि यवादि सद्भावात् आकाशादौ विलंबवत्वयोनिय म इति प्राप्ते प्राव आकाशादिषु जातिचि रेतिवृत्ति रूपं. व्रीह्यादि शवानन्तरं ग.ती वै दुःप्रापतरमिति व्रीह्यादिभावान्निर्ग मन कृच्छ्रमिति श्रूयते अतो व्रीह्यादौ वि लंबादन्यत्र त्वरेति योगादाकाशादौ न विलं बति जीव इति ॥

॥ अन्याधिष्ठिते पूर्ववदभिलापात् ॥
इह व्रीह्यादावपि जीवस्य संश्लेषमात्र मुत जन्मेति संशये व्रीह्यादेरन्ये ऽ.. जायत इतिश्रा
९९[13] वणात्तस्य व्रीह्यादौ जन्मेति प्राप्ते क्रमः ॥—
अन्यजीवाधिष्ठिते व्रीह्यादौ नजीवस्य जन्मकिं

किंतु संश्लेषमात्रं आकाशादाविवावरोहत्‍ः-
तत्र जननहेतु निरहाभिलाभात् जायत
इति श्रुतिर्गौणी· यतब्राह्मणादिजन्मास्ति·
तत्र रमणीयचरणा इति हेतु राभिलप्यते-त
तो ब्राह्मणादावेवास्य जन्माभिलापात्· अ
न्यत्रास्य संबन्धमात्रमिति निर्णयः॥

॥-शुद्धमिति चेन्न शब्दात्॥

अवरोहतः पुरुषस्य पूर्वानुष्ठितयागादिष्व
ग्नि(?)ष्टोमादि हिंसामिश्रत्वा दशुद्धं क
र्मास्ति तत्फलभोगाय व्रीह्यादिषु· त्प
त्तिरस्तीतिचेत् न शूयते· हिरण्यशरीर ऊ
र्ध्वं स्वर्गं लोकमेति ... उवे तं नयतेन
स्विष्यसीति· पशुहिंसाया अहिंसात्वं तते न
तत्प्राप्तिरिति- उपपत्यन्तर माह·

॥ रेतस्सिग्योगोऽथ॥

योयोह्यन्नमत्ति· यो रेतस्सिञ्चति इति· अने

न संसृष्टस्यास्यो नमस्तीति रेतःसिचा-
योगमात्रम् अन्यत्र मुच्यते अतः पूर्वम
पि व्रीह्यादिषु योगमात्रमेव॥

॥ योनेश्शरीरम् ॥

यद्वा योनिप्राप्तेरस्य तत एव शरीरमुत्प
द्यते ॥

इति

श्रीकंठशिवाचार्यकृते विरचिते ब्रह्ममीमां
साभाष्ये तृतीयाध्यायस्य प्रथमः पादः॥

ॐ

॥ संध्ये सृष्टिराह हि॥

पूर्वत्र जीवस्य गत्यागति निरूपणं कृत
मिह तदवस्था विचार्यते॥ संध्ये स्व
१५५ प्ने ... अथ रथान् रथयोगान् पथः सृज
ते॥ इत्यादि सृष्टेरभिधीयते सैषा जीव
कृता परमेश्वरकृतेति संशयः - एवं सति

नां निषेधः अपहत पाप्मत्वादयः प्रसज्ये
रन् हि. त्रिलोचनत्वादि लक्षणशरीरं किम
पि परं ब्रह्मापहतपाप्मकं जरारहित मशो
क मविजिघित्सं मपिपासं सत्य संकल्पं
११८ B चिदानन्द घनं भवति. अतो न विरोधः.
... पिपशिरस्त्वादीनामेव नीलकण्ठ
त्वादीनामवयवानामपि ब्रह्मरूपत्व-
भावे तस्योपचयापचय प्रसक्तिर्भवति-
अतो नीलकंठत्वादिकं लुप्यत इत्यत आ
ह-

॥ आदरादलोपः ॥

पूर्वोक्त नीलकंठत्वादि स्वरूप मुपपादि
तत्वाभिध्यान परमशक्ति साहित्यं सत्य संक

ल्पत्वादिकं च गुणजातं निरूपितं इह तेषां
परब्रह्मणो लोपोस्ति कदाचिदन्यथा स
र्वदा सर्वत्र न लोपोस्तीति संशयः - किं ता
वत्प्राप्तं उपासनार्थं परब्रह्मणि कल्पित
त्वात्तेषां कदाचिद्दलोपः इति प्राप्ते
ब्रूमः परब्रह्मण उमासहितत्वादीनां स
र्वत्र श्रुतिष्वभ्यासादिदर्शनादलोप एव -
तत्र एवाल्पशाखिकमुच्यते परं ब्रह्म
ऋतादरोभ्यास इति सर्वत्रैव. अतएव कृ
ष्णपिङ्गलमिति शाखिका हित्ये सिद्धे वि
लोचनत्वेच पुनरादरार्थमुमासहायं
परमेश्वरं प्रभुं त्रिलोचनमित्यभ्यासः
सवितृमंडल विषयांच नमो हिरण्यबा
हवे हिरण्यपतये अंबिकापतय इति ह्यादरा
र्थमुमापतिद्वन्द्वमत्रस्तं अन्यत्र नीलग्री
वो विलोहितः नीलग्रीवायच इतिकं

शम्भुत्वेत्यादिषु नीलकण्ठत्वमीश्वरस्या
दरादभ्यस्यते सत्यसंकल्पादीनामेक
त्रासिद्धानामन्यत्र पुनः प्रपञ्चनमद्ध
रार्थम्. तस्मादुमापतित्वादीनामभ्या
सादिलोप एव ब्रह्मणश्चाते धर्मब्रह्मणोः
११६. प्रमाणान्तरागम्ययोः यादृशी स्वरूप
मभिधत्ते भगवती श्रुतिः तादृशमे
वाभ्यासादुभयोः. श्रुतिप्रामाण्यबले
[illegible] स्वीक्रियन्त्या. तद्विरुद्धतर्कबले
बने जगदुपादानत्वादिकं न सिद्ध्यति.
अतः श्रुतिरेव हि सत्यं ज्ञानमनन्तं ब्रह्मे
ति सत्यज्ञानाकारमपरिच्छिन्नं ब्रह्मेत्यु
क्ता -
ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय. इति
पूर्वं सामान्यतः सिद्धस्य तस्य विशे

पणः विरूपाक्ष शब्देन त्रिलोचनविशिष्टं-
कृपण पिङ्गः ऌ शब्देन परशुहस्युमा शा,
कह्लविशे पस्वरूपे विधत्ते· पुनरस्य-
रूपको क्षद्मण आनन्द इति निरतिशया
नन्दवत्वं उच्यते· तस्यैवाकाशशरीरं
ब्रह्म सत्यं· प्राणारामं मन आनन्दं शा
न्तिसमृद्धममृतमिति चित्प्रकाशरूप
त्वमात्मारामत्वं बाह्यकरण निरपेक्षांतकर
णैकानुभूयमान परमानन्दविलासत्व मु
पशान्त सकलोपद्रव कलंकत्व मनादिमुक्तत्वं
प्रकाशयति· अस्य हि निरूपाक्षत्वादि ल
क्षण शरीर संबन्धे .. जीववच्छरीरयुक्त संसार
धर्मं शरीरधर्मा न प्रहतप्रापेत्यादिना-
निराकरोति. यः सर्वज्ञः सर्ववित् परास्य
शक्तिः पशूनां पतये इत्यादिभिः अस्य स
र्वज्ञत्व सर्वशक्तित्व स्वतंत्रत्वादिकं निरूपयते·

अतः श्रुतिरेव सकल प्राण, ईश्वरस्थानीया
११९ 13 सत्यज्ञानानन्तं अपरिच्छिन्नस्वरूपं -
सर्वज्ञं नित्यतृप्तं स्वतन्त्रमनादिप्रका
शमनंतालुप्तशक्तिं आत्मारामं अन्तरनु
भवैकविषय परमानन्दं उपशान्तममृतं
नीलकण्ठं विरूपाक्षं उमासहितं प
रं ब्रह्म जगत्कारणं वाध्यात्मं मुक्तिसाध
नमिति सर्वत्र घोषयति। केनेदं निबध्ते
ततः परब्रह्म उक्तस्वरूपधर्मिणामलो
पयुक्तः

॥ उपस्थिते स्तद्वचनात् ॥

इहपूर्वत्ताधिकरणोक्तं ब्रह्मस्वरूपमेव मो
क्षफलं उतान्यादिति संशयः किंतावत्प्रा
प्त नि.क. निर्मलं शान्तं निरन्यं, निरञ्जन
मित्यादिषु ब्रह्म निर्विशेषमिति श्रूयते
ब्रह्म मे. वेद. ब्रह्मैव भवति इति मुक्तस्यत

त्स्वरूपापत्तिरेव मुक्तिरतो निर्विशेषमेव
ब्रह्मस्वरूपं मुक्तिफलं नान्यदिति चेत्प्राप्ते ब्रूमः
पूर्वोक्तसविशेषमेव ब्रह्मस्वरूपं मुक्तिफलं
दहरकमलान्तर्भावितया प्रतिपादितत्वेन वि
रूपाच्छे परब्रह्मणि परमे.ति.रूप संपद्येति
मुक्तेन प्राप्ते स्वेन रूपेणाभिसंपद्यत इति
स्वरूप:प:त्तेरेव हेतो जे थ्व. क्रीडनरमा:
ण:स्रा ---- नै वैत्यादिना स्वच्छन्द
तो ब्रा.ह्म.दि प्राप्त्यभिध्यानाच्च परमं साम्य
मुपैतीति श्रुत्या मुक्तः क्लीवः समो भवेदि
ति स्मृत्याच परब्रह्मणस्तस्य सदृशरूपत्वं
मुक्त - स्येष्यति अतः साक्षान्मोक्षफल
मेव पूर्वोक्तं नीलकण्ठत्वादिलक्षणं पर
ब्रह्मस्वरूपं न सा.रि.क.मे.व तस्यापह
१२०४ त पाप्मेत्यादिना सांसारिकधर्मनिषेधात्
सगुणैवातः परविद्या निष्फलं निष्क्रियमि

श्रीदिषु - त्यादिषु हेयगुण विशेषनिषेधपो
धपविकीयते न कल्याणगुण विशेष निषेधः -
तथाहि - निष्कलं निष्क्रिय मित्यादिना प्राध्यानक्षी
लाक्षपाते र्गुणो. ज्ञा इत्यादिना नैर्गुणत्वे -
सामान्येन प्राप्ते हतपाप्मा यः सर्वज्ञा इत्या
दिभि र्विशेष श्रुत्ति. निर्गुणत्वे सामान्येन
प्राप्ते पहतपाप्मा य. सर्वज्ञ इत्यादिभिर्वि
शेषश्रुतिभि. निर्गुण श्रुते हेयगुण रा
ह्रि त्यपरमर्थः सगुणत्व श्रुतेः कल्याण
गुण साहित्यमिति सोऽश्नुते सर्वान् कामा
न् सह ब्रह्मणा विपश्चितेति विपश्चिता
सर्वज्ञेन ब्रह्मणा सर्वकाम. नपि मुक्तः
प्राप्नोतीति - सह शब्दो ब्रह्मभावस्य यो
गापत्याभि प्राय- अतः सगुणमेव ब्रह्मस्व
रूपं मुक्तिफलमिति ॥

॥ तन्निर्धारणा नियमस्तद्दृष्टे

— पृथक् ह्यप्रतिबन्धः फलम्॥
कर्मणाङ्गाश्रयन्ते उद्गीथाद्युपासना,
ते हि कर्मसु नियता उत अनियता इति
संशयः किं प्राप्नोति कर्मानुष्ठाने कर्माङ्गे
षु नियमेनानुष्ठेयाः कर्मप्रकरणमना
रभ्याधीता अपि वाक्यादेव क्रतुसम्ब
न्धोपपत्तेः यथा यस्य पर्णमयी जुहू
र्भवतीत्यारभ्याधीतस्याप्यव्यभिचारि
त जुहूपरवाक्यतः क्रतुसम्बन्धः त
था य एवं विद्वान् साम गायतीत्यादिषु
अव्यभिचारिक्रतुसम्बन्धि सामो
१२० उ उद्गीथादि द्वारा तदुपासनां क्रतुसम्ब
न्धः अतः अतः कर्मसु नियता उद्गी
थाद्युपास्तय इति प्राप्ते अभिधीयते गोदो
हनादिवद नियता उपास्तयः यथा
चमसेनापः प्रणयेद् गोदोहनेन पशुकाम

-स्येति तत्प्रणयनमाश्रित्य विधीयमानम
पि गोदोहनं कृत्वर्थत्वादैच्छिकमेव नतु
प्र. प्रणयनादिवं नियत कर्मण्याश्रि
त्य विधीयमाना उपास्तयः क्रत्वर्था न
भवन्तीति तेनोभौ कुरुतो यश्चैतदेवं
वेद यश्च न वेदेत्युद्गीथोपासनरहित
स्यापि कर्मानुष्ठानदर्शनात्, यदेव विद्यया क
रोति देववीर्यवत्तरमिति वर्तमाननिर्दे
शेऽपि क्रतुवीर्यवत्तरसाधनतया अपा
स्तविधिः कल्पते. वीर्यवत्तरतानाम
प्रबलेतराप्रतिबन्धेनाविलम्बितफल
त्वमेव- अथवा पुरुषार्थतया कामवृष्ट्या
दि पृथक्फलश्रवणाच्च कर्मसु आने
यता उपास्तयः पृथक्फला इति॥

॥ प्रदानवदेव तदुक्तं ॥

एकस्यैव शिवस्य परब्रह्मणः परविद्यासु

सर्वासु गुणविशिष्टतया पृथक्चिन्तनीय
त्वमुक्तं- तदिह संभवति नवेति संशयः-
किं प्राप्तं गुणभेदेपि गुणिनो ब्रह्मण ए
कत्वात् दुपासनं नाभिद्यते - यथा एकस्य रा
ज्ञः स्तनन्दूषणादि विशेषण युक्तस्यापि
कार्यदर्शन दशायां भोजनासनं मृगया
समरादि व्यापारेषु तत्तत्सिंहासनादि
स्थानेपि न भेदो दृश्यते तथा दहरादिष्वा
१२१ A. न भेदेपि तद्भेदविशिष्टस्यापि ब्रह्मण एक
त्वात्तदनुसंधानमेकमेवेति प्राप्ते ब्रूमः-
एकस्यापि परब्रह्मणः शिवस्य परविद्यासु
तत्तद्गुणविशिष्ट स्वरूपतया स्वरूपाभेदे
पि गुण विशेषण भेदात् विशिष्ट गुणावृ
त्या तदुपासन प्रयोगः इन्द्र प्रदानवत्
यथेन्द्राय राज्ञे पुरोडाशमेकादशकपालं
इन्द्रायाधिराजायेन्द्राय स्वराज्ञे इति गुण

भेदात् पृथक्पुरोडाशप्रदानांतरस्यैकस्या पि परब्रह्मणो गुणभेदादुपासनपृथक्त्वमिति - यदुक्तमेकस्य राज्ञ इति तत्रापि राजस्वरूपावस्थान गुणादिभेदादुपासन प्रकारो भिन्न एव सेवकादीनामिति पृथक्त्वमिति एकस्य ब्रह्मण ॰ सत्यसंकल्पादि गुणविशेष भेदात्तद्भावृत्त्या पृथगुपासनं राजत्वादि भेदविशेषेन्द्र पुरोडाशावदाने भेदवदिति नानादेवता पृथक्त्वादिति तस्य तत्तो कत्वादिति ·

॥ लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥

सर्वत्र सर्वविद्यासु ब्रह्मोपास्यं तत्तल्लिङ्गेनेत्युक्तं तदिह विचार्यते - श्रूयते - सर्वो वै रुद्र इत्यारभ्य ॰ उमापतये नम इति अत्र सर्वात्मतया च उमापतित्वेन च श्रूयमाणं

परं ब्रह्म प्रकृते सवितृमंडल विद्येमात्तो उ
पास्य मत्त. सर्वासु परविद्यास्विति संशयः.
किं तावत्प्राप्तं प्रकरण वाक्ये प्रयोजनाभाव
त्त्वात् : सवितृमण्डल विद्यायामेव. उपास्यमिति
प्राप्ते ब्रूमः. इदं सर्वात्मकं उमासहितं परं
१२१ ब्रह्म सर्वास्वपि परविद्यासूपास्यं तत्तल्लि
13 ङ्ग. संवादि वाक्य भूयस्त्वात् : तथाहि -
सर्वो वै रुद्र इति वाक्ये. सर्वं खल्वि
दं ब्रह्म तज्जलानीति शान्त उपासीतेति.
उपकोसल विद्या. उपास्यत्वलिङ्गं. पुरुषो वै
रुद्र इति. योयं पुरुषो भाः सत्यमिति शा
ण्डिल्य विद्योपास्यत्व लिङ्गं. सदेव सोम्येद
मग्र आसीदिति. मह इति तद्ब्रह्म. अङ्गान्य
न्या देवता इति व्याहृति विद्योपास्यत्व लिङ्गं.
शान्तं हृदय इति हृदयाकाश द्योतनात्
दहर विद्योपास्यत्व हिरण्यबाहव इति हि

रण्य रूपत्वेन सवितृ मंडलोपास्यलिङ्गं, नु
उमापतय इति सर्वोपास्यत्वलिङ्गं, रु=
लिङ्गं = दृइति संसार रु - द्रावक
त्वाद्धि रुद्र उच्यते परमात्मा शिवः एवं
उमापतेः परब्रह्मणः शिवस्य सर्वप
र विद्योपास्यत्ववाक्यं हि प्रकरणाद्ब
लीयः तदप्युक्तमेव "श्रुतिलिङ्गवाक्येत्या
दिना" तस्मादुमासहित परवस्तु सकल
परविद्यासूपास्यमिति ·

॥ पूर्वविकल्पः प्रकरणात्
- स्यात्क्रियामानसवत् ॥

अग्नि रहस्य ब्राह्मणे श्रूयते · षट्त्रिंशत्स
हस्राण्यपश्यदात्मन इति · तत्राग्नयः अ
र्कत्रिंशत्सहस्राणि संपद्यन्ते तत्र प्रत्य
गात्म स्वरूपेण ध्यातव्याः दहरविद्याम
ध्ये क्रत्वंगभूता उत केवल क्रत्वंगभूता

इति संशयः तदिह पूर्वः पक्षः प्रवर्तते
मनश्चितः वाक्चितः प्राणचित इत्यादि सं
१२२ पादिकाग्नीनां असद्वा इदमग्र आसीदि
त्युपन्न, पूर्वप्रकृते प्रकाये त्वाग्ने शेषभू
त क्रियामय क्रत्वनुप्रवेशः स्यात् प्रथाम
वनीनामिष्टकचिताग्निना विकल्पः --
द्वादशाहीयभूत मानसग्रहवत् प्रथमा
नसानामपि क्रियामय क्रत्वङ्गत्वं न विरुद्धं
किन्तु -

॥ अतिदेशाच्च ॥

तेषामेकैकस्तावान् यावानसौ पूर्वमि
ति इष्टकचिताग्निकार्यातिदेशाच्च अत
स्तदङ्गत्वं प्रथममिति प्राप्ते सिद्धान्त उच्यते

॥ विद्यैव तु निर्धारणात् दर्शनाच्च ॥

विद्यैव विद्यामय क्रत्वङ्गं न्याय दृश्यते
अतश्च विद्यामयत्वं मानसेष्वन्य माह्य मह

ते इत्यादिषु सिद्धं अतस्तेषां विद्यामय
त्वमेव ।

॥ श्रुत्यादिबलीयस्त्वाच्च नबाधः ॥४७॥
तेहैते विद्याचित एव स्वविद्यया हैवैत
एवं विदश्चित भवतीति श्रुत्या वाक्ये
नचावगत विद्यामय क्रतुत्वमयस्य दुर्
बलेन प्रकरणेन बाधः –

अनुबन्ध्यादिभ्यः प्रज्ञान्तर-
– पृथक्त्ववद्दृष्टश्च तदुक्तं ॥
ग्रहाग्रहदन्त इत्यादि क्रत्वनुबन्धैः
ते हैते विद्याचित इति श्रुत्यादिभिस्स
विद्यामयक्रतु विधिः कल्पनीयः दहर
विद्यादीनां क्रियामयानां पृथक्त्ववदस्या
पि विद्यामयक्रतोः सानुबन्धैः पृथक्
त्वमवगम्यते दृष्टश्चानुवाद सरूपो वि
धिः यदेव विद्याकरोतीत्यादौ तदुक्तं

वचनानित्वपूर्वत्वादिति अतो विद्यामयत्वमेव
122. पुरुषं - आशङ्क्याह—
13.
॥ न मातृणादप्युपलब्धेः मृत्यु-
- वन्न हि लोकोपत्तिः॥
तेषामेकैकद्वीवत्... यावानसाविति
इष्टकचितान्निफल... सामान्येन मृतिदेशः
इष्टकचिताग्नेः स्वक्रतु स्वक्रतु द्वारेण-
यत्फलं नदेषा. विद्यामयक्रतु प्रवेशेनफ
लमिति पुनरिष्टचितान्यतिदेशात्वमेषा
मित्येकेनापि सामान्येनाप्यतिदेशलब्धेः
प्रमन्यमृर्यप्य तस्मिन् मंडले पुरुष इति
सर्वहरत्व मात्तेण' नहि तत्त मंडलपुरुषस्य
मृत्युदेशत्वं अतः केनुचित् सामान्यादि
देशे नाविरोधः हेत्वंतरमाह—
॥ परेण शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः॥

परेषः ब्राह्मणेनास्य मनश्चिता मितिवाचे
नः शब्दस्य विद्यामयत्वप्राते पादितत्व
मवगम्यते· अन्यार्थं वावलोक इयोरुन्ने
त्ये दृस्यापि इत्यादिना पूर्वरूपफलः वि
द्यां विधीयते क्रियाप्रकरणे मनश्चिदादी
नामनुबन्धस्तु संपादनीयानामङ्गा
नी भूयस्त्वा. त तु ए... तेषां विद्या
मयकृत्वं गत्वं·

॥ एक आत्मनः शरीरे भावात् ॥

इह पूर्वोक्ते ब्रह्मस्वरूपानुसंधानं सर्वा
सु परविद्यासु युज्यते नवेति संशयः तत्रा
प्रति एकेमन्यैते शरीरे वर्तमानत्वात् उपा
सितुरीश्वरस्य कर्तृत्व भोक्तृत्व स्वरूप
परिज्ञानत्वात्· तन्नाव स्थितेत स्यात्मतयाप
रविद्यासु परमेश्वर स्वरूपस्य त्रिलो·
१२३ चनत्वादि लक्षण· स्य स्वरूपस्यानुसंधा

नं· नयुक्त इति सिद्धांत उच्यते—

।। व्यतिरेकस्तद्भावभावित्वान्न-
- तूपलब्धिवत्।।

नैवं· यत्कर्तृत्वादि स्वरूपस्योपासितु रात्मतया परमात्मा अनुसंधेय इति·— अपितु सांसारिक स्वभाव(यो) व्यतिरेकः अपहतपाप्मत्वादि गुणस्वरूपः सोनु संधेयः· तस्यानुसंधानसद्भावभावि त्वात् स्वरूपोपलब्धेः· यथावस्थित स्वरूप ब्रह्मानुसंधान भाविनो ब्रह्मोपल ब्धेः तद्यथाक्रतुरस्मिन् लोके पु रुष इत्यादि श्रुतेः- अतः सांसारिक स्वभावान्मुक्तस्वभावतया त्रिलोचनत्वा दिलक्षणस्य ब्रह्मस्वरूपस्यानुसंधाने विरोधाभाव इति·

।। अङ्गावबद्धास्तु न शाखासु

— प्रतिवेदनम् ।८

स्वरूपवत् क्वचित् शाखासु श्रूयमा
ण. उ. पास्त नाडू.जी. कोष्ठा. सर्वत्रोपास
नाडू. त्वेन उपसंहार्याः नवेति संशयः-त
थाहि आत्मानमरणिं कृत्वा प्रणवञ्चोत्तरा
रणिं । ध्याननिर्मथनादेव पापं दहति-
पंडितः" इति कैवल्योपनिषदि हृदयो
पासनाडू. तया प्रणवाभ्यासः श्रूयते-
अग्निरित्यादिना, भस्मगृहीत्वा विमृज्य
गानि संस्पृशेत् तस्मात्‌व्रतमेतत्पाशु
पतं पाशविमोक्षायेति पाशुपतविद्या
शब्देन भस्मोद्धूलनमथर्वशिरसि श्रू
यते अन्यत्रच तिर्यक् । तिस्रो रेखाः प्र
कुर्वीतेति त्रिपुण्ड्रधारणं विधीयते-
तस्य । शिवसायुज्यमिति फलश्रवणा
123.3. त्. परविद्यांगत्वे- तदैतवेत्रै विद्या-

याङ्गावबद्धा यासु शाखास्तासूपासने
पूपासकैः कार्या· सन्निधिवशान्न स
र्वत्रेति प्राप्ते ब्रूमः - अस्मात् द्रूकनाद्
यौद्गुपासना ङ्गावबद्धा यासु शाखासु श्रुता-
स्तास्वेवेति न नियमः किंतु प्रतिवेदं स
र्वत्र शाखासु सर्वैरपि तदुपासकैः कार्या
एव श्रुत्यासौ निर्बाधः ॥

॥ मन्त्रादिवद्वाऽविरोधः ॥

वाशब्दोऽवधारणे यथा क्रत्वङ्गभूतानां मन्
त्राणामेकैकशाखागतानामपि सर्वशाखा
गत क्रत्वन्वयेऽपि नविरोधः तथात्रापि-

॥ भूम्नः क्रतुवज्ज्यायस्त्वं तथा
हि दर्शयति ॥

इहापि वैश्वानरविद्यायां तदुपासन
मंशेन समस्ते वेति संशयः दिदृते तथा
हि वैश्वानरविद्यायां द्युलोकं सूर्यवायु

काशो दृक प्राणेभ्यो मूर्द्ध चक्षुः प्राणमध्य
शरीर मूलस्थान वादि रूपवेव ध्यानं
तत्थ स्मृति रूपं निरूपितं - तेषामङ्गानाम
पि प्रत्येकमुपासनमभिहितं - उपास्तिशब्द
स्य फलवचनस्यच प्रत्येकमुपलभ्यमान
त्वात् अंशोपासनमुच्यतामिति पूर्वः पक्षः
सिद्धान्ते तु समस्तोपासनमेव मुख्यमित्यु
च्यते तत्त त्रैलोक्य शरीरतयोपास्यस्य
स्वल्पादि प्राणेभ्यीतानां वैश्वानरात्मनो
मूर्धादि पादतावयवत्व मभिधायस्वैत
मेव पादेशमात्तमाभिमानमात्मान मुपास्ते
स सर्वेषु लोकेषु कामचार इत्यादिनाब्र
ह्मानुभव फलेचाभिहितं तत्त मूर्द्धाद्यव
124 यवोपासनात् भूम्न स्समस्तोपासनस्य
ज्यायस्त्वं प्रामाण्येक स्त्वमस्ति तत्तत्वब्र
ह्मानुभव मूलाभिधाना तत्ता वयोपासनं
यवोपासनं

भ.ल कीर्तनस्य कतुफलतयाविबाध्येति दृष्टव्यं-
वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जा
ते इत्युक्त्वा यदष्टाकपालो भवतीत्यादौ-
तस्य समस्तोपासने श्रैष्ठ्यं दर्शयति श्रुतिः
देवमेव भगवो राजन्नित्यवयोपासने भि
हिते मूर्धाते, व्यभिष्यत् यदि मां नागमिष्य
इत्यादिदोषदर्शनं ब्रवीति अतस्समस्तोपास
नमेव मुख्यमिष्यते-

॥ नानाशब्दादिभेदात् ॥

इह परविद्यानामेकीकरणेनोपासनमुत
भेदेनेति संशये नानाशाखाश्रुतानामपि
विद्यानां वेद्यस्य ब्रह्मण एकत्वादैक्योपास
नमिति प्राप्ते मत उच्यते. भ. नैतद्युक्तं स्या
द्ध्यानमनेकानां विद्यानामेकीकरणानुष्ठा
नायोगात् स्वरूपैक्येपि ब्रह्मणो गुणभेदा
द्विद्याभेदः . यत्र गुणभेदो नास्ति तत्र स्या

नादिभेदात् राजादिगुणभेदात् इन्द्रस्य
पुरोडाशाद्यवदान भेदवद्गार्हपत्यस्था
नादिभेदादनेदुपचार भेदवन्नाम.
इति निरूपितं अतो नानाप्रकाराविद्या
नत्तच्छब्दाचनु भेदादिति निर्ण
य ॰ पुनराधिकरणारंभोयं ज्ञानस्या
विक्षेपत्तां वदतां निरासार्थः -
॥ विकल्पोऽविशिष्टफलत्वात् ॥
१२४. एवं नानाप्रकाराः परविद्या निरूपिता-
13. तासूपासकस्य विकल्पः समुच्चयो वेति सं
देहः. किं प्राप्नोति. दहरविद्यासद्विद्यादी
नां समुच्चयेनानुष्ठानमुचितमेव कर्म
भूयस्त्वेनात्मनः फलभूयस्त्वात् विकल्पेतु
किं चिन्नियामकं नास्तीति प्राप्ते ब्रूमः -
एकस्मिन्नुपासके सर्वासां परविद्यानां
विकल्प एव कुतः निरतिशयानन्दानु

भवस्य ब्रह्मसाक्षात्कारफलस्याविक्षेपकत्वात् तथ प्रयोजनमेकेनोपासनेन यदि सेत्स्यति किमन्यैरप्रयोजनैः किंच एकेनोपासनेन प्रमाणजन्यं ब्रह्मस्वरूपापरोक्ष्ये निरतिशयभावना सिद्ध्यति ध्येयतादात्म्याभिध्यानात् तदैकमेव परित्यज्यान्यत्र गमने चित्तविक्षेपः स्यात् अतो विकल्प एव

॥ एवं काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥

इह ब्रह्मसाक्षात्कारो तत्फलानां पूर्वाधिकरणन्यायइति सन्देहे प्राप्ते अभिधीयते नतु पूर्वाधिकरणन्याय इह संभवति वैषम्यात् देवो भूत्वा देवानप्येतीति श्रीवन्नेव भावनाप्रकर्षवशात् देवभावस्य साक्षात्कारप्राप्तिरवगम्यते तत्र भोगभूयस्त्वा

पेक्षया समुच्चय एव काम्यफलवदेकत्वाभा
वात् क्रतु समाप्तौ त्यानुष्ठेयमिति निर्णयः-

॥ अङ्गेषु यथाश्रय भावः॥

इह पुनरुद्गीथाद्यंगानां क्रत्वङ्गभावस्वा
१२८ अ. तन्त्र्ये वेति संशयः- तत्रासति पूर्वः..
पक्षन्यायः प्रवर्तते· उद्गीथमुपासीतेत्यु
द्गीथाद्यंगेषु आश्रितानामुद्गीथादि
वत् क्रत्वङ्गभाव एव· गोदोहनादिवत्
स्ववाक्ये फलाश्रावणात् उद्गीथसंब
न्धितया क्रत्वंगभाव एव

॥ शिष्टेश्च॥

उद्गीथमुपासीतेति विधेर्यदेव विद्यया
करोति इत्यत्र विद्याभावाच्चाङ्गभाव
एव·

॥ समाहारात्॥

उद्गीथमनुसमाहरतीति वेदाहानौ

समाख्यानमपूर्ववद् सांनिध्यं चोदयति·
॥ गुणसाधारण्यश्रुतेश्च ॥
प्रकृतस्योपासनस्यैव ओं इतिश्रस्य
सक्ति· उद्गायतीति सर्वत्रसंचरतः प्रण
वस्य गुणत्वेनोपासनस्यापि संचारादु
पासनोपादान नियमो गम्यते· अतः पू
र्वोपासना नियमो न संभवति· सिद्धा
न्त उच्यते·

॥ न वा तत्सहभावाश्रुतेः ॥
अङ्गभावो हि सहभावी· तदश्रावणाद्वेषां
न तद्भावः· यदेव विद्यया करोति तद्वी
र्यवत्तरमिति फलान्तर साधनतयाव
गतोपासनस्याङ्गभावादुद्गीथमुपासी
त इत्युद्गीथव्याप्तता मात्रप्रतिपादनात्·
अनेन तेषां उद्गीथाद्यङ्गानां क्रत्वङ्गभावः·
॥ दर्शनाच्च ॥

एवं हि वै ब्रह्मं यत्र यजमानं सर्वाङ्गऋत्
त्विजो भिरक्षतीति - पूर्वं ब्रह्मणो वे
दनेन सर्वरक्षणं वदन्ति श्रुतिरेव
उद्गातृभृतीनां वेदनायां तद्गतं द
र्शयति । उक्तश्च पूर्वोक्तोपादाननिय
मो न सिद्ध एव ।

१२८
13. इति
श्रीकण्ठशिवाचार्यविरचिते
ब्रह्ममीमांसाभाष्ये तृतीया-
-ध्यायस्य तृतीयः पादः ॥

ॐ

॥ पुरुषार्थोऽतः शब्दादिति
बादरायणः ॥

पूर्वत्रोपपादितो हि परविद्याप्रकारः तदि
ह विद्यात एव पुरुषार्थ इति - ब्रह्मविद्या

प्नोति परं श्रुत्वा ज्ञात्वा शिवं शान्तिमत्यन्तमे तीत्यादि शब्दादिति बादरायणो मन्यते तदिह संभवति नवेति उभयश्रुत्या संशयः तथा सति पूर्वः पक्षः प्रवर्तते ·

॥ शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः॥

न विद्यातः पुरुषार्थसिद्धिरिति जैमिनेर्मन्यते - कुतः तत्वमसीत्यादि सामानाधिकरण्येन कर्मसु कर्तुरेव ब्रह्मत्वावगमात् तद्वेदनस्य तत्संस्कारतया कर्मशेषत्वात् फलश्रुतिस्तु द्रव्यादिष्विवार्थवाद एव अतो न विद्या पुरुषार्थहेतुः -

॥ आचारदर्शनात्॥

तथाह्याचारोपि दृश्यते - अश्वपतिः केकयो ब्रवीत् यक्ष्यमाणो वै भगवन्तोहमित्यादौ ब्रह्मविदमपि कर्म प्राधान्ये

भावयाम्यते अपतोहेति ध्याकर्माङ्गमेव
॥ तच्छ्रुतेः ॥
यदेवविद्यया करोतीति श्रुत्येव विद्या
याः कर्मसु विनियोगात् यत्करोति -
तद्धयेति हि श्रुतिः यद्विद्या साधनभू
तया कर्म करोति तद्विद्यवत्तरमिति
वा सिध्यति अतो विद्याया कर्माङ्गत्वमे
व अतश्चेत्याह—
॥ समन्वारंभणात् ॥
१२६ तं विद्याकर्मणी समन्वारभत इति विद्याकर्मणोरेकस्मिन् साहित्य श्रुतेः
अतश्च तदङ्गत्वमेवा विद्यायाः—
॥ तद्वतो विधानात् ॥
आचार्यकुलात् वेदवृत्तो अभिस
मावृत्येत्यादौ नचार्थज्ञानपर्यन्ता
ध्ययनवतः कर्म विधीयते अतश्च

तस्य कर्माङ्गत्वम्।

॥ मूयमात्र ॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः इत्यात्मविदो जीवनस्य कर्मसु विनियोगो निगम्यते अतश्चाविद्या कर्माङ्गमेव नातः पुरुषार्थ इति सिद्धान्त उच्यते

॥ उपधीतोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥

न विद्यायाः कर्मशेषत्वं अपितु विद्याया एव पुरुषार्थ इति बादरायणस्य मतमेव उक्तं कर्तुः प्रत्यगात्मनोऽन्तरभूतस्य न विद्ययोपदेशात् तथाहि बहु स्यां प्रजायेयेति सकारणं करणाधिपाधिपो विश्वाधिको रुद्रो महर्षिरित्यादिवाक्येषु वेद्यस्य ब्रह्मणः आधिक्य

दृश्यते अतो न विद्यायाः कर्मशेषत्वमि
ति । यदुक्तं आचारदर्शनात् इति तत्राह-

॥ तुल्यं तु दर्शनम् ॥

विद्यायाः प्राधान्येऽपि तुल्यमाचारद
र्शनं न केवलं कर्मण एव तथा अप
यः कावषेयाः किं प्रजया करि
ष्यामः किमर्था वयमध्येष्यामहे किं
मर्था वयं यक्ष्यामहे इत्यादौ ब्रह्मवि
दां कर्मत्यागो हि दृश्यते- अनुष्ठानं तु फ
१२६ १३ लाभिसंबन्धरहितस्य कर्मणो विद्यां
गत्वेन त्यागस्तु फलाभिसंबन्धयु
क्तस्येति विरोधाभावात् कर्मण एव वि
द्यांगत्वेन विद्यायाः प्राधान्यमेव-
यदेव विद्यया इत्युक्तं तत्राह-

॥ असार्वत्रिकी ॥

यदेव विद्यया करोतीति न सार्वत्रिकी

विद्योत्पत्ते देव विद्ययेति पासेद्धवान्ने
ईशात् पसि..रप्युक्तौना वि द्याया एव
यदेव विद्यया करोति तदेव वीर्यवत्तर
मिति प्रकृतो क्तौना विद्यायुक्तस्य कर्म
णो वीर्य वत्तरत्व साध्य नाभावोऽभिधी
यते अतो न विद्या कर्मी ॥ - व..कुर्कं-
विद्याकर्म इति तत्राह-

॥ विभागः शतवत् ॥

तं विद्याकर्मणी.. समन्वारभेते इति
विद्याकर्मणो भि..न्न फलत्वेन स्वस्मै
फला..न्वेतीति विभागात् यथा क्षेत्र
त्न विक्रयेण शतद्वयमित्यत्र क्षेत्रार्थं
शतं रत्नार्थं शतं इति अतोऽत्र न विरोधः-

॥ अध्ययनमात्रवतः ॥

वेदमधीत्येत्यध्ययनमात्रवतः (प्रवृ..क्र
मी ॥ अध्ययनविधेर्हि.. अक्षरग्रहण

मात्रे पर्यवस्यति अर्वाचीनोऽथ पर्यन्तत्वेप्य
र्थज्ञानात्कर्मान्तरभूता विद्या - उपासी
तेति विहिता विद्या प्रत्यपावृत्तिरन्या
अतोस्याः कृतापि न दोषभावः-

॥ न. विशेषात् ॥

कुर्वन्नेव हि कर्माणि व्यक्तस्वतंतो कर्म
णि विद्वत्पुंसो विनियोग इति विशेष
हेतुं न दृश्यते तत्र ईशावास्यमिदं सर्व
१२८ मिति प्रकरणाच्च विद्यांगभूतमेतत्कर्मे
ति विज्ञायते अतो न विद्यायाः कर्मांग
त्वं किं चेदमुच्यते

॥ स्तुतयेऽनुमतिर्वा ॥

विद्या स्तुतया कर्मानुमन्यते भवि
ति विद्यामाहात्म्यात् सर्वकर्म कुर्व
न्नपि नैर्लिप्यत इति विद्यास्तुतास्या
त् न कर्मणा लिप्यते पावकेनेति वाक्य

विशेषः अतस्य विद्याया एव प्राधान्यं ॥

॥ कामकारेण चैके

किं प्रजया करिष्याम इत्यादिना कामकारेण गार्हस्थ्य त्याग श्रूयते एके हि । अतो विद्या प्रधानभूता लक्ष्यते

॥ उपमर्दं च ॥

विद्यायां सर्वकर्मोपमर्दः श्रूयते एके श्रीयते यास्य कर्माणि तस्मिन् दृष्टे परावरे इति । अतो न धर्म प्राधान्यं

॥ ऊर्ध्वरेतस्सु च शब्दे हि ॥

ऊर्ध्वरेतस्सु चाश्रमेषु इण्या प्रवदर्शनात् तेषु अग्निहोत्राद्यसंभवात् अविद्याकर्मादि तथा हि त्रयो धर्मस्कंधा इति वैदिके शब्दे च दृश्यते । तप एवाश्रम धर्मा इतयाः अतो विद्यैव प्रधानभूत पुरुषार्थ हेतुभूतस्या स्वांगतया फला

भिसंधिरहितस्य स्वहितकर्मणएवानुवृ
त्तिःसिद्धमेव॥

॥ परामर्शं जैमिनिरचोद
ना चापवदति हि॥

पूर्वोक्त तयोर्धर्मस्कन्धा इति त्रयाणामे
व आश्रमाणां धर्माधारत्वं सूचितं अत
एवात्र चतुर्थाश्रमधर्मसद्भावे संदेहः
१२६ 13 एवं सम्मतीतरेणाभिधीयते पूर्वपक्षः
त्रयो धर्मस्कन्धा इत्यादौ चतुर्थाश्रमाणां ध
र्माधारत्वं सूचितं अत एवात्र चतु)(र्थाश्र
मधर्मसद्भावे संदेह) चोदनात् उपासना
स्तुत्यर्थानमेव वाक्यमेव जैमिनिर्मन्यते
तथापवदति वीरहा वा एष देवानां योऽग्नी
नुद्वासयत इति अतोऽग्निहोत्रस्य परित्यागो
महादोष इत्युच्यते सिद्धान्तः—

॥ अनुष्ठेयं बादरायणः साम्यश्रुतेः॥

गृहस्थाश्रमवद्धाश्रमान्तरमप्यनुष्ठेयमेति भगवतो बादरायणस्य मतं भूयो धर्मस्कन्धा इति सर्वाश्रमसाम्यश्रुतेः अग्निहोत्रासनदोषो गृहस्थानां विषयत्वात् तस्याश्रमान्तरमसद्भावः ।

॥ विधिर्वा धारणवत् ॥

उपरि हि देवेभ्यो धारयतीति अप्राप्तत्वेन यथा विस्तद्वदत्रापि विधिर्भवतः अथवा जाबालश्रुतौ प्रत्यक्षेण विधिसंभवः ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजेदिति - अतश्च तुर्याश्रमधर्मसंपत्तिर्नास्ति क्रमे नियमः-- उत्सन्नाग्निरनग्निको वा यदहरेव विरजेत् तदहरेव प्रव्रजेदिति श्रुतेः जन्मान्तरसुकृतपरिपाकविशुद्धान्तःकरणे ब्रह्मचर्यादेव परिव्राज्यं भवति-

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्।
अनपाकृत्य मोक्षं तु भजमानो व्रजत्यधः॥
१२८ a. इत्यादि स्मृति निषेधात् ज्ञान विषय एवेति
सिद्धः। विरहा एव देवानां योग्ने मुमुक्षु-
रित्यग्नि त्रासन निषेधात् ब्रह्मचर्यादे
व परि व्रज्यं न गार्हस्थ्यात् परमिति के-
चित् न तया साप्ति वनी भूत्वा प्रव्रजेत्।
असन्नाग्निरनग्निको वा यदहरेव विर-
जेत् तदहरेव प्रव्रजेदित्यादि विधि
वैयर्थ्यं स्यात्। अतो ब्रह्मचर्यादेव
प्रव्रजेत् वनी भूत्वैव प्रव्रजेदिति न
निर्बन्धः। ब्रह्मचर्यादेव प्रव्रजेदिति
वदतामयमभिप्रायः। साग्निरनग्निश्चेति
द्वावेवाश्रमौ। नूतब्रह्मचारी परिव्राट् अ-
नग्नि गृहस्थो वानप्रस्थः साग्निर-
ग्नि भार्यायीध्रस्य परिव्रज्यात् ब्रह्मचर्या

त्र परिव्राज्य मतीव मुख्यमिति - अ
न्यथा श्रुति विरोधापत्तिः अतः साक्षात्
म धर्म सिद्धिरेव ·

॥ स्मृतिमात्रमुपादानादिति चेन्ना-
- पूर्वत्वात् ॥

इति होड्गीथविद्यायां रसतमस्त्वादि
दृष्टेर्विधीयते नवेति संशयः किं प्राप्तं-
उद्गीथादिषु रसतमस्त्वादि दृष्टि नविधी
यते · इति · इयमेव जुहू .. स्वर्गो लोक आ
हवनीय इतिवत् कर्मांगभूतो उद्गीथा
श्रयस्य तस्य रसतमस्त्वादि वचनं तस्म
स्मृतिमात्र मतो न विधि रुद्गीथादिषु
रसतमस्त्वादि दृष्टिरिति चेदिति पूर्वपक्ष
समाप्तिः सिद्धान्त उच्यते उद्गीथादिषु
रसतमस्त्वादि दृष्टिर्विधीयतएव ओं इ
१२८ 13 त्येदक्षरमुपासीतेति सन्निहितेन विधिना

वमुद्रादिविधिवत् उद्गीथादिविधे
रतांसं नियानात् रसतमस्त्वादिदृष्टिरेव।

॥ भावशब्दार्थ ॥

उद्गीथमुपासीतेति सिद्धिप्रत्ययशब्दार्थो
रसतमत्वादिदृष्टिर्विधीयत इति -

॥ परिप्लवार्थी इति चेन्न वि
शेषितत्वात् ॥

वेदांतेषु तत्तद्विधारंभेषु पठ्यमाना
एवा इत्याख्यायिका अधीता मताः
परिप्लवार्थं उत विध्यर्थं इति संशयः -
किं तावत्प्राप्तं परिप्लवार्थमिति अश्वमे
धयागे राजानं कुटुंबमुपवे-
श्य तत्पुरतो वैदिकान्युपाख्यानानि
अध्वर्युणा वक्तव्यानि तदिदं परि-
प्लवाख्यं कर्म पारिप्लवमाचक्षत इति
वाक्येन विहितत्वात् आख्यानानि शंसन्ती

ते तत्र विनियोगात् उपनिषदारभ्ये आख्या
यिका अ.तृ. स्तदर्था इति चेदिति पूर्वः-
पक्षः- प्रथमेऽहनि मनुर्वैवस्वतो राजा-
द्वितीयेऽहनि यमो वैवस्वतो राजा- इत्याख्या
यिकानां विशेषितत्वात्- औपनिषदाना
माख्यानानां तच्छेषत्वं न सम्भवति- उं.
निहितविद्यैकवाक्यत्वात् विद्यार्था इ
ति चाह-

॥ तथा चैकवाक्योपबन्धनात् ॥

तदा विद्याभिरेकवाक्योपसंबन्ध
नात् तथा विद्याभिरेकवाक्योपब
न्धाच्च विद्यास्तुत्यर्था एवेति -

॥ अत एव चाग्नीन्धनाद्यनपेक्षा ॥

पूर्वतोपपादितोऽन्त्याश्रमसद्भावः-
३।१२५ A तदिह आश्रमा नापेक्षास्तिनवेति संदेहः-
किं तावत्प्राप्तं विधेयत्वेन कर्मणोऽ

भिधानात्- विद्यावतामूर्ध्वरेतसामपि
विद्यांगत्वेनाश्रमाद्यनुष्ठेयमिति प्राप्ते ब्रू
मः- न तेषामाश्रमाद्यपेक्षा विद्या· यत्र
जिनो लोकमिच्छन्तः प्रव्रजन्तीत्यादि
श्रुते रेतेषां विद्यावत्त्वात् तेषामाश्रमाद्य
नपेक्षा विद्या स्वाश्रमधर्माद्यपेक्षा· ते
षामप्यपेक्षा· तेषामाश्रमादेरनुप
पन्नत्वादिति युक्तमेव·

॥ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥
पूर्वाधिकरणे निरूपितं अन्याश्रमिणां
निरुपपत्ते राश्रमाद्यनपेक्षा विद्येति —
तदिह गृहिणां विद्या तदपेक्षा नवेति सं
शयः- एवं सति गृहस्थानामपि विद्या
कर्मानपेक्षणीति प्राप्ते ब्रूमः- कर्मणो विद्यां
गत्वानुपपत्तेः अन्यथाऽङ्गत्वमस्य प्रयाजादि
वत् फलोपकारित्वं वा अवश्यं तादिवर

स्वरूपोपकारि - नाथ्यः तज्जन्यत्वे मुक्तेरपि
नित्यत्व हानिः स्यात् द्वितीये साध्य विकलो
दृष्टान्तः स्यात् - अतो न वैयाङ्गत्वं कर्मणः
तस्माद्गृहीणामपि · विद्याकर्मानुपेक्षेति ·
पूर्वः पक्षः - उच्यते · सिद्धान्तः कर्मन-
-त्वु गृहस्थेषु विद्याग्निहोत्रादि सर्वकर्मा
पेक्षा - यज्ञेन वेद्यदाति श्रुते यज्ञेन दानेने
ति श्रुतेः परमेश्वरस्य नियोग सिद्धत्वा
यथाश्वो गमन साधनभूतो स्वपरिकर
बंधापेक्षो गमने यथा विद्यापीति क
१२९· र्मणः - फलाभिसंधि रहितत्वात् तज्ज
13 न्यत्वं मोक्षफलस्य किं तु साक्षाज्ज्ञान
फलमेव मोक्षः अतो गृहस्थानां यज्ञा
दि सापेक्षा विद्या सर्वेषामाश्रमिणां
स्वपि हितकर्मापेक्षा विद्येति पुरुषमे
व ॥

॥ शमदमाद्युपेतः स्यात्तथापि -
- तु तद्विधेः तदंगो तया तेषाम -
- वश्यानुष्ठेयत्वात् ॥
शान्तो दान्त उपरतस्तितिक्षुः समा-
हितो भूत्वा आत्मन्येवात्मानं पश्ये-
त् । श्र.वा. भक्तिध्यान योगादवेहीत्या-
दिना विद्यावतां शमादि संपत्तिरुपप-
द्यते । विद्यावत्वेपि गृहिणां यज्ञादिवत्
तया तद्व्यापार व्याकुलानां तदेवग-
तिरूपा - शमदमादिसंपत्तिरुपपद्य-
ते नवेति प्राप्ते उच्यते गृहस्थोपि
विहितकर्मव्यापारोपि ज्ञि.क्रि. पितृकार्या-
दिषु कर्मसु व्यापार रहितः शमाद्युपेतः
स्यात् शान्तो दान्त इत्यादिना श्रद्धाभक्ति-
ध्यान योगादवेहीत्यादिना शमादे विहि-
तत्वात् विद्यानिष्पत्तये तदंगत्वेन तेषां

अवश्यानुष्ठेयत्वाज्ञान्तरेण। रागद्वेषादि
कषायाणां मनो विमुक्तिः शमः सर्वे
षामिन्द्रियाणां मविहित व्यापारेभ्यो नि
वृत्तो दमः-निषिद्धकाम्य कर्म व्यापारो
परमैव उपरतिः द्वन्द्वं छेकृतादिति
तिक्षा विनष्टतैश्वादि व्याक्षेपस्य चि
-त्तस्य परतत्त्वाभिमुख्यं समाधानं-
अपरमार्थ सकलेतर शास्त्र पराङ्मुखी-
१३० a. परविद्यामय परमार्थ तत्त्वोपनिषच्छ्रो
समुत्कर्ष रूपा श्रद्धा- विनिर्मुक्त सक
लेतर देवताराधना त्ति विषयः स्वपस्या-
विशिष्टाष्टाङ्ग योगेन परमशिव प-
रिचर्या मुख्यो वैदिकी क्रिया भक्तिः - परमान
न्दावेश मय महामोक्ष लक्ष्मी दर्शन द्वा
रा मुमुक्षा- ऐहिकामुष्मिक भोगापरा
ङ्मुख रूपेण वैराग्य रूपेण नित्यानित्य

नस्तु निर्धारणा कारेण च विवेकेन च वि
शिष्टस्य शमादि सम्पत्तिः - क्रमेण संभ
वति. ये विवेकादयो मुमुक्षोः पर्यन्ताः -
परधर्माः सर्वेषां साक्षात्मिणी विद्यावतां -
विशेषेणानुष्ठेया इति ।।

।। सर्वान्नानुमतिश्च प्राणा
.. त्यये तद्दर्शनात् ।।

प्राणविद्यायां पठ्यते न ह वा एवं-
विदि किंचनानन्नं भवति प्राणविद्या
निष्ठस्य सर्वान्नानुमतिः श्रोत्यते -
तदेवं युक्तानवेति संशयः - किं तावत्
प्राप्तं प्रमाणान्तर प्राप्तस्य ज्ञानस्याऽवि
धेयत्वादिह सर्वान्नानुमतिरप्राप्त..
इह विधीयते इति प्राप्ते समाधीयते
ब्रह्मविद्यानिष्ठस्यापि सर्वान्नानुमतिः
न सर्वदा किंतु प्राणात्यय एव विधीयते

अत्येक क्षके ब्रह्मविदोपि प्राणात्ययएव - उच्छिष्ट भक्षणादौ श्रुति दृश्यन्ते - अतः प्राणात्यय एव सर्वान्नानुमतिः -- विद्याव तोपीति -

॥ अबाधाश्च ॥

आहार शुद्धौ सत्वशुद्धि रित्याहारशुद्धेर बाधाया. प्राण संशय मापन्नो यो न मस्तीत्यादिना -

॥ शब्दश्चातः कामकारे ॥

१२० तस्माद्ब्राह्मणः सुरां न पिबेति
१३ कामकार निवृत्तौ शब्दस्य - अतश्चप्राण संशय एव विदुषो पि सर्वान्नानुमतिः अत्यप्यमय विहित निषिद्धाचरणेन - परमेश्वर प्रीति न स्यादिति भावः -

॥ विहितत्वाच्चाश्रमकर्मापि ॥

विद्यावतो पि गृहस्थस्या श्रमधर्म यज्ञादि

कैं यावज्जीव मग्निहोत्रं जुहोतीति विहि
तत्वात् यज्ञेन दानेनेति विध्यासाधनत्वेन
चानुष्ठेयमवगम्यते ।

॥ उप. सहकारित्वेनच ॥

विद्यावतापि तमेतं वेदानुवचनेत्यादि
ना विद्यांगतया विहितत्वाच्चानुष्ठेयमि
ति प्राप्ते सिद्धांत उच्यते-

॥ सर्वथापि तएवोभयलिंगात् ॥

उभयत्र विनियोगेन उभयाकारत्वेन प्रीत.
एव यज्ञादयः सर्वत्र प्रत्यभिज्ञानाल्लिंगात्
कर्मस्वरूपैक्येपि संयोग पृथक्त्व न्यायेन
नविरोधः सकृत्प्रयोगेपि वचनद्वयफ
लेन कर्मण एकस्यापि आकार द्वयोपपत्तेः
यथा खादिरो यूपो भवतीति खादिरं
वीर्यकामस्य यूपं कुर्यादिति इत्यत्र वचनद्वये
न नित्यत्वं काम्यत्वंच एकस्य कर्मणस्त

द्दुभयपि.. धाना यज्ञादि कर्मणः सकृत्
प्रयोगः - ततो विदुषः व्यवि दृष्टो पि विद्यो
गतया विद्याहेतु तयापि सकृदेवानुष्ठेयं
यज्ञादिकमुपपद्यतेरिति -
॥ अनभिभवं च दर्शयति ॥
धर्मेण पापमनुभवतीति प्रतिबन्धकपा
१३१. सू. पनिवर्तने विद्यायाः अनभिभवं कर्मा
नुष्ठान कार्यं च दर्शयति श्रुतिः अतः
पूर्वोक्तैर्विरोधाभावः ॥
॥ अन्तरा चापि तु तद्दृष्टेः ॥
उत्तर माश्रमिणी विद्यासंपत्तिरिव इहा
नाश्रमिणी विद्या समुपद्यते नवेति नि
यामकाभावात्संदेहः किं तावत् प्राप्नो
ति - अनाश्रमि स्नातक विधुरादिः
तस्य विद्या न संभवति चित्त शुद्धि हेतुत्वे
न विद्यायाः साधन भूतानामाश्रम धर्म

णामलाभावादिति प्राप्ते वदामः - रैक्वप्रभृतीनां
दिष्टु विद्यादर्शनादनाश्रमिणो ऽपि
ज्ञानमस्त्येवेति । यदुक्तं विद्यासाधनं
नाश्रमधर्माभावः इति तत्राह —
॥ — — स्मर्यते ॥
अतस्त्वितरस्यापि ज्ञानसंपत्तिः विशेषानु
ग्रहश्च ॥ ॥ आश्रमो हि नियम
धर्मविशेषेण विद्यानुग्रहः परिकल्प्यते ।
तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मा
नमित्यादिवचनात् —
॥ अतस्त्वितरज्ज्यायो लिङ्गा
च्च ॥
अतो नाश्रमित्वादनाश्रमित्वं ज्यायः धर्म
भूयस्त्वात् अनाश्रमी न तिष्ठेत दिनमे
कमिति स्मार्यते च आश्रमित्वमनाश्रमि
त्वादुर्बलमेव । [illegible] तथाप्यनाश्रमिणामपि

अप्यादिसाधनेन ज्ञानसंपत्तिरस्तीति -
॥ तद्भूतस्य तु नातद्भावो जैमिने
रपि । नियमात्तद्रूपाभावेभ्यः ॥
वृत्ताद्युदाहृतमभेद्य ४ -
इहान्त्याश्रमेण स्वीकृतमवरोहोऽस्ति
नवेति सन्देहः । किमुच्यते ब्रह्मचर्यंस
१३१ 13 माप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्र
जेदिति त्र्याश्रमारोहो यथा स्वे-
च्छाधीनस्तथावरोहोऽपीति । यथासि-
द्धांत नियमः । नैष्ठिकादिभूतस्य प्रच्यु
ति स्मृतिर्नैव भवति नियमात् तत्तद्रूपनिवृत्ति
भ्यः तथा नियच्छति हि अत्यन्तमाचा
र्यकुले वसादियेमिति अरण्यमि
यात् ततो न पुनरेयादिति संन्यासोद्या
मिनैव न च पुनरावर्तयेदिति । अतस्तेषां
प्रच्युतिस्मृत्यभावान्न विद्याधिकार-

जैमिनेरप्येवमेव मतं न स्मार्तो दीपं-
नावरोहो न्याययोज्ञाक्रमेणइति । आरूढ-
पतितस्य प्रायश्चित्तादिनापि विध्या
धिकारो नास्तीत्याह-

॥ न चाधिकारिकं पतनानु
मानात्तदयोगात् ॥

यथा वकीर्णिनो गर्दभ वधालंभनादिकं प्रा
यश्चित्तं तद्वदिति अधिकारादि इत्यादि
कार लक्षण प्रकीर्तं प्रायश्चित्तमितिनास्य
संभवति तस्य प्रायश्चित्ताभावकारस्म
तेः तदसंभवात् आरूढो नैष्ठिकमित्या
दयं प्रायश्चित्तं न पश्यामीति स्मृते स्तदसं
भव ॥

॥ उपपूर्व मप्येकभाव मशनव
त्तदुक्तम् ॥

उपपातकत्वात् प्रायश्चित्तमप्येके मन्व

शनादि निषेक प्रायश्चित्तवत्तदुक्तमिति ।
तदुक्तं रेफ मविरोधीति

॥ कर्तेस्तूभयथापि स्मृतेराचा-
-राच्च ॥

उपपातकत्वेपि कर्माधिकार बहिष्कृता
धृते॥ तथा स्मृतेः प्रायश्चित्तं न पश्यामि
१३२ येन शुद्धयेत् सपापकृदिति तथा शिष्ट-
अ: बहिष्करणाचरणाचारपाच्चात संस्वर्गन्या
त्यो वर्णाभिणो बरोहेन् तस्य विधाधिकार
इति-

स्य१
॥ साामेनः फलश्रुतेरिति चेः ॥
उत मुद्गीथाद्युपासनं तदनुष्ठानमिह, य
जमानस्य उत ब्रह्मामिति संशयः किं प्रा
प्तं उद्गीथाद्युपासनमिति यजमानेनानुष्ठेया
तस्यैव वीर्यवत्त्वरत्व फलश्रावणान्नर्त्वि
ज्यामिति मतमातंपरस्येति, उच्यते सिद्धांतः

॥ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥

एवं विद्वानुद्गाता ब्रूयादिति वाक्यशेषात् उद्गातुरुपासकत्वं सिद्धं भवति । अतः आर्त्विज्यमेव तदनुष्ठानमित्यौडुलोमेर्मतं कर्मस्वरूपवदङ्गोपासनानुष्ठानाय यजमानेनर्त्विजः सांगकर्मानुष्ठानाय ह्यार्त्विज्ये यजमानेन परिक्रीयते । ऋत्विक्कृतं यजमानकृतमेव फलं च तस्य स्वामिनमेवैति न विरोधः ।

॥ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥

बृहदारण्यके श्रूयते — अस्मात् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् अथ मुनिर्भवतीति बाल्यं च पाण्डित्यं च निर्विद्य मुनिरिति बभूव । निष्कृत्यपर्यं

निर्णय स्वरूपं पांडित्य निर्विशेषेण संविद्य
बाल्यत्वेन रागद्वेषादि रहितत्वात् बाल्यस्य
दर्शनाबाह्यान्तरेण धर्मेण तिष्ठेतः पांडि
१२२.13 त्यं बाल्ये निर्वेद्यं संपाद्याथ मुनिरिति-
तद्वत् बाल्यवन्मौनं च विधीयते नवेति
संशये मुनिरित्यत्र भवतीत्यादिना विधे
प्रसंगाभावान्न विधीयत इति प्राप्ते विधी-
यते विद्यावतोहि यज्ञादिवत् पांडित्यबा
ल्ययोः तृतीयं सहकार्यन्तरं मौनं विधी-
यत एव प्रकृष्ट मनन शील मुनिशब्द
द्विद्याभ्यास रूपमिदं मपयुक्तेति भाव
दिति विद्याभ्यासे दृति पदानुवृत्या-
विधेरित्युपपद्यते ततो मनन विधे
रप्युपपद्यते ततो मनन विधि स्संभवति.
विद्यावत इति—
॥कृत्स्नभावात्तु गृहिणोपसंहारः॥

इह पुरस्तात् वर्ण्यमाणा विद्या उत विशेषः
कोस्तीति सं शयः - ब्रह्मचारिणो वेदाभ्या
साचार्य परवशत्वात् गृहस्थस्य कुटु
म्ब भरणार्थायासेन नीतयोर्नि वृत्ति
रूपे ज्ञाने सं भवति वेदान्त विज्ञानस्यानि
श्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वा
द्धि वेदान्तज्ञानवती संन्यास योगश्राव
णाश्रमाश्रम इति ध्यान विद्यो दर्शनाद्
त्या अस्याश्रमिणामेव ज्ञानध्यानेनापरेषामि
ति पूर्वः पक्षः - सर्वेषामप्याश्रमिषु -
विद्यासंभवत्येव छान्दोग्ये हि - समार-
भ्य कुटुंबव इत्यारभ्य स खल्वेवं वर्तय
न् यावदायुषमेकैकमिति कृत्स्नाश्र
मेषु विद्यासद्भावाद्गृहिण उपसंहारपा
देशार्थः - अतः सर्वेषामाश्रमिणां -
१२२३/४. विद्यास्त्येव फलत्यागः संन्यासः यतिर्हि

नाम जितेन्द्रियत्वं सर्वमिदं समानमेव— —
द्विरुक्ति ।।— — ...... दितरेषामुप्यु
पदेशात् ।।
अथर्वशिरसि श्रूयते शुक्लेत्वा. हेतुजा
लस्य मूलं संचिन्त्या. स्वापयित्वा तु रुद्रे
रुद्रंरुद्रं रूपा. एकत्वमाहुः रुद्रे शाश्वत–
पुराणमित्यत्र मूर्जं तथा लोकेत मूलं पत
त्पाशुपतमिति· तत्पाशुपत वृत्तं. अथ
र्वशिरसि सिद्धं पुराणेषु प्रसिद्धमेव· द्वे.
तिष्ठानां विद्याप्राप्ति रूप मुक्तिरूप संभवति
नवेति संशयः--किं प्राप्तं- आश्रमेषु नत्व
भावात्· अवस्थानादिदर्शनात् पुत्राद्यर्थं
च कृष्णादिभिरनुष्ठितत्वात् अवान्तरफ
लसिद्धमंतरेण तेषां नमोक्ष सिद्धिरिति
प्राप्ते ब्रूमः– तेषां मसैत्र व्रतधारिणो
मुक्तिरेव फलं संभवति· विद्यासंपत्ति-

स्यं परिशुद्धात्मनो रुद्रस्यानु~~...~~ सं
बन्धानुरूपा – मुनिधर्मवादितरेषामपि भिक्षा
चर्यादि शमदमनादि जामपर धर्माणी पा
शुपताख्ये व्रते प्युपदेशांतं निक्षा नामपे-
मोक्षः फलं रुद्रस्यैकत्वमाहः – रुद्री
शाङ्कुवित्तीवै पुराण मिषमूर्जं तपसा निय-
च्छत तमृतमेतत्पाशुपतं अग्निरि
त्यादिना भस्मग्रहीत्वा. विड्ज्या
ढानि संस्पृशेत् तस्मात् व्रतमेत
त् पाशुपतं पाशविमोक्षयेति. पाशाबि
१३३: 13 च्छेदरूपस्य मोक्षफलस्य. अतः संबन्धो
वगम्यते. अतः पाशुपत[illegible]तन्त्रतत्वारि
णो यावदापूर्व मुक्तिरेवफलं – यदुक्तमा
त शामेषुनं नं भोवइति तत्राह –
॥ अनाविपूर्वं नन्वयात् ॥
आशमांतरे ~~...~~ या नाविपूर्वं न

किं
व्यक्तीभवन्नपि पाशुपताश्रमस्तु ब्रह्मवि
द्याध्ययन ब्रह्मचर्यादि यदि धर्मसमन्व
यात् अस्याश्रमस्य शैवीय मोक्षाश्रमभेदः -
स्वतन्त्रः परमशिव प्राप्ति हेतु यावच्छरीरं
वा द्वादशाब्दमथवा इत्यादिना श्रुतिका
पतिकत्वेनास्य विकल्पः अस्त्यौतिकमप
वर्ग हेतुः तद्द्वय भोग हेतुरिति श्रुतिरेवं
भुक्तिमुक्तिहेतुत्वयोर्वो भयात्मक मिदंवा
तं । शिवप्रसादकरं विदध्याति यथा तु ना
स्या प्रामाण्योपपत्तो भवति तथा हि योजनी
यं -

॥ ऐहिकप्रस्तुते प्रतिबन्धे तद्द
र्शनात् ॥

उक्त कर्मोपासन निष्ठाना मैहिकं मुक्तिफ
लं उत जन्मान्तरे वा भवतीति संशये
विचार्यते इहैव जन्मनि मुक्तिर्जायतामि

स्याग्नेसंबन्धं पुरुष उपासने प्रवर्तते जन्मा
न्मांतर इति, कः प्रयोजनस्य विलंबन
मीहते तस्मादैहिकमेव मुक्ति फलंभव
तिं यदिनचेत् कदाचिदपि नभवतीति
प्राप्ते वक्ष्यमः- प्रबलजन्मांतर प्रतिब
न्धाभावे परोपासन फल मिहजन्म
नि भवति 'यथाभ्युदयफलं स्वसाधनभूत
१२४ कृष्णकर्मानन्तरमेव संपद्यत इति निय
माभावः किंतु प्रतिबन्धसद्भावे जन्मां
तरे भवतीति' जन्मान्तर श्रवणादिबले
न तत्फल दर्शनात् अतो नैहिकत्वे मु
क्ति फलस्य नियम इति -

॥ एवं मुक्तिफला नियमः—
—तदवस्थावधृतेः .... ॥

केवल कर्मफलाद्युभयं न मुक्तिफल
मपि प्रबलकर्मांतर प्रतिबन्धाभावे

सैभवतीति निरूपितं एवं न्यायेन कर्मफ
लवत् ज्ञानफलस्यापि सातिशयत्वादिनि
यमोस्ति ततो संशयः- किं तावत्प्राप्तं क
र्मफलवन्मुक्तिफलमपि सातिशयवत्:-
ज्योतिष्टोमेन स्वर्गकामो यजेत वाजपेयेन
स्वाराज्य काम इत्यादिभिः कर्मफलस्य
सातिशयत्वमवगम्यते- तद्वदुपासनफल
स्यापि प्राप्ते अभिधीयते कर्मफलस्यैव ज्ञा
नोपासनफलस्य सातिशयत्वादिति नि
यमः- ब्रह्मस्वरूपावस्थापत्ते फला
वाप्तेः सर्वेषामपि विद्यावतां ब्रह्मस्व
रूपस्यैकत्वान्न वैषम्यं तथा अता
पि उपासन तारतम्यां मुक्तिरूपस्य
तत्फलस्य तारतम्यमिति न वाच्यं- उपा
सनकर्मणां मुक्तिफलव्यतिरेकेण फ
लीतराभावात् ब्रह्मण एकत्वेन रूपस्य

मुक्तिफलस्य वैकल्यमेव अतो न मोक्ष
फले वैषम्यमिति।

इति
श्रीकण्ठशिवाचार्यविरचिते ब्रह्म
मीमांसाभाष्ये तृतीयाध्यायः
समाप्तः॥

१३५.
१३. ॥ आवृत्तिरसकृदुपदेशात्॥
विचारितः... खलूपासको — — — रो
पासनभेदाश्रमादि व्यवस्थापकः —
— तृतीयोध्यायः।
पुनरिह चतुर्थाध्याये प्रथमे पादे उ.
पासन अ उपासन प्रकारः- द्वितीये
जीवस्योपाद्विकस्योत्क्रान्ति दशा. तृ
तीये चिरादि गतिः चतुर्थे ब्रह्मप्राप्त
स्याबं स्थाचेति निरूप्यते प्रथमाद्ये

करणेत्व ब्रह्मविदाप्नोतीति परं- ज्ञात्वा शिवं शा
न्तिमत्यन्तमेति इत्यादिषु मोक्षसाधनतयाभि
हित मुपासन ज्ञानं सकृदनुसंधेयं उत आव
र्तनीयमिति संशयः किं प्राप्तं सकृत्कृत
कृते कृतस्शास्त्रार्थ इति प्रयाजादिवत्सकृद
नुष्ठानेप्ये वेदनोपासनस्य सिद्धत्वामिति-
प्राप्ते ब्रूमः ब्रह्मविदाप्नोति परमित्यादिषु
मोक्षसाधनं वेदन मसकृदावृत्तं वि
द्यात् उपादुपासीतेति विद्योपास्ते
रुपक्रमोपसंहारयोंर्थतेरेकत्वोपदेशा
त्. यदुक्तं प्रयाजादिवदिति. तत्स्या
द- फलत्वात्तत्सकृदनुष्ठान प्राप्तिः
वेदनफलस्य ब्रह्मसाक्षात्काररूपत्वेन दृष्ट
कारत्वादफलोदयमावृत्ति रवघातादि
वदिति (~~लिङ्गाच्च : अस्मिन् विषये लिङ्ग~~
~~मस्ति . श्वेतकेतवे इवरज्ञानात्~~) =

॥ लिङ्गाच्च ॥

अस्मिन् विषये लिङ्गमस्ति क्षेत्रज्ञस्ये
श्वरज्ञानात् विशुद्धिः परमात्मना, ऐक्यमहं
स्वप्नधीशाम्यं विद्यान्तु पुरुषः परमेश्व्या
दिषु अतस्य ब्रह्मोपासना वृत्तिरिति -
॥ आत्मेति तूपगच्छन्ते -
- ग्राहयन्तिच ॥

पूर्वत्र ब्रह्मण उपासनमावृत्तिलक्षणम
१३५ भिहितं तद्वात्मन् त्वद्भावेनोपासनमुत
ब्र. तदन्यान्तरत्वेनेति विचारः - पूर्वपक्षतिबि
श्वाधिकोरुद्रो महर्षिः, अधिकं तु भेद
निर्देशात् इत्यादिषु श्रुतिषु स्तोमेषु प्रा
त्यगात्मनः परः, पत्युः परब्रह्मणोऽर्थान्त
रत्वेन निरूपितत्वात् सर्वज्ञत्वादिना कर्तृ
त्वादिना ब्रह्मभावो जीवस्य न संघटते ब्र
ह्मोपासनं जीवस्य तद्भिन्नत्वेन युज्यत इति

पूर्वं प्राप्ते अत्रोच्यते सिद्धान्तः । जीवाधिक
मेव शिवत्वाख्यं परं ब्रह्म, तत्राप्युपासितारः
त्वं वा अहमस्मि देवते अहं वै त्वमसि इत्या-
त्मन्येवावगच्छन्ति । उपासितुरन्तरत्वेऽपि
तान तानुपासितुं न.. नुगृह्णन्ति स्वस्वरू
पतया ग्राहयन्ति च । परानपि शिष्यान् तत्त्व
मसीत्यादिना । निरतिशय दुःखात्मक निखि
लपाश संबन्धोच्छेदो । निरवधिक परमा
नन्दमय निष्कलंक शिवत्व प्राप्तिर्हि मुक्तिः । हि
पशुत्व निवृत्तिः शिवत्व प्राप्तिरिहोक्तं भ
वति । कुतो शिवत्व प्राप्तिरात्मनः पशुत्व
निवृत्तिमन्तरेण न संभवति । पशुत्व निवृत्ति
श्च न तद्भाव भावनां विना । अतो निरन्त
र शिवोऽहमस्मीति भावना प्रवाहेन... शिथि
लित पाशतया पगतपशुभाव उपासकः शि
व एव भवति निरस्त समस्तदोष कलंक

१३८ टीका: निरतिशयमंगलास्पदं शिवतत्वं प-
रब्रह्म, तदेव तद्भावनया उपास्यमस्य भवती-
ति तदन्यस्य मुमुक्षुध्येयत्वं निषिध्यते
ईशः शिव एको ध्येयः शिवंकरः सर्वम-
न्यत्परित्यज्य इत्यादिश्रुतिषु निवृत्त-
पाशलक्षणादिदेहाभिमानमयपशुभावस्य-
निरतिशयस्वरूपानन्दसाक्षिस्वप्रकाशशि-
वस्वरूपपरमाहंभावापत्तिरिह मुक्तिरिति
तत्पर्यायः- ब्रह्मभावेनोपासनकमुमु-
पासस्य मुक्तिकरं- अन्यथा संसाराद-
निवृत्तिरिति. विशेषमाह-

॥ न प्रतीके न हि सः॥

मनो ब्रह्मेत्युपासीतेत्यादिषु मनःप्रभृति-
षूपासनमवगम्यते तदिह पूर्वन्यायेन
तेष्वपि तद्भावेनोपासनमुत भिन्नत्वेनेति
संशयः- किमुक्तं भवति- मनो ब्रह्मेत्युपा

स.त्रा. दिव्यो ब्रह्मेत्यादेश इत्यादिना सिद्धे
षु प्रतीकोपासनेषु ब्रह्मविद्यासंस्कृतं मनः
प्रभृतिकमुपास्यमवगम्यते तत्र प्रतीक
मुपासकेन ब्रह्मात्मकतया तदुपासने नको
ऽपि विरोध इति । तदुच्यते नात्मग्रहणं
प्रतीकेषु तेषु न परं ब्रह्म, किंतु ब्रह्मदृष्ट्या
मनः प्रभृतिकमुपास्यमिति तत्र मनआदि
विशिष्टस्य ब्रह्मण एवोपास्यत्वेऽपि । मन-
आनंदौ ब्रह्मगुणत्वाभावाद्विकारत्वेन तद्वि
शिष्टत्वेन तद्विशिष्टे ब्रह्मणि नात्मग्रहणं
136. किंतु सत्य ~~सत्य~~ संकल्पत्वादि विशिष्टे -
अन्यथा ऽमनसो विकारास्पदं स्यादिति ।
अतः प्रतीकेनात्मग्रहणमुपासकानां न
तत्रा, परमेश्वरः साक्षादुपास्य इति -
...... ब्रह्मदृष्टिरिति संदिह्यते - तत्रासति
पूर्वमिदं प्राप्तं भवति मनो ब्रह्मेत्युपास्ते

नेत्यत्र मनोदृष्टिम् ब्रह्मणि कृत्वा ब्रह्मोपास-
नीयं. तस्यैव फलदातृत्वादिति. अतोऽभ्यो-
च्यते विश्वाधिको रुद्र इत्यादिषु ब्रह्मण उ-
त्कृष्टत्वावगमात् तद्दृष्टिरेव निकृष्टत्वा-
द्यो. राजदृष्टिं कृत्वा राजवत्तदुपास्यते.
नच भृत्यदृष्टिं कृत्वा राजनीतिमुपास्यते
केनचिदपि. इदमेव हि परमौचित्यं यदुत्कृ-
ष्टं वस्तु तदेव सर्वं नमेति. तथाहि परं
ब्रह्म सर्वोत्कृष्टतया सर्वनमस्काराणां वि-
षयोऽवगम्यते एतं सत्यं परं ब्रह्म पुरुषं
कृष्णपिङ्गलं ऊर्ध्वरेतं विरूपाक्षं वि-
श्वरूपाय वै नमो नमः इति. वाङ्मनस विप-
र्याय रहितं परिशयानन्तं ऋतमाख्या
ब्रह्माकारतया कृष्णपिङ्गलं विरूपाक्षं
त्रिलोचनं मूर्ध्वज्वलनरेतस्कं अपरब्र-
ह्म विरूपाय. तस्यैव नमः नमनं-

:

नाऽन्यस्मै कुत्रचिदिति । अस्य हि परब्रह्म
उत्कृष्टतया नमस्कारलक्षणत्वं । तथा तस्मै
नमस्तत्त्विर इत्यस्य शिरोमात्रात्मत्वनि
रूपणे इत्यादि रूपाणां विष्ण्वादीनां —
पार्षित्वेन सर्वोत्कृष्टत्वात् अस्य प्रथ
म. शिरोरूपत्व नमस्कारलक्षणकमाभि
१२६ हितं । म. वसाने त्वं भूतानामधिपतिरसि
१० त्वं भूतानां श्रेष्ठोऽसि तस्यैव समुद्भूतवि
षयमाधिपत्यं श्रेष्ठत्वमुक्त्वा नमस्ते नम —
स्सर्वं ते नमस्सकलभूतोत्कृष्टतासिद्धं.
अखिलनमस्कारावसान भूमित्वमुक्तं स
र्वत्र च नमस्ते रुद्र मन्यव इत्यादिषु सर्वोत्कृ
ष्टतया पुनः पुनरस्मै हि नमः प्रयुज्यते
देव.[illegible] यादिना हि लोके श्रेष्ठं नमन्ति त
तस्सर्व नमस्कारविषयतया सर्वोत्कृष्टमु
मासहितं विरूपाक्षं ईश्वरशब्दैकविषय

भूतं परिब्रह्म. अस्य सर्वोत्कृष्टस्य सर्वनम
स्कारस्य व्याप्ति दृष्ट्या सर्वेषां मन आदि
त्यादीनां प्रतीकानां उपास्यत्वमिति - अत
एव. ब्रह्मभुवः ब्रह्मपतिभ्यश्च वो नम इत्यादिषु
सूत्रादिषु स्थितं निकृष्टेष्वपि सर्वोत्कृष्टब्र
ह्म व्याप्ति दृष्ट्या स्तुतिर्नमः प्रयुक्ते. तदु
त्कृष्ट संबन्धात् निकृष्टे षूपचारं दर्श-
नात् विवक्षित ब्रह्म दृष्ट्या मनः प्रभृती
नामुपास्यत्वं सिद्धं अन्यथा ब्रह्मणोप्यनु
पास्यत्वं स्यादिति

॥ आदित्यादि मतयश्चाङ्ग उप-
- पत्तेः ॥

पूर्वत्त ब्रह्मण उत्कृष्टत्वादादित्यादिषु तद्दृष्टि
र् उपासने हि हि ता य एवासौ तपति तमुद्गी
थ. मुपासीतेत्यादिषु अंगोपासनेषु उद्गी
थादि दृष्टि रादित्यादिषु कार्या उक्त विपर्या

सेनेति संशयः किं तावत्प्राप्तं कर्माङ्गत्वेनो
द्गीथादीनामादित्यादीनां ब्रह्मरूपत्वाविशे
षादनियम इति प्राप्ते ब्रूमः — आदित्यादे
236 A रुत्कृष्टत्वादङ्गे उद्गीथादौ तद्दृष्टिः कार्या
तद्दृष्टिसंस्कृतस्य कर्मणः फलातिशयवत्त्वा
त् ब्रह्मत्वे समाने उद्गीथादिक्रिया चेतना
व्यतिरिक्तस्वभावादादित्यादेः फलसाध
नत्वादादित्यादिदृष्टेः अङ्गेष्विति निर्णयः —

॥ उपासीनस्संभवात् ॥

उपपादितमुपासनमुपासने व्यवस्थानं
तदिहोपासनस्यासनादिनियमोऽस्ति नवे
ति संशयः - तत्रासति क्वचिदप्यासीन
उपासीतेति नियमाश्रवणाच्चित्तव्यापार-
स्य सर्वावस्थायामपि संभवाद्विरोधाभावा
दासनानियमः एवोपासकस्येति पूर्वः
पक्षः — सिद्धांत उच्यते - आसीन एवक

ह्रो पासीत तस्यै का गयादि संभवा दस्ति हि नियम श्रुतिरपि विक्त देशे तु सुखासनस्थः शुचिः समग्रीवशिरः अत्याश्रमस्थ सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य हृत्पुंडरीके विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम नन्त मव्यक्त मनन्तरूपं शिवं प्रशान्तम मृतं ब्रह्मयोनिं तथा दि मध्यान्तविहीन मेकं विभुं चिदानंद मरूप मद्भुतं उमा सहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकं ठं प्रशान्तं ध्यात्वा मुनिर्गच्छति भूतयो निं समस्त साक्षिं तमसः परस्तात् इ ति कैवल्योपनिषदि - अत आसीनश्चो पासीतेति —

॥ ध्यानाच्च ॥

कारणेतु ध्येयः सर्वैश्वर्यसंपन्नः स

१३० वेश्वरं शंभुं हृदकाश मध्ये आत्मानमरणिं कृत्वा प्रणवमोत्तरारणिं - ध्याननिर्मथनाद्देव पापं दहति पण्डितः इत्यादि श्रुतौ पाश विच्छेद कारणस्य उपासनस्य ध्यानरूपता वगमात् ध्यानं सिद्धये चासन नियमः -

॥ अचलत्वं चापेक्ष्य ॥

पृथिव्यादेरचलत्वमपेक्ष्य ध्यायतीव पृथिवी: प्रयोगात् मनसो धारणा संततिरासीनस्यैव .

॥ स्मरन्ति च ॥

आसनकाले मासन नियमादि स्मरणाच्च तदासीन एव ब्रह्मोपासीतेति । सिद्धं -

॥ यत्रैकाग्रता तत्राविशेषात् ॥

उक्तमुपासकस्यासन नियमः तद्देशादि नियमोस्ति न वेति ~~संशयः~~ सति इते तथा सर्वदेशादि नियमोस्तीति युज्यते -

नियतत्व

तथा-चोदिते कर्मणि बहुत्वेन वक्ष्यमाणः प्राच्यां दिशीति दिङ्-नियमः. प्राचीनप्रवणे वैश्वदेवेन यजेतेति देशनियमः. अपराह्णे पिण्डपितृयज्ञेन चरतीति कालनियमः तथात्रापि-चोदिते तत्राविशेषात् उपासने देशादिनियमः प्राप्त इति पूर्वपक्षः- उपासने देशादिनियमो नास्तीति सिद्धान्तः. तथाहि एकाग्र्यं हि ध्यानस्य प्रधानसाधनं नहि तस्य दिगाद्यपेक्षा- रागद्वेषादिकौलुष्यं नास्ति- तत्राहि मनस एकाग्र्यं भवति. सामान्येन विविक्तदेशे- सुखासनस्थ इति श्रवणात् इनं तं--- दिक्जपादिकर्मविषयः नध्यानमात्रविषयः-

१२८।४. विषयः- तत्रापि एकाग्र्ये यदि मुख्यतमं भवति तत एकाग्र्यमात्रसाधनस्य ध्यानरूपोपासनस्य देशादिनियमाभावः—

॥ आप्रयाणात्तत्रापि हि दृष्टम् ॥
पूर्वत्र ब्रह्मोपासनायां देशकालाद्यविषय
त्वमुक्तं पुनरिह तस्य उपसंहार नियमोस्ति
नवेति विचारे — यावदिच्छान्तावदुपासका
नां कर्तव्या अन्यथा तदुपसंहार इति पू
र्वपक्षे सिद्धान्ते नियामकाभावात् इ
त्याभिधीयते — आप्रयाणा दहरह उपासना
कार्या कदाचिदपि तदुपसंहारः अहरह
रेव निरन्तरं सम्यगनुलोकमेतीति सरवलवैवं
वर्तयन् यावदायुषमित्यादौ प्रयाणादुपा
सनश्रवणात् ब्रह्मस्वरूपत्वाद्धि ब्रह्मभाव
नायामष्टपे विच्छेदो न युक्तः एव स्वात्मत
या नैरन्तर्येण ब्रह्मणि भाविते हि तद्रूपमु
पासके प्रकाशते सर्वज्ञं नित्यतृप्तं स्व
यं प्रकाशः स्वतन्त्र शुक्रशरीरमनन्तश
क्तिपरब्रह्म नैरन्तर्येण भावनीयं - यत्स्वरूप

प्रकाशयेति — तस्मादुच्यते ब्रह्मस्वरूपमु
पासकेभ्यः प्रकाशयतीति । या ते रुद्र शिवा त
नूरघोरा पापकाशिनी तया नस्तनुवा
शंतमया गिरिशंताभिचाकशीहि । इति ।
अनादिमान प्रमाणवाह सिद्धं मध्यात्मादि
भेदं असंख्यं संसाररूपं द्रवयत्युपास
कानामिति रुद्र इत्युच्यते । परब्रह्म शि-
वः तस्यामंत्रणं रुद्रेति - हे रुद्र परमेश्व
र । या ते तनूः मूर्तिः शिवा नित्यसिद्धा-
१३९. B. अपहत पाप्मादित्वेन परमविशुद्धा परम
मङ्गलमयी परममंगलरूपा । अघोरा-
शिवयोगेनैव सर्वद्दृश्यमा । अपापका
शिनी पापग्रहणस्यापलक्षणत्वात् ज्ञा
नाग्निदग्ध निखिल पुण्यपापा उभयपा
पा । इत्युच्यते मुक्तात्मानं तेषु प्रकाश
मानत्वात् अपापकाशिनीत्युक्ता ईदृशी

ध्या तनु॰ तथा श्रुतिमपि सपश्यो ब्रह्मणआ
नन्दं इत्यादि श्रुति सिद्ध निरतिशयानन्द
लक्षणतया तन्वा· नः॰ अस्माकमपि·—
संसारनिमित्तं पुण्यपापं चयमपनोद्य-
स्वरूपतया- साक्षात्- इत्यतीव प्रकाश
स्वेति प्रार्थनेयं – उपासकानां मत उपासकानां आ
नामात्मनि ब्रह्मस्वरूपस्य प्रकाशनात्॥
तत्कारभूता ब्रह्मभावना नैरंतर्येण यावद्दा
युषं कर्तव्या· नविच्छेद्या कदाचिदपि – इ
ति· · ·

॥तदधिगम उत्तरपूर्वयो ..... रश्लेष
विनाशौ तद्व्यपदेशात्॥

पूर्वत्त प्रकरणात्पितानामुपासकानाम
त्मनि ब्रह्मस्वरूपं प्रकाशते इति सोपप
त्तिकमुपपादितं, तदिहोपकृत्स्य पापक्ष
योस्ति नवेति संशयः॰ किं तत्प्राप्तं उपासक

स्यापि आगामी नरेण पापक्षयो न भवति -
नाभुक्तं क्षीयते कल्पकोटिशतैरपीति -
तद्भवगमात् भोगाय शरीरापत्तौ पुनरपि
कर्मापत्तिरिति। न मोक्षावसर इत्येव प्राप्ते-
ब्रूमः - क्षीयते हि पापं कर्मोपासकानामिति
१३९ सू. कर्मं उपासते॥ प्रारब्धं तत्सामर्थ्यादेव
पूर्वकृताघनाशः उत्तरकृताश्लेषश्च भव
ति। तथा हि व्यपदिश्यते यथैषीका तूल
मग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः -
पूयंते यथा पुष्करपलाश आपो
न श्लिष्यंत इति - अतो ह्युपासकस्य पूर्वो
त्तरयोर्नि श्लेषविनाशौ भवति। यदुक्तं
नाभुक्तं क्षीयत इति - तस्याज्ञानविषय
त्वादविरोधः।

॥ इतरस्याप्येवमसंश्लेषः पा
ते तु ॥

बिदुषः पापलेपो न भवतीति । पुनरिहत द्विरोधि पुण्यलेपोस्ति नवेति ~~संशयः~~ विचारः. किंप्राप्यते विद्याविरोधिनः पापस्य क्षयो युक्तः, पुण्यस्य क्षयो बिदुषो नयुज्यते तस्य विद्यांगत्वेनानुवर्तमानत्वादित्येवं प्राप्ते निरूप्यते. विदुषो हि पुण्यस्यापि मोक्ष विरोधित्वेना निष्फलसाम्यात् अश्लेष विनाशौ. विद्यानुगुणस्य आरोग्यादिफलस्य पुण्यस्य शरीरपाते लयः. विद्याङ्गकर्मणोपि फलादि संबन्धाभावान्नाश्लेषः. अतो विदुषः पुण्यलेपोपि नास्तीति निर्णयः.

॥ ओं.. नारब्धकार्ये एवतु पूर्वे- तदवधेः ॥

पूर्वत्र बिदुषः पुण्यपापयो - उत्तर पूर्वयोः श्लेष बिनाशौ निरूपितौ - तदिह

प्रारब्धकार्ययोः नयोः स्थितिरस्ति नवेति संशयः - तया सति विद्यादेकृतेः पूर्वारब्धयोरविनाश इति प्राप्ते उच्यते सिद्धान्तः-

१३९ 13 विद्याकृत पूर्वकृते पुण्यपाप फलदानाय प्रवृत्ते एव विनश्यत स्तस्य तावदेवचिर यावन्न विमोक्ष्ये इति शरीरपात [illegible] विधि श्रुतेः अतः प्रारब्धयोरपि लय एव

॥ अग्निहोत्रादितु तत्कार्यायैव तु
तद्दर्शनात् ॥

पूर्वत्र विदुषः पुण्यपापाश्लेष विनाशौ - निरूपितौ ; ब्रह्मोपमुपासना वृत्तिरप्युपपादिता तस्यापि पुनरग्निहोत्राद्यनुष्ठानमपि यावच्छरीरपात मनुवर्तते उतमध्येयोच्छिद्यते वेति विचारः किं प्राप्नोति अग्निहोत्रादि यत्कर्म तदपि विदुषा प्राणी

तिक: नानुष्ठेयं क्रियमाणेपि नाशाद्युपरमात्
अप्रयोजनं कस्य मनः प्रवर्तते. अतो नानुष्ठे
यं नियमेनेति प्राप्ते ब्रूमः- . अग्निहोत्रादि
भीप्राणां तु विदुषानुष्ठेयं विद्याकार्यैव
तन्माहि दृश्यते तमेवं वेदानुवचनेन
ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा-
-नाशकेनेत्यादि अतो वेदानुवचनं वेदाभ्या
सः परमेश्वरप्राप्तिसाधनं परमज्ञानहेतूनां
वेदमन्त्राणां अध्यात्मवादिनां जपावृत्तिरिति.
तथा जाबालोपनिषदि- अथैनं ब्रह्मचा
रिण ऊचुः भगवन् जप्येनामृतत्वं ब्रूहि.
सहोवाच याज्ञवल्क्यः शतरुद्रीयेणेति-
एतानि अमृतस्य नामधेयानि. एतैर्हवा
अमृतो भवतीति- कैवल्योपनिषदि-.
१४०A. यः शतरुद्रीयं ब्राह्मणो नित्यमधीयते सो-
ग्निपूतो भवति वायुपूतो भवति ब्रह्महत्यायाः

पूतो भवति । अन्त्याश्रमे सकृद्वा जपेन्न प
रमं ज्ञानं प्राप्नोति । संसारार्णव नाशनमि
ति । तदहं शतरुद्रीयं संज्ञकानां मन्त्रा
णामभ्यासात् संसार नाशनस्य परमज्ञा
नस्य प्राप्तिः तस्य तद्विरोधि पापक्षयान्व
मवगम्यते । एतानि वा अमृतस्य नामधे
यानीति । अमृतस्यानादिमुक्तस्य शिव
स्य नामधेयत्वाद्धेतोः शतरुद्रीयस्य
जपात् सर्वार्थ साधनता प्रतीयते । अतश्च प
रमेश्वरस्य शिवादि नामधेयानामभ्यासो
पि विद्याविरोधि पापक्षयहेतुः । तथा
मुण्डकोपनिषत् श्रूयते । अपि वा यश्चण्डा
लः शिव इति वाचं वदेत् तेन सह संवसेत्
सह भुञ्जीतेति । शिव शब्दस्य बहुबोध
कस्य समुच्चारण मात्रेणापि शुद्रस्य
पातकिनः परमविशुद्धि प्राप्तिरवगम्यते ।

आत्मानमरणिं कृत्वा प्रणवञ्चोत्तरारणिम्।
ध्याननिर्मथनादेव पापं दहति पण्डितः-
-इत्यादिषु प्रणवाद्यभ्यासस्य पापच्छेद
हेतुत्वमेव गम्यत एव. एवमन्यत्रापि द्रष्टव्यं
अतः परममैत्राणां परमेश्वरप्रसाणं प्रा
पश्चयोत्पादनद्वारा परमज्ञानहेतुत्वेनमो
क्षसाधनत्वावगमात् अभ्यासः कर्तव्यः
विद्यावतोपि यावत्कालं - एवमग्निहो
१४० 13 त्रादीनामपि अज्ञानां परमेश्वरसमर्पित-
फलानां तदाज्ञासिद्धत्वात् तदाराधन
रूपत्वादभ्यासः कार्यः एवं ज्ञानादी
नामपि - तस्माद्विदुषापि - विद्यानिष्प
त्तिकार्यीय अग्निहोत्रादीनामनुष्ठान
मपि - कर्मतपो, जप, ध्यान. ज्ञान रूपमी
श्वरोपासनं कर्माग्निहोत्रादिकं तप - -
तनियमः कायशोषणं वा. जपो पूर्वोक्त-

प्रणवाद्यभ्यासः एतेषां पापक्षोभनद्वा
रा मोक्षहेतुत्वं ध्यानज्ञानयोस्साक्षा
त् ब्रह्मरूपापत्ति हेतुत्वापेक्ष साध
नत्वं अतस्सर्वेषामनुष्ठाने विरोधा
भावः

॥ अतोन्यापि ह्येकेषामुभ
योः॥

तस्य सुहृदः साधुकृत्यां द्विषतः पा
पकृत्यामिति वचनस्य श्रोत्रियेष्वनिहोत्रादना
दिकाल प्रवृत्ता साधुकृत्या पापलप
तिबन्ध फलात् तत्तद्विद्यानुगुण फला
प्तिसम्बन्धादेति पूर्वोत्तरयोः कृतयो
रप्यस्त्येव विषयः

॥ यदेव विद्ययेति हि॥

यदेव विद्यया करोतीत्यत्र फलप्र
तिबन्धोस्तीत्यवगम्यते अतः प्रतिब

न्योऽन्ये संप चाग्निहोत्रादिकं मनुष्ठेयमि
ति ।

॥ भोगेनत्वितरे क्षपयित्वा संप
द्यंते ॥

इह विद्यावतामधिकारपदेस्थितानां
तः व्यतिरेकेण मुक्तिफलमस्ति नवेति
चिंतायामिदं प्राप्तं भवति - प्रारब्ध
भोगाय बहुजन्मस्वीकारे पूर्वविद्यायां
लुप्तायां यत्क्रियते तदपि फलभोग
१४१ अ. हेतुः भवति - अतो जन्मपरंपरायाः
संभवः - तेषां कथं मुक्तिरिति प्राप्ते ब्रूमः
प्रारब्धकर्म स्वफलभोजायेत्त्वमात्रे
ण पूर्वार्जितविद्यालोपहेतुत्वात् तत्फ
लस्य भोगावसाने तेषां मुक्तिरिव का
रणाभावाज्जन्मपरंपरासु प्राप्तेष्व
वस्थानवत् मरणव्यवस्थानेन तेषां—

विद्यालोच हेतुरिति ।

इति
श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये चतुर्थाध्यायस्य प्रथमः पादः ॥

॥ वाङ्मनसि दर्शना च्छब्दाच्च ॥
॥ अत एव सर्वाण्यनु ॥ (सूत्रे)

पूर्वोक्तमुपासकस्योपासनं व्यवस्थानेह पादेस्य शरीरादुत्क्रान्तिं निरूपयते - तद्दिहास्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते इत्यादिषु प्रयतो वागादीनां मनसि लयोवगम्यते - स्वार्थमुपपन्नो नवेति संशयः किं प्राप्तः कार्यस्योपादाने लयो दृश्यते मृद्घटादौ व्याप्ति दर्शनान ब्रह्मोपासनं तु

मनः अतस्तस्मिन्नेतेषां लय इति प्राप्ते
निरुच्यते अस्य सोम्य पुरुषस्य प्रय
तो वाङ्मनसि संपद्यते इति न्याये म
नसि संपद्यमानेति वृत्ति वचनात् क्रांतो
मनसः प्रागेव वागादीनां परमं दृ
ष्ट्वा वाङ् मनसि प्रथमं संपद्यते तु
तं स्वर्वाणीन्द्रियाणि मनसि संपद्यन्ते
यदुक्तं यदुक्तं उपादानलय इति —
१३१ 13 तद्युक्तमेव स्वरूपलक्षणैव उपादा
नापेक्षा मनसि वागादीनां न स्वरूपल
यः किं तु प्रवृत्तिलय एव — तथा हि ज
लमध्ये निक्षिप्तस्यांगारस्य प्रकाशप्र
वृत्तिलयो दृश्यते अतो नुपादानेपि म
नसि वागादीनां लयो युक्त एव वृत्तिम
तो वागादेर्लयरूपत्वा वृत्ते वृत्तिमतोर
भेदादिति तदुपचार प्रवृत्तिरिति —

॥ तद्वृत्पाण. उत्तरात् ॥

ततस्य मनः प्राणइति वागादिसर्वेन्द्रिय
युक्तस्य मनः प्राणे लयः श्रूयते स च्चायं
पूर्ववदुपपद्यते नवेति संशयः पूर्वस
ति वागादीनामनुपादाने मनसि प्रवृत्तिलयो
भवति. मनसस्तु प्राणे स्वरूपलय एव म
नसः प्राणोपादानत्वात्. तथा. अन्नमयं
हि सोम्य. मनः आपोमयः प्राण इति—
श्रुतेरन्नमयत्वेन पार्थिवस्य मनस आपो
मयत्वेनोपादाने प्राणे स्वरूपलयेन
विरुद्ध इति पूर्वः पक्षः— सिद्धान्तस्तु
पूर्ववन्मनसोऽपि प्राणे वृत्तिलय एव
न स्वरूपलयः. प्राणस्य मुख्योपादनत्वा
भावात्. मनसस्तत्त्वनसंभवात् अतः
प्राणे मनसोऽपि वृत्तिलय इति न्यायः.

॥ सोऽध्यक्षेण तदुपगमादिभ्यः ॥

पूर्वत्र सर्वेन्द्रियप्रकाशस्य मनसः प्राणे लयः प्र
तिपादितः पुनरिह तस्य प्राणस्य कुत्र ल
१४२ सू. य इति संदेहः - किं प्राणे प्राणस्तेजसी
ति श्रुतेः प्राणस्य तेजसि लय इति प्रा-
प्ते ब्रूमः - सः प्राणः ~~सोऽजी~~ स्ततो जीवे-
नाध्यक्षेण संयुज्यते न तस्य तेजसि
लयः एवमेवात्मानमन्तकाले स
र्वे प्राणा अभि समायान्तीति - जीवे तस्य
लय श्रावणात्, प्राणस्तेजसीति श्रुति
क्रम विरोधं परिहरति-

॥ भूतेषु तच्छ्रुतेः॥

प्राणस्तेजसीति भूतान्तर संसृष्टं तेजो
ऽभिधीयते नतः प्राणो जीवेन सह सं-
भूतेषु संयुज्यते इति न विरोधः॥

॥ नैकस्मिन् दर्शयतो हि॥

न तेजोमात्रे प्राणलयः त्रिवृत्करणश्रु

-ते हि भूतान्तर संसृष्टं दृश्यते अतो भूतेषु जीवेनसह प्राणः संपद्यत इति श्रुति विरोधः.

॥ समान संस्कृत्युपक्रमादमृ तत्वं चानुपोष्य ॥

इह निरूप्यमाणा सा उत्क्रान्ति र-र्चिरादि गत्युपक्रमात् प्राग्विद्वद् विदुषोः समाना उत भिन्नावा इति विचारः किं प्राप्तं संसारफलस्य मोक्षफलस्य च उपत्ति वैषम्यदर्शनात् अज्ञानि ज्ञानि नो विसदृशौव उत्क्रान्तिरिति प्राप्त क्रमः - अर्चिरादि मार्गोपक्रमा द्विद्वद् विदुषोः समानैवोत्क्रान्ति रमृतत्वं च तेन तस्येति गतं चैकाच हृदयस्य नाड्यः स्तयोर्ध्व मायन्न मृतत्व मेतीति श्रुति वैषम्यमेतत्

उत्क्रान्तिः समानेत्र.

१४२ । ॥ तदापीतेः संसारव्यपदेशात् ॥

पूर्वमुपपादिता मूर्द्धन्य नाड्याद्धि विदुष उत्क्रान्ते रितोर्चिरादि गति तदिद देहादुत्क्रान्तस्य मुक्तस्य अर्चिरादि गतिरुत्पद्यते वेदिति सन्देहः - पूर्वस्ति यदा सर्वे प्रमुच्यन्ते कामायेस्य हृदिस्थिताः अतोमर्त्यो भवतीति देह पाद्धा नन्तरत्वमेवा ममृतत्वमव गम्यते तेर्चि पमाभे संभवतीति च विदुषाम. र्चिरादिगतिरु कस्योपपत्तेरिति प्राप्तम्. प्रक्षीणानां वामादीनां पुनरुत्पादनाभावात् अस्य मुक्तस्य गत्य नुपपन्नमिति) पत्ते रर्चिरादि ममोनन रुपपन्ना गतिर्मुक्तात्मनः

इति प्राप्ते सिद्धांत उच्यते. अर्चिरादिगम
नेन ब्रह्मप्राप्ते प्राक्ः संबन्धाव्यपदेशात्
ःसंसारावगमः अमृतत्ववचनमापेक्ष्य
मृतत्वमित्ये प्रायः. अतः उत्क्रांतस्य अर्चि
रादिगतिरुपपन्ना. यदुक्तम् वागा
दिविलयाः तस्याभावात्यनुपपत्तिरिति
तत्राह -

॥ सूक्ष्मं प्रमाणतश्च तथोपल
ब्धेः॥

शरीरादुत्क्रांतस्यापि सूक्ष्मशरीरमनुव
र्तते. अन्यथाभावात्यनुपपत्तेः तत्तानुप
पत्त्या कल्पते शरीरं प्रमाणं चान्त
विद्यतएव - चंद्रमसा संवादादिप्र
माणदर्शनात् तदुपलब्धेः तं ब्रूया
दिति. अतः शरीरादुत्क्रांतस्य अर्चि
रादिगत्युपपत्तिः

॥ नोपमर्देनातः ॥
अतएवान्वयाद्यनुमृत्यो भवतीति-
१४३४ अमृतत्ववचनं न देहसंबन्धोपमर्देनभ
वति-
॥ अस्यैव चोपपत्तेरूष्मा ॥
अस्य सूक्ष्मशरीरस्य विद्यमानत्वोपप
त्तेरस्य न तदुपमर्देनेन. उपलभ्यते ह्यू
ष्मतो विदुषः सूक्ष्मदेह इति. ऊष्मा.
अन्यत्वानुपलंभात् न स्थूलगुणः
अतस्तद्गत्युपपत्तिः.
॥ प्रतिषेधादिति चेत् न शारीरा
त् स्पष्टो ह्येकेषां ॥
अथाकामयमानः न तस्य प्राण उत्का
मन्तीति. विदुष उत्क्रान्ति प्रतिषेधात्-
अत्रैव साक्षात् ब्रह्म प्राप्तिरिति चे
त् न. विदुष उत्क्राममाणस्यापि यदि

कण्ठगमनाय प्राणायस्त्रिप्यन्त इति हु
च्यते न तस्य प्राणा उत्क्रामंतीति । अयमेवा
र्थो माध्यंदिनानां स्पष्टोऽभिधीयते —
यो कामो निष्कामो वा आप्तकामो न स्त
स्मात्प्राण उत्क्रामंतीति —

॥ स्मर्यते ॥

विदुषो मूर्धन्यनाड्या गमनं स्मर्यते —
ऊर्ध्वमेवस्थितस्तेषां यो भित्वा सूर्यम
ण्डलं । ब्रह्मलोकमतिक्रम्येत्यादि स्मृ-
-तिरादिरुपपद्यते उत्क्रमं तस्य जी
वस्येति केचिदिह मुक्तिः शरीरपात
इति निरन्वयोपासकानामर्चिरादिग
ति मन्नीयतामाहुः —

॥ तानि परे तथाह्याह ॥

पूर्वत्र प्राणसहितस्य जीवस्य तेजोपल
क्षितेषु तेषु लय उपपादित देवः पर

स्यां देवतायामिति तस्य भूतांतर संसृष्टस्य जीवयुक्तस्य परस्यां देवतायां यो
गम्यते तेषां भूतानां परब्रह्मणे स्वरूप
१४३ लय उच्यते उत अ॰ विभागापत्ति मात्र
मिति संक्षार्थः तेजः परस्यां या देवताया
मित्यत्र तेज उपलक्षितानां भूतानां परस्यां
देवतायां स्वरूपेण लयो युक्तः देवा त्तलि
ति देवडाव देवते त्युच्यते - परम शब्दो म
हत्व वाची परं देवो महादेव इति सिद्धं --
सेयं देवतेया द्यावाभूमी जनयन् देवएक
इति स महादेव एव सकलभूत कारणं शूय
ते परं ब्रह्म - अतस्तस्मि नुपादाने सजीवानां
स्वरूप लय इति पूर्वः पक्षः सिद्धांतस्तुक्ष
मेणुपादाने पि न स्वरूपलयो भूतानीका
र्याणां इति किंतु तदविभागमात्रमेव वाङ्
मनसि संपद्यतेति - संपत्ति वचनस्यैवाता

नुपपत्तस्यान्तरत्वे प्रमाणाभावात् मनः प्रवृत्तिवद्विभागमात्तपरत्वमतो लयवदेति वदति ॥

॥ अविभागो वचनात् ॥
संपत्तिवचनाद्विभागमात्रं ब्रह्मणि भूतानामिति युक्तमेव

॥ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥

पूर्वतः विदुषोरर्चिरादि पर्यन्तमुत्क्रान्ति रुच्यमानेत्युक्तं - तत्रापीह विदुषि निष्क्रमणवेळायां उभयोर्विशेषोऽस्ति न वेति - विचार्यते - तेजः परस्यां देवतायामिति श्रुतेः स्वस्य परमकारणे परदेवे ब्रह्मणि परमप्रकाशरूपे विद्वान विदुषीकृत्य विलीय अविभागो

१४४९ A· न क्षणः विश्राम्यतीति श्रुतीति समभिहितं· तथा
समानैवोत्क्रान्तिः. तयो हृत्प्रद्योतनादि सम
त्वश्रावणात्- तदिहे तस्यात्मच्छिद्रे प्रद्योत
ते तेनचैष आत्म निष्क्रामति· चक्षुषो मू
र्ध्नो वान्येभ्यो वा शरीरेभ्य इति श्रूयते·
अतस्समानत्वादुत्क्रान्तेस्तयोरविशेष इति
प्राप्नोति पूर्वः पक्षः· विशेषोस्तीति सिद्धां
त उच्यते- तथाहि हार्दस्य हृदयगतस्य प
रमेश्वरस्याराधनरूप विद्यासामर्थ्यात्
तदङ्गत्यनुसंधानेन प्रीतेन तेन सर्वानुग्रा
हकेण हित स्वस्वरूपावरणक मलध्वंसन
विदग्धया नुग्रहदृष्ट्या निरीक्षितः· तद
नुग्रह प्रकाशित द्वारो जीवः शताधिक
या मूर्धन्य नाड्या विद्वा.नुत्क्रामति·
न तथा परः· किंतु इतर नाडीभ्य एव· तथा
श्रुतिः- शतं चैका च हृदयस्य नाड्यस्तासां मू

र्थान मार्गे निरस्कृतौ कः यतयोस्समाय
न्नमृतत्वमेति · विद्वत् अन्या उत्क्रमणेभ
वन्तीति - अतएव विदुष उत्क्रमणे विशेषः
किमुक्तं भवति - रुद्रो जनानां हृदये संनिवि
ष्टः हृत्पुण्डरीकमित्यादिषु श्रुतिषु ईश्व
रस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति इत्या
दिषु सर्वजनहृदयभूतो हि परमेश्वरोवग
म्यते यत्र सुषुप्तौ जीवस्येन्द्रियवृत्तिभि
स्सह विलीय तदेकरसो भवति - यतः - ·
विश्वाधिको रुद्रो महर्षिः. सर्वो वै रुद्र इत्यादि
षु विश्वाधिकत्वेन निमित्तत्वाच्च — त्म
१४५/13 कत्वेनोपादानत्वाच्चावगम्यते एक एव रुद्रो
न द्वितीयाय तस्थे इमांल्लोकानिति यस्य
विश्वाधिपत्यं श्रूयते ईशः शिव एकोध्ये
यः शिवंकरः - यदा चर्मवदाकाशं वेष्ट
यिष्यन्ति मानवाः । तदा शिवमविज्ञाय दुःख

स्यांतो भविष्यतीति यमंतरेण मुमुक्षूणां ज्ञे
य वस्तु नास्तीति श्रुतिभिर्विज्ञायते. अस्य
हि जंतोः प्राणैरुत्क्रममाणस्य रुद्रस्तारकं
ब्रह्म व्याचष्ट इत्यादिषु श्रुतिषूत्क्रांतिस
मये विदुषां स्वरूपप्रकाशकतारक
ब्रह्मोपदेष्टृत्वेन ज्ञायते. आपो राजान
मित्यादिषु यस्याराध्यत्वेन सर्वयज्ञाधि
पत्यं श्रूयते ॐ नो विश्वं अर्पय हेमजे
त्रे त्रिपक्रमं त्वा त्रिपजा शृणोमीति यमी
ति यस्संसारयोगस्य त्रिपक्रमत्वेनि
रूप्यते. मायां तु प्रकृतिं विद्यान्मायिनं
तु महेश्वरं इत्यादि सकलप्रपंच विचित्रत्व
निकुरुंबावलंबनी या मायालक्षणा परम
शक्तिः यस्यस्वैकदेश स्वभावतया श्रूय
ते सखलु हृदयगतो हार्दः परब्रह्म
परमेश्वरः परममंगलस्वरूप उमा माप

तिष्ठ परमात्मा स्वाज्ञारूप श्रुतिचोदितेषु
कर्मस्व विनिहोत्रादिषु नियत स्वाश्रम
भूतेषु निर्मुक्त सकला विकर्म लब्ध स्वा
प्त सकल कर्मफल स्वायत्त चित्तं स्व
ज्ञानामृत पूर्ण पूर्णं निरस्त समस्त काम्य फल
फलं विवेकादि संपन्नं स्वभक्तिमात्रैक निरतं
स्व प्रसादाकांक्षितं विद्यावंतं साधक
१८८ A. मवलोक्य शरीर परित्याग समये तद्विषय
संपन्न प्रसादः तस्मिन्न संसारमलक
लंकापकर्षण मनुग्रह दृष्टिं निर्दधाति
तदनुग्रह विशेषेण सौविलं गलित सां
सारिक मलः प्रकाशितात्मा स्योदितमू
र्धन्य नाड्या निर्गम्य अर्चिरादिना तदी
यं परमं पदं प्राकृतं निरतिशयानन्द
स्वरूपो भवति तस्माद्विदुषोपि पुण्य
रूप गति वैषम्य मिति । सिद्धमेव —

॥ रश्म्य. अभ्यनुसारी ॥
पूर्वस्य साधकस्य मूर्धन्य नाडिकया हृद
य शत परमेश्वरानुगृहीतस्य निर्गम
उक्तः। निर्गतस्य मूर्ध्वगमनं निशि
वा दिवा स्मृ. भवतीति संशयः- किं तावत्
प्राप्तं अग्नौ तैरेव रश्मिभि: ऊर्ध्वमुत्क्रा,
मतीति समुत्क्रांतस्य रश्मि संबन्धो वगम्य
ते-ऽस्तु दिवैव संभवतीति न रात्रौ तद
संभवादिति प्राप्ते ब्रूमः- सचाय मुत्क्रांती
रश्मि संबन्धादेवोर्ध्वं गच्छतीति सच दि
वाप रात्रौच संभवति निदाघे पुष्प दर्शना
त्र निशम. पु. रश्मि संभव.. तस्मा
द्दिवा च रात्रौच रश्म्यनुसारी गच्छे. मू
र्ध्व मिति निर्णयः- आशंक्य परिहरति-
॥ निशि नेति चेन्न संबन्धस्य-
-यावद्देहभावित्वाद्दर्शयति च-॥

निशि मृतस्यापि रश्म्यनुसंबन्धेन तद् ब्रह्मप्राप्तिरभिहिता तन्न संभवतीति, दिवा च शुक्लपक्षश्चेत्यारभ्य विपरीतं तु गर्हितमिति निशादि मरण निन्दनादिति चेन्न संसारबन्धस्य यावद्विद्याभावित्वात् प्रारब्धस्य यावच्चरमदेहावसानभावित्वाच्च
१४९ 13 प्राप्तिं विना हेत्वभावाच्च तस्माद् दृष्यति- तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये, निशानिन्दा तु उत्तरपूर्वानर्थविषया अतो निश्यपि मृतस्य ब्रह्मप्राप्तौ न विरोधः-

॥ अतश्चायनेऽपि दक्षिणे ॥

अत एव बन्धहेत्वभावाद् दक्षिणायने मृतस्यापि विदुषो ब्रह्मप्राप्तिरस्त्येव-

॥ अपि च योगिनः प्रति स्मर्यते ॥

स्मृतेश्चैते योगिनामर्चिरादि — का:
तद्विपरीतान्येषामिति गतिः स्मर्यते। नैते
पार्थ गति जानन् योगी मुह्यति कश्चनेत्या
दौ अस्तस्सर्वेषां योगिनां ब्रह्मप्राप्तौ द
क्षिणायन कृष्णपक्ष निषेधो नास्त्येव यदा
कदाचिद्देहापगमः तदानीमेवास्य तत्सिद्धि
रिति —

इति
श्रीकण्ठशिवाचार्य विरचिते ब्रह्ममी
मांसा भाष्ये चतुर्थाध्यायस्य द्विती
य ४ पादः॥

॥ अर्चिरादिना तत्प्रथितेः॥
पूर्वतोपासकस्य ब्रह्मपत् परमेश्वरा
नुग्रहेण प्रकाशित द्वारस्य मूर्धन्यनाड्या
देहान्निष्क्रान्तिरभिहिता — तदेवं विधस्य

ब्रह्मप्राप्ति रर्च्चिरादिना मार्गेणैव उत अन्यथा
संभवतीति प्रश्नमिह विचार्यते तत्राहि ·
यत्र कुत्रासौ केशोतोपि विपत्स्यते व्यपोह्यशी
र्षकपोले भूरित्यग्नौ प्रतितिष्ठति भुव
इति..... सं.वि.रि. त्यादित्ये महइति ब्रह्मणि
आप्नोति स्वाराज्यमित्यादिषु ब्रह्मप्रा
प्ते रर्च्चिरादि गतिमन्तरेणाप्युपपत्तिरव
१५६ A गम्यते · तस्माद्ब्रह्मप्राप्तौ नार्च्चिरादि निय
म इति प्राप्ते ऽभिधीयते- विद्वानर्च्चिरादि
नैव ब्रह्मप्राप्तिः. पंचाग्निविद्यादिषु तेर्चि
षमभिसंभवन्तीत्यादिनार्च्चिरादेः प्रसि
द्धत्वात् ब्रह्मप्रापकत्वेन :: भूरित्यग्नावि
त्यादिषु न ब्रह्मप्राप्तिमार्ग उच्यते, किंतु त
त्तद्विभूतिप्राप्तिरेव ततः परप्राप्तिरर्च्चि
रादिनेति - निरन्वयोपसिन नियम इ
ति चेत्

॥ वायुशब्दादविशेषविशेषाभ्याम्॥
अत्र श्रुतस्यार्चिरादिक्रमस्य श्रुत्यंतरसि
द्धोऽपि क्रमो मध्ये निवेश्यः, नवायमेवेति
सन्दिह्यते अत्र तेऽर्चिषमभिसंभवन्ति अर्चिषो
ऽहआपूर्यपक्षात् षडुदङ्ङेति मासान्मासेभ्यः
संवत्सरं संवत्सरादादित्यमादित्याच्
चन्द्रमसं चन्द्रमसो वैद्युतं, पुरुषोमान
व एतान् ब्रह्म गमयतीत्यर्चिरादि
क्रमः श्रुत्यन्तरे स वायुमागच्छति स
आदित्यम - - - - त्सरादित्ययो र्म
ध्ये वायुः श्रुतः स तत्र - - - - - - -
संनिवेश्य इति तु मयुक्त एव तत्र श्रवणादि
ति प्राप्ते ब्रूमः - गुणोपसंहारन्यायेन सं
वत्सरादित्ययोः - - - - - - -
के संवत्सरादुपरि देवलोकः श्रुतः सो
ऽपि वायुवाच्य एव देवानां लोक इति अ

अविशेषेण वायुशब्द इत्त तस्यैव विशेष
वाचक इत्य विशेष विशेषाभ्यां देवलोक
यो — शब्दाभ्यां वायुरेवाभिहित इति·
१४५ B· अब्दा दूर्ध्वमादित्यात्पूर्वं वायुर्निवेश्य
इत्यादि·
॥ — — परुणस्संबन्धात् ॥
कौषीतकोपानिषदि सवरुणलोकं स
चंद्रलोकं स प्राजापतिलोकं इतिव
रुणादयोपि श्रुता भवन्ति तेभ्यश्चिरादि
मार्गे निवेशयितुं शक्या· उत नशक्या· इ
ति संशये नियामका भावा दशक्य संनि
वेश्या इति प्राप्ते ब्रूमः- वरुणादीनां मध्ये
संनिवेशएव तत्त विद्युल्लोकस्योपरि वरु
णलोक संबन्ध वशा व्यवस्था युक्ता ह्येषे
तत्संबन्धेनाक्षिपत्येन वरुण स्ततो वि
द्युद्वरुणयोः संबन्धाद्विद्युतोनन्तरं वरु

प्रस्तदनन्तरं इन्द्रः प्रजापतिलोकौ तत्संबन्ध तद्विशेष संबन्धादेव विशेषः-

॥ आतिवाहिकास्तल्लिङ्गात्-॥

इह श्रूयमाणा अर्चिरादयो देवता विशेषा वा उत स्थानभेद इति संदेहः किं प्राप्तं अर्चिरादयः स्थानभेदा न देवता विशेषाः तत्र लोकोक्तान संभवात् तथा हि लोके, ग्रामं निर्गत्य नदीं प्राप्य ततोऽयं इति व्यवहारति तद्वदर्चिरादयो मार्गाभिमानिनो देवताविशेषा एव तत्पुरुषो मानवः एनान् ब्रह्म गमयतीति विद्युत्पुरुषस्य गमयितृत्व चेतनलिङ्गात् विद्युत्मातिवाहिका इति विज्ञायते; विद्युत्पुरुषस्य ब्रह्म गमयितृत्वश्रवणात् वरुणादिभिः किंफलमित्यत आह-

॥ वैद्युतेनैव ततस्तच्छ्रुतेः ॥

तत्पुरुषः सएनान् ब्रह्म गमयतीति श्रुतेः वैद्युतपुरुषात्परस्मात् सएव ब्रह्म गमयतीति वरुणादीनां तदनुगतत्वमेव ततोविरोधाभावः ॥—

॥ कार्यं बादरिरस्य गत्युपपत्तेः ॥

११८ ४· इह तत्पुरुषो मानवः सएनान् ब्रह्म गमयतीत्यत्र तत्पुरुषो मानव उपासकान् प्रापति लोकान् परं सामर्थ्याद्ब्रह्म उतान्यमिति संशयः· तत्रासति मतांतरेण पूर्वः पक्षः प्रवर्तते- कार्यं हिरण्यगर्भमेवार्चिरादिना मानवो गमयत्युपासकानस्यहि गत्युपपत्तेः न व्यापिनि परब्रह्मणि ततः कार्यं हिरण्यगर्भं परिच्छिन्नमिति बादरिः- हिरण्यगर्भस्य कार्यत्वं हिरण्यगर्भं पश्यत जायमानमिति · विश्वाधिकस्य

ब्रह्मणः प्रथमकार्यत्वमस्यावगम्यते. अतएव
पुनरिहोपपत्तिमाह- - - - - -

ब्रह्म — — तीत्यत्र ब्रह्मलोकं
गमयतीति ~~सभापतेः~~ [प्राजा] सभां वेश्म प्रपद्य
तद्गति विशेषितत्वात् अतश्च हिरण्यगर्भ
पदमेव गमयति-

॥ सामीप्यात्तु तद्व्यपदेशः ॥

ब्रह्म गमयतीति ब्रह्मव्यपदेशस्तु तत्सामीप्यादस्य हिरण्यगर्भस्य हिरण्यगर्भं पश्यत जायमानमिति प्रथमकार्यत्वादस्य सामीप्यं.

॥ कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥

प्रथमं हिरण्यगर्भपदप्राप्तावपि सदनावृत्ति श्रुत्यविरोधः हिरण्यगर्भलोकात्यये तदध्यक्षेण सहातः परमपि गच्छति

तस्माद्ब्रह्माभिध्यीयते ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे इति श्रुत्या- अ

१२५
B. न श्रुत्याविरोध इति-

॥ स्मृतेश्च ॥

ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्॥
इति· अतश्च हिरण्यगर्भपदं मङ्गिरा दिर्नयति प्रथमं- ततः प्रतिसंहारे परं ब्रह्म प्राप्यते तेन सहेति

॥ परं जैमिनिर्मुख्यत्वात्॥

ब्रह्म गमयतीति हिरण्यगर्भात्परमुत्कृष्टं नारायणमेवार्चिरादिर्नयति परब्रह्मण एवोपादानाच्च स्यान्तरत्वेन तत्र ब्रह्मण्य पदेऽस्य मुख्यत्वादिति जैमिनिः- तत्रो पपत्तिमाह-

॥ दर्शनाच्च॥

सोऽध्वनः पारमाप्नोतीति तद्विष्णोः परमं पद
मिति तत्पदस्य प्राप्यत्वं दृश्यते अतश्च त
मर्चिरादिर्गमयतीति-

॥ न च कार्ये प्रत्यभिसंधिः॥

प्रजापतेः सभां वेश्म प्रपद्यन्त इति यद्
क्तं न तत्र कार्ये हिरण्यगर्भे प्रत्याभिसंधिः
प्रजापति शब्दस्य प्रजापालकत्वेन नारा
यणवाचकत्वेनापि संभवात्- यदुक्तं
ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमु
च्यन्ति सर्वे इति- तत्रापि ब्रह्मशब्दो नारा
यणपरः तस्य लोके पदे स्थिता योगि-
नः परान्तकाले पश्चिमदेहस समाप्तौ
परामृतं विरजाख्यं ब्रह्म प्राप्त मु
क्ताभवन्तीति न विरोधः एतानि वा अम्
तस्य नामधेयानीत्यादौ शिवस्य हि
परब्रह्मणः अमृत शब्दाभिधेयत्वं अनादि

१७८ A. मुक्तत्वादवगम्यमेव ॥ अतो विष्णुपदे प्रारब्ध कार्य देहावसानं स्थित्वा योगिनः परं, परमृत. शिव विश्वाधिकं कम् प्राप्य. मुक्ता भवन्तीति सिद्धान्त उच्यते–

॥ अप्रतीकालम्बनान्नयतीति – – बादरायण उभयथाच दोषात्

त. सु. क्र. म. सूत्र ॥

प्रतीकालम्बनांहि ते ये च चेतनमचेतनं वा ब्रह्मदृष्ट्या उपासते प्रतीकालम्बनास्तु ये विश्वाधिकं ब्रह्म साक्षादुपासते साक्षाद्ब्रह्मोपासकान् पुरुषः साक्षाद्ब्रह्मैव गमयति. यद्विश्वाधिकं कं विषये पिंडः ॐ विरूपाक्षं शूलपतें साक्षाद्ब्रह्मोपासकस्य परंज्योतिरुपसंपद्य स्वेन रूपेणाभिसंपद्यते. इति लोचनं– नीलकंठं – – – – ध्यात्वा मुनुर्गं

च्छति भूतयोनिं समस्तसाक्षिं तमसः
परस्तात् इत्यादिषु साक्षाद्ब्रह्मणाप्यव
रामात् पूर्वोक्तोभयपक्षे दोषः. श्रुतिविरो
धा ब्रह्मवति· तत्क्रतु. ब्रह्मोपासको ब्रह्मैव
गच्छति· न मध्ये विलम्बते प्रयोजनाभा
वात् सूक्ष्मकार्यं सकलकार्यसमष्टिरूपस्य
हिरण्यगर्भस्य परो नारायणस्तदुपादकत्वा
त् ततोपि परं शिवाख्यं निमित्तं विरूपा
क्षं परं ब्रह्म· सर्वज्ञं सर्वशक्तिकं नित्यतृ
प्तं स्वतन्त्रं स्वप्रकाशमिति· तथा शिव
संकल्पोपनिषदि परात्परतरो ब्रह्मा त
त्परात्परतो हरिः तत्परात्परतो [illegible]री
शः इति रेफः छान्दसः· अन्यत्रापि नाराय
१२८. 13. णपरं ब्रह्मेति नारायणात्परत्वेन ब्रह्माभि
धाय तत्कीदृशमित्याकांक्षायां ऋतं सत्यं प
रं ब्रह्म पुरुषं कृष्णपिङ्गलं ऊर्ध्वरेतं विरूपा

श्रुतं इति सर्वज्ञतया मनोवाग्विषयासरहितं ऋतं सत्यं स्वशक्तिमरीचिभिः सकलजगत्पुरकर्तृतया पुरुषशब्दवाच्यं स्वाविभक्ततया परप्रकृतिरूपया परमानन्दचिदेकरूप परमाकाशलक्षणया स्वावस्थाभेदः परमचेतन नारायणारब्ध हिरण्यगर्भात् सकल कार्यप्रपंचया परमशक्त्योमया शक्त्या तत्स्वरूपः तथा कृष्णपिङ्गलं निर्विकारत्वात् ऊर्ध्वरेतं त्रिलोचनलक्षणया विरूपाक्षं परं ब्रह्म सर्वोत्तरमिति निरूपितं विश्वाधिको रुद्र इति श्रुतेः विश्वत्वाधिकत्वेनास्यावगमात् वैदिकानांमतः परं कल्पयितुं अन्याय्यमेव-

॥ विशेष उच्यते॥

ब्रह्मणो विश्वाधिकस्य तद्भेदस्योपादानस्य विष्णोस्तत्कार्यभूतस्य हिरण्य

गर्भस्यच विशेषदर्श~~[illegible]~~यति श्रुतिरेव।
परात्परतरो ब्रह्मा हिरण्यगर्भं पश्यत जायमा
नं पुरुषो वै रुद्र इत्यादिका अतश्च ब्रह्मवि
ष्णोः परं ब्रह्मणः शिवस्य परमाकाशरूपं
परमानन्दमयं पदं। यच्छंकितं सोध्वनः
परमाप्नोति तद्विष्णोः परमं पदमिति विष्णु
शब्दः परब्रह्मवाचकः। षड्विंशमस्याध्व
१४९. A. नः पारमतीतं पदं विश्वाधिकस्यैवोप
पन्नत्वात्। यद्वा विष्णोः प्रपञ्चावस्थस्य
परमुत्कृष्टं पदं स्वरूपं परमाकाशानन्द
रूपं आनन्दलक्षणं शिवस्य परब्रह्म
णः पदमेव यत्रासौ निहितात्मा प्रपञ्चा
कारोपि संसरति अतश्च विशेषः।
अतः केचित् परान्तकाले परामृतात्परि
मुच्यन्ति सर्वे इति श्रुत्या परब्रह्मणः शिव
स्य परमं विभूतित्वेन ये विष्णुमुपासते।

भेदवस्था.द्वा ब्रह्मशब्दवाचकस्य ---
ॐ प्राप्य तत्तद्विभूतयः परांतकाले चरम
देहावसाने परामृतं शिवपरामृतं शिवं-
प्राप्य मुक्ता भवन्ति. विष्णूपासकानां मध्ये
रादीनां विष्णुपदं प्राप्तिपूर्वं... विलंबेन...
शिव पदप्राप्तिरिति वचनात् नास्ति विरो
धः..

इति
श्रीकंठशिवाचार्य विरचिते ब्रह्म
-मीमांसा भाष्ये चतुर्थाध्याय
स्य तृतीयः पादः॥

॥ संपद्याविर्भावः स्वेनशब्दात्॥
पूर्वत्तात्र्चिरादिना मार्गेण विद्यावतां योगि
नां हिरण्यगर्भ नारायणपदातीतं पर
ब्रह्मणः शिवस्य परमसुखरूपतया स्वर्ग

वाच्यं पदं प्राप्यमिति निरूपितं. तदिदमस्मा
च्छरीरात् समुत्थाय परं ज्योति रूपसंपद्य
य स्वेन रूपेणाभिनिष्पद्यते इति प
रं ज्योतिः रूपं स्वेन ~~रूपेणा~~ भिनिष्पद्यत संपद्य स्वेन- रूप-रूपेणा
इति. परं ज्योतिः रूपं महाप्रकाशः ब्र
१४९. 13. ह्म प्राप्तस्य स्वरूपाविर्भाव उच्यते. तत्स्व
रूपं तस्य योगिनस्तात्कालिकमुत पूर्वसि
द्धं वेति संशयः किं प्राप्तं अस्माच्छरीरात्स
मुत्थाय इति मुक्तसंसारस्वभावस्य पुरुष
स्य परंज्योतिःरूपं ब्रह्मसंप्राप्याविर्भूतरू
पकं सद्दशागुणकपूर्वसिद्धं किंतु निष्प
द्यत इति निष्पत्तिः निष्पत्तिश्रवणात्-
स्वर्गवदागन्तुकमेव तस्य पूर्व सद्भावे
कुतोस्य संसारः अतस्तदुपासनाजन्य
मुक्तिफलं तद्रूपमागन्तुकमिति प्राप्तेऽभि
धीयते.. ब्रह्मप्राप्तस्य जीवस्य मलतिरो

हितं। ब्रह्मस्वरूपं पूर्वं सदेव मलावरणापगमा
त् आविर्भूतं भवति - स्वेनरूपेणेति शब्दा
त्तदवगम्यते तस्य रूपानुग्राहकस्य शिव
स्य परब्रह्मणः प्रसादेन। स्वावरणे मलविगा
लिते तत्सदृशगुणमात्मस्वरूपं प्रादुर्भवति।
न कर्मफलवदुत्पद्यते मलस्यानादित्वात् -
अस्य संसारोपपत्तिः अतः स्वाभाविकमेव
मुक्तस्य स्वरूपं चिदानन्दघनं सर्वज्ञता
दि विशेषमाविर्भूतमिति -

॥ मुक्तः प्रतिज्ञानात् ॥

आत्मस्वरूपमात्रस्य प्रागेव सिद्धत्वेपि
मलविनिर्मुक्तस्यापरिच्छिन्नानन्दाद्यावि
र्भाव उच्यते भूयोनु स्मरण्यास्यामीति -
मलप्रयुक्तजागरिताद्यवस्थातिरोधानवि
निर्मुक्तस्यैव प्रतिज्ञानात् - किंच।

॥ आत्मा प्रकरणात् ॥

तत्र भूयोनुव्याख्यास्यामीति प्रकृतापहतपा
१६० A प्मत्वादिगुण आत्मप्रकरणादवगम्यते य
आत्मापहतपाप्मेत्यारभ्य सत्यसंकल्प
इति प्राकृत्येव भूयोनुव्याख्यास्यामीति
निरूपितं अतः प्रादुर्भूतस्वाभाविकापहत
पाप्मत्वादिको मुक्त आत्मा ब्रह्मसदृशोभ
वतीति सिद्धं ।।

।। उप - - - लेन दृष्टत्वात् ।।

पूर्वत्राधिकरणे ब्रह्मगुणस्वरूपसादृश्य
मिति प्रतिज्ञातं तदिदं तत्सादृश्यं मुख्यं मुक्त
स्योपपद्यते न वेति विचारः - किं मुच्यते
एकमेवाद्वितीयाय तस्ये इत्यादिषु
ब्रह्मणः सदृशः द्वितीयवस्तुनिषेधात् क
स्यचिदपि मुक्तस्य बद्धस्य वा तत्सादृश्य
मनुपपन्नं इति प्राप्ते सिद्धान्त उच्यते -
मुक्तस्य ब्रह्मणा सादृश्यं कुत्र्यतः निरंजनः

साम्यमुपैति मुक्तः शिवस्समो भवेदिति मुक्त
स्य -- स्वरूपगुणाविर्भावेन तत्सदृशतया
रूपत्वात् अतो ब्रह्मवेद ब्रह्मैव भवतीतिब्र
ह्मसादृश्यमेव मुक्तआत्मातु सादृश्यत्वाद्ब्र
ह्मस्वरूपाविर्भावेन स्वस्वरूपमनुभ
वति यदुक्तं एकएवरुद्र इत्यादिना सादृश्य
निषेध इति तज्जगदीश्वरत्वादेव जीवस्य
जगद्व्यापारादिकं नास्तीति वाक्यादि-
भोगमात्रादि साम्यलिङ्गाच्चेति अतो
ब्रह्मण इव सकलकामावाप्तेरस्य साम्यमु
च्यते- तथाहि श्रूयते सोऽश्नुते सर्वान्का
मान् सह ब्रह्मणा विपश्चितेति अत्राहिवि
१९० 13 पश्चिता सर्वज्ञानशक्तियुक्तेन ब्रह्मणासह मु
क्तस्य सकलकामावाप्तिरेव साम्यमते अतो
मुक्तस्य ब्रह्मसादृश्यमेव-
॥ ब्रह्मणा जैमिनिरुपन्यासादिभ्यः ॥

पूर्वत्त स्वयं प्रकाशमपहतपाप्मत्वादिविशिष्ट ब्रह्मस्वरूप मुक्तस्य स्वरूपमाविर्भवतीति प्रोक्तं तस्मादुभयरूपत्वमिह संभवति न वेति संशयः पूर्वसूत्ति मतान्तरेण पूर्वः पक्षः प्रवर्तते - तथा स्वेन रूपेणेति स्वरूपाविर्भावे ब्रह्मणापहतपाप्मत्वादिकेन ते हि ब्रह्मगुणः प्रत्यगात्मनोपि स्वाभाविकाः य आत्मा अपहतपाप्मा इत्यादिनावगम्यते ब्रह्मणा गुणसाम्यमिति जैमिनिः -

॥ उपन्यासादिविदितमात्रेण तदात्मत्वादित्यौडुलोमिः॥

विज्ञानं एवेत्यवधारणात् विज्ञानघनरूपमात्रं ऐकाम्यमित्यौडुलोमिः - सत्यं ज्ञानमित्यादिषु तथाद्युपन्यासः एवमुक्तरूपदर्शनात् सविशेष निर्विशेषत्वेपि हे युगपदुभयासंभवात् कालभेदादिना

व्यवस्थेति - सिद्धांत उच्यते-
॥ पूर्वभावाद्विरोधं बादरायणः॥
बादरायणस्तु परस्पर विरोधाभावाद्
उभयमप्युपगतो उभयस्वरूपमस्य प्रतिपा
दयति - तथाहि विज्ञानघनेति स्वप्रकाश
रूपत्ववगतेपि य आत्मापहतपाप्मेत्यादिना
पूर्वेषां अपहतपाप्मत्वादीनां सद्भावो
वगम्यते अतः उभयप्रमाणसिद्धं रूपद्व
१५१ A यं परस्पर विरोधीत्युभयरूप समुच्चयः
समुच्चितः विरोधोहि कालभेदाद्यपेक्षा -
अतो ज्ञानरूपत्वेन स्वयंप्रकाशमपहत
पाप्मत्वादियोगात् कल्याणगुण विशिष्टं
ब्रह्मस्वरूपं मुक्तस्वरूपमिति युक्तं
॥ संकल्पादेव तच्छ्रुतेः॥
पूर्वोक्त मुक्तस्य स्वयंप्रकाशस्य सत्यसङ्क
ल्पत्वाद्युक्तं तदिह उपपन्ना इदानीं सं

कल्प मानवेति विचिकित्सा - किं प्राप्नोति - मुक्तस्य भोग्यवस्तु विषये न संकल्पमात्तं - हेतुरिति हेतुं नैरपेक्ष्येण नवता - - - दिति प्राप्ते ब्रूमः- संकल्पमात्रेण सकल भोग्यवस्तु सिद्धिरस्ति तथाहि श्रूयते - : पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठंतीत्यादिना अतोऽस्य - संकल्पमात्रमेव भोग्यवस्तु संपादनेहेतुः न बाह्यपेक्षा.

॥ अत एव चानन्याधिपतिः ॥

यत एव ब्रह्मस्वरूपापन्नोयं अपहतपाप्मत्वादिकः अत एव अनन्याधिपतिः स्वतंत्रः कदाचिदपि न कर्माधीनः कर्तृणो विनष्टत्वात्. नास्य परमेश्वरो नियामकः प्रवाहसिद्धः. तदाज्ञारूप विधि निषेध शास्त्र पर्यातीतत्वात् पक्षुत्वव्या

वृत्तेः मलापकर्षेण. शिवत्वमेवास्यसि
द्धं शिवत्वं नाम निखिलमल संपर्क रह
हित निरतिशय महदास्पदं, सर्वज्ञत्वा
दीः इह शिवस्य स्वभावः - अतोऽस्य मुक्त
१६१ स्य शिवसदृशस्य सर्वज्ञत्व मनादिबोध
B. रूपत्वं स्वतंत्रत्वं सर्वशक्तित्व मलुप्त शक्ति
त्वमिति आत्मज्ञान संकोचरूपो हि संसा
रः संकोचकारणमलं पगमे स्य सर्व
ज्ञत्वं . त एवाज्ञानस्य संसारनिदानस्य
समूल निवृत्तेः परिच्छिन्न देहाद्यभि
मान भ्रमनिवृत्तिः ततोऽस्य जरामरण
शोकराहित्यं अतएव कर्म पाशयत्वाभावा
त् स्वतंत्रत्वं निरतिशयानंदरूपानन्द सानुभवै
क रसिकतया स्वात्मारामत्वेन नित्यतृप्तत्वं
अतएवास्य विशिष्ट तृष्णा पिपासादिरा
हित्य मलुप्त सर्वशक्तित्वात् अस्य सत्य

कामसंकल्पत्वादि सिद्धांतः तस्मादसौ परमेश्वरस्त्वा पहतपाप्मा विजरो विमृत्यु र्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्प इति श्रूयते अतो मुक्तस्य शिवसदृशस्य स्वातंत्र्यं युक्तमेव

॥ अभावं बादरि .... राहह्येवं ॥

पूर्वत्र मुक्तस्य स्वयं प्रकाशात्वं सत्यसंकल्पत्वादिविशिष्टत्वं उपपादितं तदिहत स्य शरीरत्व मशरीरत्वं वा कुतो भयं वेति संशयः प्रवर्तते हि - बादरिस्तु मुक्तस्य देहेन्द्रियाद्युपकरणाभावमेव मेने - निष्कलं निष्क्रियमित्यादिकं ब्रह्म तद भावमेवमाह हि तत्स्वरूपस्य मुक्तस्यापि तद्भावे स्यात्वमिति

॥ जैमिनि विकल्पाम्नानात् ॥

जैमिनिस्तु स एकधा भवति द्वितीया भव

तीत्यादिना देहेन्द्रियादिमे विविधत्वरूप
१५२ A भेदः तद्भावम्मने - तदेवं सन्देहः श्रुते वि
देहः श्रुत श्रुतेश्च किमस्य तात्त्विकमितिसं
शये मनसैतान् पश्यन् रमते य एते ब्रह्म
लोके इति बाह्येन्द्रियाद्यभावो हि तात्त्विकोऽभि
मन्यते ब्रह्म च तथा श्रूयते सत्यात्म प्राणारामं
मन आनन्दं इति आत्मन्येवारामः बाह्ये म
नसो वानन्दः न बाह्यं कारण इति न तत्
निरुक्तिः अतो मुक्तस्य विदेहत्वमेव तात्त्वि
~~कक~~ कत्वमुभया संभवादेकत्वाच्च सदेहत्वस्य
पुरुषभेदाद्यनवस्थेति प्राप्ते सिद्धांत
उच्यते ~~[illegible]~~

॥ द्वादशाहवदुभयविधं बादरायणः।

उभयः श्रुतेः सशरीरत्वं च स्वेच्छया मु
क्तस्य बादरायणो मन्यते यथा द्वादशा
हः उभयश्रुतेः सत्रमहीनं च तद्वत्तापी

ति· अतपौराणिकीच भणितिः— सर्वज्ञा
मा स्सर्वगाः शुद्धाः परिपूर्णाः स्वभावतः।
शिवतुल्यैर्गुणोपेताः परमैश्वर्यसंयुताः।
स्वदेहान्भवन्त्यात्मेच्छया पुनः इत्या
दिका· शिव — — दिरूढविषया· अतउ
भयविधत्वं युज्यते एकस्यैवकालभे
दात् उभयथेव व्यवस्थामाह—
॥ भावं द्वादशाहवदुभयविधं बादरायणोऽतः ॥
मुक्तो हि स्वेच्छया बहूनि शरीराणि
सृष्ट्वा तदनुप्रवेशेन विहरति कदाचि
दुपसंहृतशरीरश्च वर्तते· स्वेच्छासं
पादितशरीराद्यभावस्थायाः मुक्तो हि
स्वप्नेपरमेश्वरसृष्ट रथादि सृष्टिम
नोगमन· बद्धपुरुष इव परमेश्वरसृष्टमेव
162 B· रसं भुङ्क्ते· किमुक्तं भवति स्वप्ने पुरुषो
यथा शरीरेन्द्रियादि नैरपेक्ष्येण· केवलेन

केवलेन मनसापि हि ईश्वरसंपादितान् वि-
षयादीन् भुङ्क्ते । तथा मुक्तेरपि स्वभु
तेन मनसैव ब्रह्मस्वरूपरसमनुभु-
ङ्क्ते इति ।

॥ भावे जाग्रद्वत् ॥

स्वेच्छासृष्ट शरीराद्युपकरणाभावे ।
जाग्रत्पुरुष इव सकलकर्म भुङ्क्ते ।
ततो न विरोधः ॥ ननु प्राकृतवस्तु शरी-
रत्वं हि भोक्तृत्वं हिरण्यभोक्तृत्वं तद्पुरुषा-
र्थ प्रपंच दर्शिनो विमुक्तस्य न संसारदुः-
खानुषङ्गाभाव इति चेन्न । मुक्तस्य पुरु-
षार्थत्वेन प्रपञ्च दर्शनाभावात् मुक्त-
स्य ब्रह्माकारे हि दृश्यते विश्वमेतत् तथा
हि श्रूयते । एतत्ततो भवति आकाशशरी-
रं ब्रह्म सत्यात्म प्राणारामं मन आनन्दं
शान्ति समृद्धं ~~मानन्दमिति~~ ममृतमिति पू-

र्वेत्ताप्नोति मनसस्पतिं स्वाराज्यं सुखै
करसस्थिवस्य परब्रह्मणः पदं मनसस्प
ति ज्ञानशक्त्याधिष्ठाता भूत माप्नोति योगी
त्युक्तं तस्य सः किं विशेष इति भावे
वाक्पति श्चक्षुष्पतिः श्रोत्रपति र्विज्ञान
पतिरिति वागादीनां स्वेच्छाधीनत्वं
संभवः तदाधिपत्यमुक्तं तदेव विश्व
स्य मुक्तस्वभावस्य परमाकाशचकारन्
कस्य चकारन्ध्रस्य स्वेच्छाधीनत्वसं
भवात् तदाधिपत्यमुक्तं तदेवं विश्वस्य
मुक्तस्वभावस्य परमाकाशरूपवकारन्
ध्रस्य स्वेच्छाधीन विशुद्धवागादिक
रणस्य व्यापारस्य ततस्तस्मात् पदप्रा
१८३४ A प्त्यनन्तरमेव तद्विश्व जालं भवति किं
आकाशशरीरमिति परप्रकृतिरूपा पर
म सक्ता प्रकाशानन्द समरसा परांश

किंहि परब्रह्मणः स्वरूपतया परमाकाश उच्यते यामुक्तानां तस्य परमेश्वरस्य च साक्षात्कार्य क्रिया हेतुः परंपरयान्येषां- तथाहि कोह्येवान्यात् कः प्राण्यात् यदे ष आकाश आनन्दो नस्यात् एषह्येवा नन्दयाति रसोवैस रसं ह्येवायं लब्ध्वा नन्दी भवति सर्वानुभूते विषयत्वं श्रूय ते स्य तथा तथाहि कोह्येवान्यात् कः प्रा ण्यात् यदेष आकाश आनन्दो न स्यात् एषह्येवानन्दयाति रसोवैस रसं ह्येवायं लब्ध्वा नन्दीभवति सर्वानु भूति विषयत्वं श्रूयते तस्य तथाचायं स एको मानुष इत्यारभ्य स एको ब्रह्म ण इति ब्रह्म पर्यंतं उपाधि निरोधात् आनंदो - - - - - - - - - म्येन श्रूयते निरुपाधिकतया ब्रह्म मुक्तेषु च परिपूर्णो

वर्तते सत्य आनन्दः सत्कोब्रह्मण आन
न्दः श्रोत्रियस्य चाकामहतस्य इति श्र
वणात् ब्रह्मविण [illegible] — — निष्काम
नयानुष्ठितामि होत्रानुष्ठानं परविद्या..
न कामहतः श्रोत्रियः तस्य मुक्तस्य
ब्रह्मणस्य तुल्य एवानन्दः तस्याति
शयेन तद्भूमिमाश्चेरन्तस्य पूर्वत्ताभ्यासः
... कृतिरिति विरोधाभावः अतो यः प्र..
परमानन्दः परप्रकृतिः परमाकाशयोप
राभेदात् आनन्दो ब्रह्मेति व्यजानादिः
१९३/१० ——ति ब्रह्मत्वेन जगत्कारणत्वेन
श्रूयते तस्याभिव्यक्तिः सैषा भार्गवी
वारुणी विद्या परमे व्योमन् प्रतिष्ठि
तेति अतो मुक्तानां परमानन्दस्वरूप
पराकाश शरीरं ब्रह्म जगद्भवति पर
मानन्दानुप्रीतिप्राना मेषां ब्रह्मणस्व

दुःखानुषङ्गाभाववत्व
।। प्रदीपवदावेशस्तथा हि दर्शयति ।।
सूचितं हि मुक्तात्मनोपि स्वेच्छयानेक
शरीर परिग्रहणसामर्थ्येन विभुत्वं तदे
द युज्यते नवेति विचार्यते तद्धि सर्वेषु
~~सर्व~~ लोकेषु कामचारो भवति इमाँल्लोका
न् कामान्यनुसंचरन् इत्यादिषु मुक्त
स्य परिच्छिन्नतया संसारावगमान्न
व्यापकत्वमुचितं अतो बहुशरीरावगमा
न्न व्यापकत्वमुचितं अतो बहुशरीरप
रिग्रहश्च क्रमेणैव न युगपदिति प्राप्नोति
पूर्वः पक्षः । सिद्धान्तस्तु घटादिपरि
च्छिन्नस्य प्रदीपस्य परिच्छेदापाये स्व
भावतया प्रभया गृहादि व्याप्तिः तथा मुक्त
स्य स्वशक्ति तिरोधायक मलापाये

स्वशाखया विश्वव्याप्तिरादेशः तथाहि दर्शयति श्रुतेः सनो बन्धुर्जनिता सविधाता. धामानि वेद भुवनानि विश्वा. यत्र देवा अमृत मानशाना स्तृतीये धामान्यध्यैरयंत परि द्यावा पृथिवी यन्ति सद्यः परि-लोकान् परि दिशः परि सुवः.. ऋतस्य तंतु वितनं विचृत्य तदपश्यत्तद भवत् प्रजासु इति - तत्र प्रकरणे तु वपदेव
१८४ इति जः:: जगत्कर्तु र्विश्वरूपस्य महादेवस्य सहि महादेवः अस्माकं बन्धु र्जनिता पिता. विधाता सकलशोयसां कर्ता धामानि वेद भुवनानि विश्वा: तेजोरूपाणि कृदितिश्चास्पदानि विश्वाबलक्षणानि विशुद्धानि प्राकृतानि भुवनानि विश्वान्यपि जानाति - अंतःकरणस्तुत्वादियोगस्य धाम वेत्ता तस्य प्रयोजनमुच्यते यत देवा

अमृत मानशानास्तीतीये यामातीति -
यस्मिन् महादेवे अमृतं कैवल्यलक्ष्मीमान
शानाः प्राप्यानुभवंतः तद्भाषा देवा देवे
न - लाः जीवा - तृतीये द्युसंज्ञके तस्य
देयामातीते धामानि तेजः पद्ममाया
दि स्वाभिमतानि स्थानानि अभ्यैरयंत -
स्वीकृतवंतः किमुक्तं भवति बंधुवज्जनक
वत् सकलहितकारिणा सर्वज्ञेन पर
ब्रह्मणा महादेवेन प्रसन्नेन छेदितपाश
बंधा अमृतमा - - - - - - - रूपा
मुक्ता जीवाः तृतीये परमव्योमलक्षणे
स्वपदे कल्पितानि धामानि प्रकाशमया
निपद्यानि प्राप्य वर्तन्ते इति । अतश्च
रमेषां व्याप्तिः । परि द्यावा पृथिवी यंति
ते मुक्तात्मानोपि स्वशक्तिमरीचिभिः द्या
वा पृथिवी परियन्ति प्राप्नुवन्ति परलोकान्

हिरण्यगर्भादि लोकानपि व्याप्नुवंति - हिरण्यस्य स्वरूपस्य परियंति व्याप्नुवन्ति . एवं सकल जगद्व्यापिनो वर्तन्ते तथा . ते सर्वव्याप्तास्य कर्मणो विस्तीर्ण भोगार्तं वि;
१९४ 13. वृक्ष्य छित्वा पुण्यपापविनिर्मुक्ताएव सर्वप्राणिषु तदेव महादेवाख्यं वस्तुरूपपश्यन्तः सर्वात्मतया तद्भावात् तत्स्वभावाश्च भवंति यतेति संबंधः -
अतो मुक्तानां शिवैकरसानां व्यापकत्व मस्त्येव अतो महादेव समग्रमणो मुक्तस्य भावात् जीवा देवशब्दवाच्यात् देवप्रभृति व्यापारी देवपताख्य मन्त्रोक्तः यते ये देवादि विपद इत्यादिना - -
पुराणेच

ते हि साध्यादि विपद स्तं तरिक्ष सद स्तथा।
पृथिवीषद इत्येके देवा देवव्रते स्तुता। इति

इह पृथिव्यादि लक्षण रूपं अंतरिक्षरूपमिति द्वितीयं मायापदं द्यौरिति तृतीयं परमाकाश पर्यायं शुद्ध मुक्तिरूपं शिवपदं मुक्ताना मतो विभुत्व मिति-

।। स्वाप्ययः संपत्त्यो रन्यतरापेक्ष-
- मावि ष्कृतं हि ।।

प्राज्ञेनात्मना संपरिष्वक्तो नबाह्यं किंचन वेद नांतरं इति जीवस्य वेदनाभाव वचनं सुषुप्ते मरणयो रन्यतरापेक्षं। नखल्वयमेवं संप्रत्यात्मानं जानातीति सुषुप्ता विष्कृतं हि तद्विलक्षण तया मुक्ति त्वादिकं तु मलतिरोधानापायात् सर्वज्ञत्वं सर्वशक्तित्वं च संपद्यत इति मुक्ति निवेशासंभवः।।

।।जगद्व्यापार वर्ज्जन्यं प्रकरण त्वा दसन्नि हितत्वाच्च।।

उक्तमीश्वरेण साम्यं मुक्तात्मनां स्वप्रकाशत्व व्यापकत्व सर्वज्ञत्वादिभिः तथा
१६६ अ. सति जगत्सृष्ट्यादावपि साम्यं कुर्वीरं साम्यमुपैतीति निर्विशेषश्रवणादिति-
तथा सति बह्वीश्वरत्वादीश्वरस्याद्वितीयत्वभंगः- कीदृशं साम्यं ईश्वरेण मुक्तानां जगत्सृष्ट्यादियुक्तं वा तद्वर्ज्यमेवेति संशयः. किं प्राप्तं- स यदि पितृलोककामो भवति- संकल्पादेवास्य पितर इत्यादिषु संकल्पमात्रात् पितृलोकादिसृष्टिसामर्थ्यदर्शनात् इमौलोकान् कामरूप्यनुसंचरन्नित्यादिना सर्वत्र व्यापारदर्शनात् मुक्तानामपि परमेश्वरसाम्यस्य संकोचायोगात् जगत्सृष्ट्यादिः प्र - - -
स्तीति प्राप्ते ब्रूमः मुक्तस्य परमेश्वरेसाम्येपि जगत्सृष्ट्यादिव्यापारवर्ज्यमेव

स्थात्त्वं अस्य मोक्षवस्तुषु कामचारः। यतोवा इमानि भूतानि जायन्ते इत्यादि द्यावा पृथिवी जनयन् देव एकः इत्यादिषु सृष्ट्यादिकं परमेश्वरस्य प्रकरणादवगम्यते सृष्ट्यादि कारणे परस्य। स्वसंनिहितत्वं च जीवः। अतो मुक्तस्य न जगत्सृष्ट्यादिकमस्ति –

॥ प्रत्यक्षोपदेशादिति – – चेन्नाधिकारिक मण्डलस्योक्तेः॥

इमां लोकान् कामान्नी कामरूप्यनुसंचरन्नित्यादिषु जगद्व्यापारस्य मुक्तेः प्रत्यक्षोपदेशात् तस्य तद्भावोऽस्तीति चेन्न। नामानि कामभोगा ईश्वरत्वादि अधिकारिणां ब्रह्मादीनां मण्डलेषु स्थित भोगानुपङ्क्ति एवोच्यते। अतोऽस्य न जगद्व्यापारः तथापि तस्य तत्तद्भोगानुपङ्क्तात् विका

१६९ 13. रि १ त्वमित्यत्र आह-
पविकारावर्तिच तस्या हिस्थिति-
माह-॥
तस्यानुभव सुख विकार लवासंस्पृष्टं
विशुद्धं परिपूर्णं ब्रह्मस्वरूपं हि - तस्या
हि खलवस्य स्थितिमाह - रसो वै सः
रसं ह्येवायं लब्ध्वानन्दी भवति इति, ब्रह्म
स्वरूपं हि सत्यं ज्ञानमनन्तं ब्रह्म आ
काशशरीरं ब्रह्म अतः सत्यं परं ब्रह्म इ
त्यादिषु विश्रुतमेव हि श्रूयते हि, अतो
नविकारि पाशमोक्षः सुख कि मुक्तं -
इह सदाशिवादीनां अधिकारिणां ब्रह्म
तानां मण्डलेषु स्वेच्छयासंचरन्
कामानी, कामरूपी विगलितदेहाभि
मानो नोसंकुचित शक्तित्रयव्यापारः प
शोत्तापवान्द परमानन्द प्रकाश विभूतिम

स्य: शक्तिशिव सामरस्य परहंरूपैकरस-
प्रपंचावगाहिनं परिपूर्ण महमाभावं -
प्रकटमनुभवति — तथा हि । अहमन्न
महमन्नमहमन्नादोऽहमन्नाद इत्यादिना
भोक्तृभोग्य भोक्तृत्वादि सकलप्रपंचात्मभाव
परिपूर्णाहं भावनास्यावगम्यते । अतोऽहंका
रो न सांसारिकः । सकलप्रपंचावगाहित्वे
न परिपूर्णत्वात् मुक्तस्वभाव एव । कल्पिता
देवोऽहं मनुष्योऽहमिति देवादिदेहमात्रा
वगाहितया परिच्छिन्ना सांसारिकाऽहं
कारादयं विलक्षण एव : तोऽतो न प्राकृत
अहंकारबंधः । यद्वाहमिति शक्तिशिवाद्वयं
ब्रह्मोच्यते तदेवान्नादिकं प्रपंचजालमि
१६६ A ति भावना । तथा प्रवृत्तः । अनुरूपे
सर्वात्म शिवशक्त्यद्वयात्मनि । परामर्शो वा
निर्गुणत्वात् अहमित्युच्यते विभो ॥

दे धकारो ह्रादश्रीते हकारस्तदिदं विदुः।
अहमात्मकमद्वैतं यत्प्रकाशात्मविग्रहः।। -
इत्यादि - अतानुत्तर ब्रह्मानन्दानुभवव्या
पार मंतरेण सृष्ट्यादिव्यापारः स्वेच्छया
नसंभवति -

।। तत्रैव हि प्रत्यक्षानुमाने ।।

तत्रैव मुक्तमर्थे प्रत्यक्षानुमाने श्रुतिस्मृ
तीदर्शयतः तस्माद्वा - - - - आत्मन
आकाशस्संभूतः इत्यादिका श्रुतिः -
अप एव ससर्जादौ वित्यादिकस्मृतिश्च - अतो
ब्रह्मण एव जगत्कारणत्वादिकमिति - तथास
ति यदा पश्यः पश्यवर्णं शक्तारमीशं पु
रुषं ब्रह्मयोनिं तदाविद्वान्न् पुण्यपापे विद्वान्
विधूय निरंजनः पुरुषं स्वत्यमुपैतीति
मुक्तः शिवसमो भवेदित्यादिषु मुक्तस्य
तेन परब्रह्मणा। शिवेन साहश्यं तस्यज

शात्सृष्ट्यादिकं यद्यदस्ति तत्तत्सर्वमसंकुचि
तं स्यात् अन्यथा सादृश्य हानिरित्यत-
आह·

॥ भोगमात्र साम्य लिङ्गाच्च ॥

मुक्तस्य ब्रह्मणासाम्यं सत्यकाम भोगमात्र
देव, न जगत्सृष्ट्यादिना · तथाऽस्ति ब्रह्मैव
रूपसंगात् अनवस्थास्यात् – तथाहि
श्रूयते सोऽश्नुते सर्वान् कामान् सह ब्र
ह्मणा विपश्चितेति ∴ यथा ब्रह्म सकलका
मान् भुङ्क्ते तथा मुक्तोपीति भोगमात्रसा
166 13· म्यमिह· १· मुक्तस्य ब्रह्मणा साम्यमिति
समीचीनं · लोकेषु कतिपय धर्म संबन्धा
दपि सिंहो देवदत्त इत्यादिषु सादृश्य
दर्शनात् तत्सादृश्य वचन हानिः –
· विविधं पश्यत्या, चिता ज्ञानशक्त्या पुरुषं
हि ब्रह्म विपश्चिदित्युच्यते यथा स्वाभावि

-कया हृदयभूतया परमसत्तास्फुरत्तया·
देशकालविशेषशून्यस्य परब्रह्मणः शि
वस्य · सर्वज्ञत्वं सर्वकारणत्वं · सर्वात्मत्वं ·
सर्वशक्तित्वमलुप्तशक्तित्वं स्वतन्त्रत्वं नि
त्यतृप्तत्वं निरतिशयैश्वर्यवत्त्वं सर्वा
नुग्राहकत्वं. सकलमुक्तयोग्य रसस्वरू
पत्वादीनि संभवन्ति.. तादृशाया यु
क्तं विपश्चित् तस्मात् परं ब्रह्म वि
पश्चिदिति - तेन सह समरसात्मा मुक्तो
पि सर्वान् कामान् अन्तःकरणेन
स्वाभाविकेन मनसा ज्ञानविशेषेण तादृशो
न समश्नुते पश्यन् रमते - तथाहि म
नसैतान् पश्यन् कामान् रमते मनोस्य
दैवं चक्षुरिति· सत्यात्म प्राणारामं म
न आनन्दमिति ब्रह्मणोपि तन्मनसैवा
नन्दभोगः नबाह्यकरणापेक्षा -ब्रह्मणो

मुक्तस्य च शरीरेन्द्रियादिग्रहणमेभि[illegible]कं विहारार्थमित्यदोषः - अतो भोगमात्रसाम्यं मुक्तस्य ब्रह्मणेति ॥

॥ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥

उक्तं ब्रह्मणापि ---सायुज्यं मुक्तानां भोगादि साधर्म्यात् तदिह तेषां पुनरपि कदाचित्संसारापत्तिरस्ति वेति संशयः - कर्म विशेषेणेन्द्रादिपदारूढानां आवृत्तिदर्शनं संशयकारणं किं तावत्प्राप्तं कामानां कामरूपानुसंचारन्नित्यादिषु बहुशरीरसंबन्धोवगम्यते - मुक्तानां तत्संबन्धे सति पुनरपि पुण्यपापकर्तृत्वं संभाव्यते ---- स्यो प्रसनाति शयस्य बहुधाभोगेन क्षये तत्कालिक

कर्मवशात् पुनरपि हीनसुखसंसारप्राप्तिः
कूपकादि रूढानां पुण्यातिशयक्षये - -
- - ब्राह्मणादिशरीरप्राप्तिश्च - अतश्च ब्र
ह्मपदप्राप्तानां इष्टत्वादि संबन्धेन भोगस्य
च पुण्यातिशयक्षयहेतुत्वेन च पुनरावृ-
त्तिस्संसार इति प्राप्ते ब्रूमः साक्षात्कृतब्र
ह्मज्योतिषां तत्पदानुप्रविष्टानां मुक्तानां
न पुनरावृत्तिः संसारः - कुतः - स ख
ल्वेवं वर्तयन् यावदायुषं ब्रह्मलोक
मभिसंपद्यते न च पुनरावर्तते इत्यादि
शब्दात् ब्रह्मविष्ण्वादि पदमुक्ता. तदितरत्वे
न शिवस्य परब्रह्मणः पदं पुराणं चाभिव्य
नक्ति: दिनकृत्कोटिसंकाशं स्थानमाद्य
मुपैति यत्। सर्वकामसमायुक्तं विशुद्धं
नित्यमक्षयं॥ संप्राप्य तत्पदं दिव्यं सम
स्तक्लेशवर्जिताः। सर्वज्ञाः सर्वगाश्शुद्धाः

परिपूर्णा भवन्तित्य॥ विशुद्धकार्यकरणाः
परमैश्वर्यसंयुताः। सं. देहाश्च विदेहाश्च
जयन्त्यात्मेच्छया पुनः॥ ये संप्राप्ताः प
रं रूपाणि ज्ञानयोगरतान राः॥ न तेषां पु
166/13 नरावृत्तिः. १ घोरे संसारमंडले॥ इ
त्यादिभिः- अस्यार्थ तात्पर्य मुच्यते-
परंज्योतिरूप संपद्य स्वेनरूपेणाभिनि
ष्पद्यत इति- परं ज्योतिः स्वरूपं संपद्य
स्वेनरूपेणाभिनिष्पद्यत इति परंज्यो
तिःस्वरूपं हि मुक्तप्राप्यं उमासहितप
रं ब्रह्म अग्निभूतं सूर्यादि तेजोबृन्दस्य
यस्य महाप्रकाशस्य भासा सर्वे मेतद्
भाति तथाश्रुतिः- न तस्य सूर्योभाति
न भाति चन्द्रमाः नेमा वि.नु. तो भाति.
कुतोयमन्यः यस्य भासा सर्वमिदं वि
भातीति तथा निरूपितं- अथ सर्व

शिरसी इवेरण पुष्करमहं पवितमहं अग्रां
च बहिःश्य: पुरस्ता. ज्योतिरित्यहमेव.
सर्वमेव यो वेद स सर्वं देवा वेदेति
तथास्मरन्ति च "सर्वत: पाणिपादान्तं-
सर्वतोऽक्षि शिरोमुखं। सर्वमावृत्य ति
ष्ठति तत्तेजोराशिं संस्मरेत् इत्यादि
तत्: परं ज्योति रूपं उमासहितं शिवा
ख्यं परं ब्रह्म तदधिष्ठितं पदं दिनकृ
त्कोटिसंकाश मिति किमुच्यते निर
तिशय तेजोमात्र स्फुरत्तामयं तदेव
निरतिशय सुखास्पदत्वतया स्वर्गा
भि: सं प्रकाशरूपतया परमाकाश
मुच्यते स्वर्गो लोको ज्योतिषा वृत-
देवाह वै स्वर्गं लोकमगमन् तद्देवा रुद्र
मपृच्छन्नित्यादिष्वेवगम्यते स्थानं यत्तु
रीयातीतं- ~~स्थान~~ तयोत्तरगीता-

सुर्यं च शिवस्थान मनामयमिति उपाद्यं
१६५ सर्वे १ परलोकाना मतीतत्वात् कारणरू
पत्वाद्यं शिवं लोकाद्भहि ज्ञेयान्यस्या.
स्वावरणानीत्यादिषु यस्यबहिरण्डस्ता
त् ब्रह्माण्डस्य सप्तावरणानि- परात्परतो
ब्रह्मा स्परात्परतो हरिः तत्परातेनी
प्रकृतिः ब्रह्मादि त्रिरूपाधिकस्य ब्रह्मणः
पदं विश्वोत्तीर्णं इति आद्यं उमापतेः
परब्रह्मणः शिवस्य उमासहायं परमेश्व
रं त्रिलोचनं नीलकंठं प्रशान्तं ध्यात्वा
मुनिर्गच्छति भूतयोनिं समस्त साक्षिं
तमसः परस्तात् स हि उमासहितस्य
नीलकंठस्य त्रिलोचनस्य शिवस्य ध्ये
यत्वं उपासकस्य तमसः प्रकृति परत्वेन
प्राप्यत्वं चावगम्यते- अतश्च सर्वो वै रुद्र
इत्यारभ्य सर्वात्मत्वं शिवस्य अभिधाय

तत्स्वरूपोपसंहारे हिरण्यबाहवे हिरण्यपत
ये अंबिकापतये उमापतये इति स्तुतं प्रणव
पर्याये नो मा शब्देन परप्रकृतिरूपा परम
शक्तिर्हि निरूप्यते तत्पुनः कीदृशं ब्रह्म
कृष्णपिङ्गलं ब्रह्मेति तत्समारभ्य ब्रह्मणः
साब्धितं तस्मादुमापतेः परं ब्रह्म यदं तत्पु
नः कीदृशं सर्वकामसमायुक्तं सकलसक
लकामसमन्वितं अतः खलु सोऽश्नुते सर्वा
न्कामान् सह ब्रह्मणा विपश्चितेति मुक्त
स्य सकलकामावाप्ते ब्रह्मणा सह निरूपि
तो विशुद्धं विकारासंस्पृष्टं समस्तसा
क्षिणं तमसः परस्तादित्यादि प्रकृति १६८.13.
विकारातीतत्वावगमात् प्रकृतिविकारत्व
द्वारा द्वेषलोभादीनामनुत्पादकत्वात् विशु
द्धं हि तत्पदं शिवमयमिति अनेनास्य प
रमतत्त्व प्रकाशमय महानन्दमेदुर परमाका

शारूपवद्युक्ते भवतीत्यत्य प्रकृतान्यामेव
विकारणाणां सृष्ट्यादिश्रवणात् तत्कृतीत्वा
कस्य नित्यत्वं भूताकाशदेहप्रपंचस्य सृ-
ष्ट्यादिकं परमाकाशरूपस्यास्य तदस्ति
यत्तमस्तान्न दिवा न रात्रिः नसन्न
चासच्छिव एव केवल इति श्रावणात् शिव
व्यतिरिक्तस्य सर्वस्य प्राक्र्यो वगम्यते क
परमस्य नित्यत्वमिति मुक्तानामपीतिचेत्
मुक्तानामव्यपदेशस्य च शिवतत्वेन्तर्भा
वात् विशुद्धिभाजनतया तद्विशेषत्वमेवापि
समानमेव सृष्ट्यादिचक्रपतित पशुपाश
विलक्षणत्वं हि शिवत्वं अतः पशुपाशविल
क्षणस्य शिवपदस्य नानित्य संभवः -अ
क्षयं क्षयवृद्धिरहितं क्षयातिशय युक्त
कर्मफल स्वर्गादि विलक्षणं तादृशं हि सोध्व
नः परमाप्नोति तद्विष्णोः परमं पदमिति

श्रूयते विष्णोः परमं स्वरूपं हि परमाकाशा
ख्य शिवस्थानं तद्विषयस्याध्वनः पारम
तीतमुच्यते ब्रह्मलोकमभिसंपद्यते न च
पुनरावर्तते न च पुनरावर्तते इत्यतानावृ
त्तिः। लक्षणं ब्रह्मलोक शब्दवाच्य मीदृमेव
१६९ स्थानं संप्राप्यत १ त्पदं दिव्यं समस्तक्ले
शादिवर्जित मित्यादिना तदारूढानां क
क्षेस्य इद्धानां लक्षणमुच्यते- महतो वेदस्य
स्वभूतं दि... त्... ह मनसगोचरं स्व
भावं पदं संप्राप्य तत्संबन्धिना ज्ञान
योगेना विगम्य मुक्ताना भवन्त्यात्मनः
समस्तक्लेश विवर्जिता भवन्ति अनेनमुक्ता
नां तेषां हेयगुणराहित्य मुक्तं भवति अतः
कल्याणगुण साहित्य मुच्यते शिवत्वं हि
ते संपन्नाः सर्वज्ञाः ज्ञानावरणस्य मलस्य
विनाशात्ते - - - - सर्वज्ञाभवंति।

पुनरावृत्तः नपुनस्संसारधर्मान्वय इति अतो ब्रह्मलोकमभिसंपद्यते. न च पुनरावर्तत इति. सर्वज्ञस्य सर्वशक्तेः सर्वैश्वर्यसंपन्न — — — — सर्वकर्मसमाप्यस्य निरस्तसमस्तदोषकळंकस्य निरतिशयमङ्गळरत्नाकरस्य विरूपाक्षस्य परब्रह्मण उमापतेः लोकं पदं निरवच्छिन्नानन्दप्रकाशं नित्यमक्षयमतिसंपन्नः सर्वज्ञत्वादियोगिनो नावृत्तिभयावर्तन्ते तत्रेति किमुक्तं भवति देवायत्तदेवा अमृतमानशानास्तृतीये धाम्न्यध्यैरयंत इत्यादिना निरतिशयानन्दप्रकाशने ब्रह्मणि शिवे सामरस्यमुपगताः मुक्ताः प्रकाशपुरुषः सर्वज्ञः सर्वगताः शांताः परिपूर्णाः नित्यपरमैश्वर्याधारः.

१६९ उ. भि. शो. १. प. विशिष्ठित मलावरणाः

सर्वत्र तद्दर्शिनः तदात्मनः तदीये पदे स
र्वगते परमाकाशलक्षणे धाम्नि प्राप्य
स्वेच्छागत सकलकामास्तेन सह सदा
सर्वत्र विद्योतंत इति सर्वं समंजसमेव॥

इति
श्री नीलकंठ शिवाचार्य विरचिते
ब्रह्ममीमांसाभाष्ये
चतुर्थोऽध्यायः॥

श्वेताचार्य पदद्वन्द्व शुश्रूषाद्योतितमनाः।
कृतमेतन्महाभाष्यं केवलं भक्तिरत्नतः॥

(यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया। अ
शुद्धं वा सुशुद्धं वा मम दोषो न विद्यते॥)—
॥ॐ साम्बशिवाय नमः॥
॥श्रीकृष्णार्पणमस्तु॥

560.

यथादर्शं प्रत्यादर्शीकृतम्-

N Ranganatha Sastri
6-9-53॥

(यथादर्शस्य प्रमितनुगुणानां
नप्रत्यादर्शीकृत्यादि-
मऽ॥)

॥ ॐ ॥
॥ श्री ॥

यथाकोशं शोधितम्
श्री. वै. वेङ्कटसुब्रह्मण्यशास्त्री.